# शारदा

कक्षा ९

## नवमकक्षायाः संस्कृत-पाठ्यपुस्तकम्



# शारदा

## नवमकक्षायाः संस्कृत-पाठ्यपुस्तकम्

© NCERT
not to be republished

0902

विद्ययाऽमृतमश्नुते
एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

**0902 – शारदा**
नवमकक्षायाः संस्कृत-पाठ्यपुस्तकम्

ISBN 978-93-5729-048-7

**प्रथम संस्करण**
*अप्रैल 2026 चैत्र 1948*

**PD 500T + 1000T M**

***© राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, 2026***

**₹ 110.00**

*एन.सी.ई.आर.टी. वॉटरमार्क 80 जी.एस.एम. पेपर पर मुद्रित।*

सचिव, राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, श्री अरविंद मार्ग, नई दिल्ली 110016 द्वारा प्रकाशन प्रभाग में प्रकाशित तथा सीता फाइन आर्ट्स प्रा. लिमिटेड, प्लॉट नंबर 21, एच.एस.आई.आई. डी.सी. इंडस्ट्रियल एस्टेट, फेज़-4, सेक्टर-56, कुंडली 131001, सोनीपत, हरियाणा द्वारा मुद्रित।

**सर्वाधिकार सुरक्षित**

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भी भाग को छापना तथा इलैक्ट्रॉनिकी, मशीनी, फ़ोटो प्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुन: प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रचारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशक की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

**रा.शै.अ.प्र.प. के प्रकाशन प्रभाग के कार्यालय**

एन.सी.ई.आर.टी. कैंपस
श्री अरविंद मार्ग
**नई दिल्ली 110 016** फोन : 011-26562708

108, 100 फीट रोड
हेली एक्सटेंशन, होस्डेकेरे
बनाशंकरी III इस्टेज
**बेंगलुरू 560 085** फोन : 080-26725740

नवजीवन ट्रस्ट भवन
डाकघर नवजीवन
**अहमदाबाद 380 014** फोन : 079-27541446

सी.डब्ल्यू.सी. कैंपस
निकट : धनकल बस स्टॉप पनिहटी
**कोलकाता 700 114** फोन : 033-25530454

सी.डब्ल्यू.सी. कॉम्प्लेक्स
मालीगाँव
**गुवाहाटी 781 021** फोन : 0361-2676869

**प्रकाशन सहयोग**

| | | |
|---|---|---|
| अध्यक्ष, प्रकाशन प्रभाग | : | *एम.वी. श्रीनिवासन* |
| मुख्य संपादक | : | *बिज्ञान सुतार* |
| मुख्य व्यापार प्रबंधक | : | *अमिताभ कुमार* |
| मुख्य उत्पादन अधिकारी (प्रभारी) | : | *दीपक जैसवाल* |
| सहायक संपादक | : | *मीनाक्षी* |
| सहायक उत्पादन अधिकारी | : | *प्रकाश वीर सिंह* |

**आवरण, चित्रांकन एवं ले-आउट**
*ग्रीन ट्री, डिज़ाइनिंग स्टूडियो प्राइवेट लिमिटेड*

© NCERT not to be republished

# पुरोवाक्

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**

भारतीयसभ्यतायाः अवबोधपुरस्सरं जीवनमूल्यानि नैतिकमूल्यानि भारतस्य प्रतिष्ठां समतां गुणवत्तां मानवानाम् उत्तरदायित्वानि च शिक्षामुखेन पुनः संरचयितुं सङ्कल्पबद्धा इयं राष्ट्रियशिक्षानीतिः – २०२०। सैषा नीतिः भारतीयज्ञानप्रणाल्याः समन्वयेन सह आधुनिकवैश्विकपरिप्रेक्ष्ये समर्थानाम् उत्तरदायित्ववतां नागरिकाणां निर्माणं लक्ष्यीकुर्वती तेषां समग्रविकासम् अभिप्रैति।

विद्यालयीयशिक्षायाः राष्ट्रियपाठ्यचर्यारूपरेखा – २०२३ (NCF-SE 2023) विद्यालयीयान् चतुरः स्तरान् (५+३+३+४) सुव्यवस्थितरूपेण सञ्चालयितुं स्तरबद्धपाठ्यसंरचनां निर्दिशति। समीक्षात्मकचिन्तनं, सर्जनशीलतां, संवेदनशीलतां च पोषयति इयं रूपरेखा। न केवलं तावदेव अपि तु अधिगमस्य प्रतिफलाधारितदृष्टिकोणं (Learning Outcomes Orientation), दक्षताकेन्द्रितशिक्षणं (Competency-Based Education), बहुविषयाधारितं शिक्षणं (Multidisciplinary Education), नमनीयपाठ्यचर्या (Flexible Curriculum), आजीवनाध्ययनं (Lifelong Learning) च इत्येतादृशं महल्लक्ष्यं साधयितुम् इयं राष्ट्रियरूपरेखा प्रवर्तते। नवम्याः दशम्याश्च कक्षयोः पाठ्यक्रमः विद्यार्थिनः तर्कशक्तिं, विश्लेषणदृष्टिं, संवादकौशलं, सर्जनात्मकतां, निर्णयक्षमतां च विकासयति। पाठ्यक्रमोऽयं भविष्यत्कालीनशैक्षणिकक्षेत्रेषु सामाजिकक्षेत्रेषु व्यावसायिकक्षेत्रेषु च सफलतापूर्वकं छात्रान् समायोजयति।

त्रिभाषासूत्रानुसारं द्वाभ्यां भारतीयभाषाभ्यां समन्विताः तिस्रः भाषाः अनिवार्यतया छात्रैः पठनीयाः भवन्ति। तथा च विज्ञानं, गणितं, सामाजिकविज्ञानं, कलाशिक्षा, शारीरिकशिक्षा स्वास्थ्यशिक्षा, व्यावसायिकशिक्षा पर्यावरणशिक्षादयः च सामान्यतया अन्यविषयेषु समाविष्टाः भवन्ति। अनेन छात्राणां समग्रविकासः, कौशलसम्पादनं, राष्ट्रबोधः, वैश्विकदृष्टिकोणः च नित्यं संवर्धन्ते।

अस्मिन् स्तरे संज्ञानात्मकविकासस्य विमर्शात्मकचिन्तनस्य सर्जनात्मकाभिव्यक्तेः अन्तःसांस्कृतिकसंवेदनशीलतायाः च आधाररूपेण भाषाशिक्षणं परिगण्यते। विद्यालयीयशिक्षायाः राष्ट्रियपाठ्यचर्यारूपरेखा – २०२३ निर्देशानुसारं भाषाधिगमः विश्लेषणात्मकस्य विमर्शात्मकस्य सर्जनात्मकस्य च क्षमतां संवर्धयति।

एतदन्तर्गतं नीतेः परिप्रेक्षे माध्यमिकस्तरस्य संस्कृतभाषायाः पाठ्यपुस्तकं *शारदा* इति नाम्ना विरचितम्। अस्य पाठ्यपुस्तकस्य विषयविन्यासः तु भारतीयसामाजिकतायाः

© NCERT not to be republished

सांस्कृतिकतायाः भौगोलिकतायाः च प्रतिरूपं वर्तते। सतीषु नैकासु विविधतासु एकताप्रधाना इयं भारतभूमिः सर्वजनैक्यं प्रतिपादयति। पाठ्यपुस्तकेऽस्मिन् प्राचीनार्वाचीनविषययोः सङ्गमः दृश्यते। संस्कृतभाषायां विद्यमानविज्ञानेन सह आधुनिकभारतीयाः विषयाः अपि अत्र सम्मिलिताः वर्तन्ते। अनेन छात्राः संस्कृतभाषामाध्यमेन आधुनिकतामपि शिक्षन्ते। सामाजिकव्यवस्था नैतिकता वैज्ञानिकता प्रौद्योगिकता मानवीयसम्बद्धता च इत्येतादृशाः अनेके व्यावहारिकविषयाः पाठेषु अतिरिक्तविषयेषु च उपनिबद्धाः सन्ति। संस्कृतं भारतीयज्ञानप्रणाल्याः पृथग्भूतं न इत्यतः अत्र सहजतया भारतीयज्ञानप्रणालीभूताः विषयाः नैके अन्तर्निहिताः दृश्यन्ते।

पाठ्यपुस्तकेऽस्मिन् अनुभवाधारिताध्ययनाय परिवेशः उपकल्पितः वर्तते। छात्राः स्वाध्याये प्रवृत्ताः तदर्थं पाठ्यपुस्तकमिदं स्वाध्यायकेन्द्रितं वर्तते। अस्मिन् पाठ्यक्रमे श्लोकानाम् अन्वयक्रमः दर्शितः, सोदाहरणं व्याकरणांशाः प्रतिपादिताः, कठिनपदानाम् अर्थाः हिन्दी-आङ्ग्लभाषयोः प्रदत्ताः, पाठ्यविषयाश्च सचित्रं विन्यस्ताः वर्तन्ते। तथैव अस्मिन् पुस्तके परियोजनाकार्याणि स्वाध्ययनप्रवृत्तयः, संवादाधारितक्रियाः च समाविष्टाः सन्ति। प्रतिपाठं QR-सङ्केतसमावेशेन स्फूर्तसंसाधनप्राप्तिः (Digital Learning) भवति।

इदं पाठ्यपुस्तकं केन्द्रीयाध्ययनसंसाधनरूपेण स्वीकृतं वर्तते। अस्य प्रभावपूर्वक-क्रियान्वयनाय नैकविधप्रयत्नाः भवेयुः, यथा विविधग्रन्थालयेषु स्फूर्तमाध्यमेषु च अस्य पुस्तकस्य उपयोगिता स्यात्, पोषकाः सामाजिकाश्च अस्य अध्ययनं कुर्युः।

राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद् अस्य पाठ्यपुस्तकनिर्माणे संलग्नानां विषयविशेषज्ञानां, शिक्षाशास्त्रविदां, अभ्यासशीलशिक्षकाणां, पाठ्यपुस्तकविकासगणसदस्यानां समीक्षकाणां च योगदानं स्मारं स्मारम् औपचारिकरूपेण कृतज्ञताम् आविष्करोति।

आशास्महे यत् *शारदा* इति पाठ्यपुस्तकं छात्रान् गम्भीरचिन्तनाय आत्मविश्वासपूर्वकसंवादाय अस्माकं राष्ट्रस्य विश्वस्य च बौद्धिकसामाजिकजीवने सविवेकं सहभागितायै च प्रेरयिष्यति इति।

भविष्यत्संस्करणेषु गुणवर्धनार्थं तत्रभवतां समेषां हितचिन्तकानाम् अभिप्रायाः सादरम् आमन्त्र्यन्ते।

प्रो. दिनेशप्रसादसकलानी
*निदेशकः*
राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नव-देहली

मार्च २०२६
नव-देहली

© NCERT not to be republished

# भूमिका

**उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥**

देवभूमिरियं भारतभूमिः सर्वदा विश्ववन्द्या विश्वमान्या च। अस्याः भारतभूमेः आत्मा भवति इदं संस्कृतम्। तेन संस्कृतेन संस्कृताः खलु वयं भारतीयाः। संस्कृतिः भाषाधारिता भवति। सैषा भारतीया उदात्ता संस्कृतिः संस्कृताश्रिता वर्तते। अत एव उच्यते — "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"। ते खलु अस्माकं पूर्वजाः ऋषिमुनयः अनया भाषया ज्ञानविज्ञानतत्त्वानि निगदितवन्तः। प्राचीनकाले भारतीयविज्ञानिनः ऋषिमुनयः अन्तरिक्षविज्ञानं (Space Science) वास्तुकला (Architecture) इत्यादिषु बहुषु विषयेषु निष्णाताः आसन्। यथा — आर्यभटीये "छादयति शशी सूर्यं शशिनं महती च भूच्छाया ॥" The moon covers the sun (solar eclipse), and the great shadow of the earth covers moon (lunar eclipse), तेषां विज्ञानम् अन्यैः सह तोलयितुं न शक्यम्। यथा वाल्मीकिना उच्यते — "गगनं गगनाकारं सागरः सागरोपमः" तथा तेषां ज्ञानस्य साम्यं न किञ्चित् प्राप्तुमर्हति। आधुनिकविज्ञानापेक्षया ते बहु अग्रवर्तिनः आसन्। तादृशं ज्ञानम् अस्माकम् ऋषिमुनयः कूटरूपेण संस्कृतश्लोकेषु मन्त्रेषु उपनिषत्सु शास्त्रादिषु च निबद्धवन्तः। तादृशं ज्ञानम् अस्माकं शिक्षणक्षेत्रेषु पुनरानेतुं राष्ट्रियशिक्षानीतिः – २०२० भारतीयज्ञानपरम्परां न्यरूपयत्। सा च भारतीयज्ञानपरम्परा आन्तरिकतया संस्कृतभाषायामेव वर्तते इत्यतः संस्कृतच्छात्राः अधिकलाभान्विताः भविष्यन्ति। संस्कृतच्छात्राः संस्कृतभाषाद्वारा शास्त्रीयग्रन्थान् पठेयुः, शास्त्रेषु वैज्ञानिकशोधकार्याणि कुर्युः, तेषु निबद्धं ज्ञानं बहिरानयेयुः चेति धिया पाठ्यपुस्तके अनेके विचाराः सरलतया उल्लिखिताः सन्ति।

राष्ट्रियशिक्षानीतेः अनुगुणं पाठ्यपुस्तकानि स्वाध्यायकेन्द्रितानि स्युः। अध्यापकाः छात्रान् पुस्तकानां पठनाय प्रेरयेयुः। छात्राः स्वप्रयत्नेन नैकानि पुस्तकानि पठेयुः। विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च पठनशीलाः स्वाध्यायतत्पराः छात्राः निर्मेयाः स्युः। तदर्थं शिक्षकाः मार्गदर्शकाः सन्तः छात्रान् सज्जीकुर्युः। एतदर्थं पाठ्यपुस्तकरचनासन्दर्भे एतादृशानि नैकानि उद्देश्यानि मनसि निधाय नवम्याः कक्षायाः पाठ्यपुस्तकस्य रचना कृता। विशेषरूपेण अध्यापकाः छात्राश्च पुस्तकस्य मूलोद्देश्यानि

© NCERT not to be republished

ज्ञात्वा पठन-पाठनकार्येषु प्रवृत्ताः भवेयुः। नवम्याः पाठ्यपुस्तकेऽस्मिन् आहत्य एकादश पाठाः वर्तन्ते। प्रत्येकं पाठः नूतनमनुभवं ज्ञानं च प्रददाति। राष्ट्रियशिक्षानीतौ उक्तरीत्या पाठेषु मानवीयमूल्यानि जागतिकमूल्यानि सामाजिकमूल्यानि सांस्कृतिकमूल्यानि च विशेषरूपेण उपनिबद्धानि सन्ति। पञ्चकोषाणां विश्वबन्धुत्वस्य शान्तेः एकतायाः जीवकारुण्यस्य देशभक्तेः भारतीयेतिहासस्य महाभारतरामायणयोः जैनसम्प्रदायस्य च पाठाः अत्र सन्निविष्टाः सन्ति। एतैः पाठैः सह उत्तमजीवननिर्वहणाय व्यावहारिकज्ञानम् आर्थिकज्ञानं तन्त्रज्ञानं पर्यावरणशिक्षादयः चापि अत्र योजिताः सन्ति। ज्ञाताद् अज्ञातम्, सरलात् कठिनम्, स्थूलात् सूक्ष्ममित्यादीनां शिक्षणसूत्राणां तथैव रुचिसिद्धान्तादीनां शिक्षणसिद्धान्तानाम् आधारेण पाठाः अस्मिन् पुस्तके उपनिबद्धाः सन्ति।

पुस्तकेऽस्मिन् सुभाषितानां पङ्क्तयः पाठानां शीर्षकरूपेण प्रदत्ताः। अनेन छात्राः सहजतया तानि वाक्यानि सुभाषितानां पङ्क्तीः च नित्यजीवने व्यवहारे वा उपयोक्तुं शक्नुवन्ति, यतः कक्षासु छात्राः सामान्यतः पाठानां नामानि जानन्ति इति अध्यापकानाम् अनुभवः वर्तते एव। छात्राः समानपाठं न्यूनातिन्यूनं दिनत्रयं दिनचतुष्टयं वा पठन्ति। तथैव पाठानां शीर्षकाणि बृहद्भिः अक्षरैः उल्लिखितानि। छात्राः यदा यदा पुस्तकस्य उद्घाटनं कुर्वन्ति तदा तदा पाठानां नामानि पठन्ति। पौनःपुन्येन तेषां दर्शनेन पाठानां शीर्षकाणि स्मृतिपथे तिष्ठन्ति। एवं पाठानां शीर्षकैः अपि भाषाभ्यासः मानवीयमूल्यानि नीतयः च अवबुध्यन्ते। पाठानां शीर्षकाणि इव पाठगतभागानाम् अपि शीर्षकाणि पूर्णवाक्येन दत्तानि। शब्दार्थः यत्र प्रदत्तः तत्र शीर्षकं "सर्वं शब्देन भासते" इति वर्तते। "अभ्यासाद् जायते सिद्धिः" इति वाक्येन एव अभ्यासानाम् आरम्भः भवति। तेन स्वाभाविकतया छात्राः ज्ञास्यन्ति यद् जीवने किमपि साधनीयं चेत् अभ्यासः करणीयः इति 'Practice makes perfect'। "स्वाध्यायान्मा प्रमदः" इति शीर्षकान्तर्गतम् अतिरिक्तज्ञानं छात्रेभ्यः भारतीयज्ञानपरम्परां बोधयति। पाठ्यपुस्तकस्यान्ते छात्रेभ्यः विविधगतिविधयः प्रदत्ताः सन्ति। रचनात्मकाः, तार्किकाः, भाषाकौशलान्तर्गताः, तन्त्रज्ञानान्तर्गताः, क्रीडात्मकाः, समालोचनात्मकाः, सामूहिकाश्च क्रियाकलापाः बहवः प्रदत्ताः सन्ति। तादृशैः गतिविधिभिः छात्राः सोत्साहं विषयान् अधिगच्छन्ति। अतः एव गतिविधिभिः क्रियाकलापैः छात्राः विषयान् अवगच्छन्तु इत्यतः तस्य शीर्षकमपि "यस्तु क्रियावान् मनुजः स विद्वान्" इति उपस्थापितम्। येन केवलं ज्ञानेन न कोऽपि विद्वान् भवति अपितु ज्ञातविषयस्य क्रियान्वयनेन विद्वान् भविष्यति इति स्पष्टम् अवगच्छन्ति छात्राः। अतः क्रियान्वयनार्थं व्यवहारार्थं कार्यार्थं वा अधिकं बलं प्रदत्तं वर्तते।

© NCERT not to be republished

संस्कृतभाषा सर्वासां भारतीयभाषाणां पोषिका वर्तते इति विदितमेव। अतः पाठ्यपुस्तके यत्र शब्दार्थाः प्रदत्ताः तत्रापि संस्कृतविग्रहेण पदपरिचयेन च सह हिन्दीभाषया आङ्गलभाषया च अर्थाः प्रदत्ताः। न केवलं तावत् अपि तु मातृभाषया छात्रेभ्यः तदर्थान् लेखितुम् अवसरः प्रदत्तः। अनेन संस्कृतभाषया सह अन्यासां भाषाणां पोषणं वर्धनं च भवति। छात्राः संस्कृतेन सह इतरभाषाः अपि पठिष्यन्ति। पाठेषु सन्दर्भानुगुणम् अपेक्षितस्थानेषु वर्णमयचित्राणि वर्तन्ते। छात्राः चित्राणाम् आधारेण पाठस्य भावं सहजतया अवगच्छन्ति। मनोवैज्ञानिकदृष्ट्यापि पाठ्यपुस्तकेषु चित्राणां महद्योगदानं भवति। चित्राणि दीर्घकालं यावत् छात्राणां बुद्धौ तिष्ठन्ति। तैः चित्रैः छात्राः पाठस्य भावं चिरं स्मरन्ति। एतादृशं वर्णोपेतं सचित्रं पाठ्यपुस्तकं बालानां सुखबोधाय भवति।

श्रवणं भाषणं पठनं लेखनं चेति भाषाज्ञानस्य आधारभूतानि भाषाकौशलानि भवन्ति। एतेषां समीचीनाभ्यासेन एव भाषायां दक्षतां प्राप्तुं शक्नोति कश्चित्। तदर्थं चतुर्णां कौशलानां विकासाय अपेक्षिता सामग्री पाठ्यपुस्तके समायोजिता वर्तते। छात्राः भाषाध्ययनात् शास्त्राध्ययनं संस्कृतवाङ्मयाध्ययनं च कुर्युः। संस्कृतवाङ्मयज्ञानार्थं व्याकरणादीनां शास्त्राणाम् अध्ययनम् अनिवार्यं भवति। ततःपरमेव संस्कृतवाङ्मये विद्यमानं ज्ञानं विज्ञानं च बहिरानेतुं शक्यते। "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये" ॥ अतः पुस्तकमिदं सर्वतोमुखं प्रशस्तमिति भावयेऽहम्। अथ च पाठ्यपुस्तकानि नैरन्तर्येण विकसनशीलानि भवेयुः। अस्य पुस्तकस्य अध्येतारः अध्यापयितारो वा यत्र यत्र गुणवर्धनार्थं दोषपरिहारार्थं वा अवसरं पश्यन्ति तस्य ज्ञापनार्थं ते सदा स्वागतार्हाः।

**समन्वयकः**

जतीन्द्र-मोहन-मिश्रः

*आचार्यः*, भाषाशिक्षाविभागः

रा.शै.अ.प्र.प. नव-देहली

© NCERT not to be republished

# भारतस्य संविधानम्

## प्रस्तावना

**वयं, भारतस्य जनाः,**
भारतं
[**सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादि, सम्प्रदायनिरपेक्षं,**
**लोकतन्त्रात्मकं गणराज्यं विधातुं**][१]
तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च – **न्यायं,**
विचारस्य, अभिव्यक्तेः,
आस्थायाः, धर्मस्य, उपासनायाश्च – **स्वतन्त्रतां,**
प्रतिष्ठायाः, अवसरस्य च – **समतां**
प्रापयितुं,
तेषु सर्वेषु च व्यक्तिगौरवस्य
[राष्ट्रस्य एकतायाः, अखण्डतायाश्च][२] सुनिश्चायिकां – **बन्धुतां**
वर्धयितुं;

कृतदृढसङ्कल्पाः
**अस्याम् अस्मदीयायां संविधानसभायाम्**
अद्य, ख्रिस्तीये १९४९-तमे वर्षे नवम्बर-मासस्य २६-तमे दिने
(२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ)
**अत्र इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्, स्वेभ्यः समर्पितं च कुर्मः।**

---

१ संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २-अनुभागेन "सम्पूर्णप्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यम्" इति एतेभ्यः शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः।

२ उपर्युक्तस्य अधिनियमस्य उक्तेन अनुभागेन "राष्ट्रस्य एकतायाः" इति एताभ्यां शब्दाभ्यां प्रति एते शब्दाः संनिवेशिताः।

# राष्ट्रिय-पाठ्यक्रम-शिक्षणाधिगम-सामग्री-समितिः (एन्.एस्.टी.सी.)

महेशचन्द्रः पन्तः, *कुलाधिपतिः*, राष्ट्रिय-शैक्षिक-योजना-प्रशासन-संस्थानम् — **अध्यक्षः**

मञ्जुलः भार्गवः, *आचार्यः*, प्रिन्सटन-यूनिवर्सिटी, यू.एस्.ए. — **सह-अध्यक्षः**

सुधा मूर्तिः, *प्रतिष्ठिता लेखिका शिक्षाविद् च*

शेखरः माण्डे, *पूर्व-महानिदेशकः*, सी.एस्.आई.आर्. तथा *आचार्यः*, सावित्रीबाई-फुले-पुणे-विश्वविद्यालयः, पुणे

सुजाता रामदोरई, *आचार्या*, ब्रिटिश्-कोलम्बिया-विश्वविद्यालयः, कनाडा

शङ्करः महादेवन्, *संगीत-विशेषज्ञः*, मुम्बई

यू. विमलकुमारः, *निदेशकः*, प्रकाश-पादुकोण-बैडमिण्टन्-अकादमी, बेङ्गळूरुः

सुरीना राजन्, *आई.ए.एस.*, हरियाणा (सेवानिवृत्ता) तथा *पूर्व-महानिदेशिका*, हरियाणा-लोकप्रशासन-संस्थानम् (एच्.आई.पी.ए.)

चमूकृष्णः शास्त्री, *अध्यक्षः*, भारतीय-भाषा-समितिः, शिक्षा-मन्त्रालयः, भारत-सर्वकारः

संजीवः सान्यालः, *सदस्यः*, प्रधानमन्त्रिणः आर्थिक-परामर्श-परिषद् (ई.ए.सी.- पी.एम्.)

गजाननः लोण्ढे, *अध्यक्षः*, कार्यक्रम-कार्यालयः (प्रोग्राम्-ऑफिस्), एन्.एस्.टी.सी.

रेबिनः छेत्री, *निदेशकः*, एस्.सी.ई.आर्.टी., सिक्किमः

प्रत्यूषकुमारः मण्डलः, *आचार्यः संकायाध्यक्षः* (अनुदेशः) च, क्षेत्रीय-शिक्षणसंस्थानम्, रा.शै.अ.प्र.प., मैसूरु, कर्नाटकः

दिनेशकुमारः, *आचार्यः* तथा *संकायाध्यक्षः* (अनुसन्धानम्), रा.शै.अ.प्र.प., नव-देहली

कीर्तिः कपूरः, *आचार्या* (सेवानिवृत्ता), भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

रञ्जना अरोड़ा, *आचार्या अध्यक्षा च*, पाठ्यचर्या-अध्ययन-विकास-विभागः, रा.शै.अ.प्र.प., नव-देहली — **सदस्य-सचिवा**

© NCERT not to be republished

# गांधी जी का जंतर

तुम्हें एक जंतर देता हूँ। जब भी तुम्हें संदेह हो या तुम्हारा अहम् तुम पर हावी होने लगे, तो यह कसौटी आज़माओ :

जो सबसे गरीब और कमज़ोर आदमी तुमने देखा हो, उसकी शक्ल याद करो और अपने दिल से पूछो कि जो कदम उठाने का तुम विचार कर रहे हो, वह उस आदमी के लिए कितना उपयोगी होगा। क्या उससे उसे कुछ लाभ पहुँचेगा? क्या उससे वह अपने ही जीवन और भाग्य पर कुछ काबू रख सकेगा? यानी क्या उससे उन करोड़ों लोगों को स्वराज्य मिल सकेगा, जिनके पेट भूखे हैं और आत्मा अतृप्त है?

तब तुम देखोगे कि तुम्हारा संदेह मिट रहा है और अहम् समाप्त होता जा रहा है।

# पाठ्यपुस्तक-निर्माण-समितिः

**अध्यक्षः, संस्कृत-भाषा-उप-समूहः**

चान्दकिरणः सलूजा, *न्यासी निदेशकः च*, संस्कृत-संवर्धन-प्रतिष्ठानम्, नव-देहली

**संस्कृत-भाषा-उप-समूहः**

कुमारः बागेवाडिमठः, *सहायकाचार्यः*, शिक्षा विभागः, राष्ट्रिय-संस्कृत-विश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

दिवाकरः शर्मा, *टी.जी.टी.-संस्कृतम्*, पीएम्.श्री. केन्द्रीयविद्यालयः क्र. 2, ए.एफ्. एस्., ग्वालियरम्, मध्यप्रदेशः

मुकेशकुमारः, *सहायकाचार्यः*, सनातनधर्म-आदर्श-संस्कृत-महाविद्यालयः, डोहगी, ऊना, हिमाचलप्रदेशः

वाचस्पतिनाथ: झा 'मणिः', *सहायकाचार्यः*, भाषाशिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धान प्रशिक्षण परिषद्, नव-देहली

वीरेन्द्रकुमारः पाठकः, शिक्षा-निदेशालयः, देहली-सर्वकारः, नव-देहली

वन्दना जे., *शैक्षणिक-निदेशिका*, शारदा-गुरुकुलम्, चेम्मण्डा, त्रिशूरः, केरला

संभाजिः विट्ठलः पाटीलः, *सहायकाचार्यः*, डेक्कन कॉलेज, पुणे, महाराष्ट्रम्

सिद्धार्थः ए. भार्गवः, *मुख्य-परामर्शकः*, एन्.एस्.टी.सी.– कार्यक्रम-कार्यालयः (प्रोग्राम् ऑफ़िस्), निदेशकः, ओं शान्तिधाम – वेद-गुरुकुलम्, बेङ्गळूरुः, कर्नाटकः

सूर्यमणि: भण्डारी, *सहायकाचार्यः*, व्याकरणविभागः, केंद्रिय-संस्कृत-महाविद्यालयः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डम्

सुशान्तकुमारः रायः, *सहायकाचार्यः*, शिक्षाविभागः, केंद्रिय-संस्कृत-महाविद्यालयः, सदाशिव-परिसरः, पुरी, ओडिशा

**सदस्य-समन्वयकः**

जतीन्द्र-मोहन-मिश्रः, *आचार्यः*, भाषाशिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नव-देहली

**सह-समन्वयकः**

देवकीनन्दनः शर्मा, *सहायकाचार्यः*, भाषाशिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नव-देहली

© NCERT not to be republished

# राष्ट्र–गीतम्

***वन्दे मातरं, वन्दे मातरम्।***
***सुजलां सुफलां मलयज–शीतलाम्***
***शस्य–श्यामलां मातरम्,***
***वन्दे मातरम्॥***

***शुभ्र–ज्योत्स्ना–पुलकित–यामिनीम्***
***फुल्ल–कुसुमित–द्रुमदल–शोभिनीम्***
***सुहासिनीं सुमधुर–भाषिणीम्***
***सुखदां वरदां मातरम्,***
***वन्दे मातरं, वन्दे मातरम्॥***

सत्यमेव जयते

'वन्दे मातरम्' इति गीतं बङ्किमचन्द्र·चट्टोपाध्याय·महोदयेन रचितस्य काव्यस्य आदिमः अंशः अस्ति, यत् संस्कृत-भाषायां गुम्फितम् अस्ति। इदं गीतं स्वातन्त्र्य-संग्रामे भारतवासिनां नितरां प्रेरणाप्रदम् आसीत्। २४.०१.१९५० इति दिनाङ्के भारतस्य राष्ट्रपतिः डा. राजेन्द्र·प्रसादः संविधान-सभायाम् एवम् उद्घोषितवान् – " 'वन्दे मातरम्' यत् भारतस्य स्वातन्त्र्यान्दोलनस्य उद्दीपने काञ्चित् ऐतिहासिकीं भूमिकां निरूढवत्, तत् राष्ट्र-गानेन "जन-गण-मन" इत्यनेन सह समानरूपेण सम्मानितं भविष्यति, समानं च महत्त्वं धारयिष्यति।"

# कृतज्ञता

पाठ्यपुस्तकस्यास्य निर्माणप्रक्रियायां मार्गदर्शने समीक्षायां च बहुमूल्ययोगदानार्थं राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् राष्ट्रिय-पाठ्यचर्या-रूपरेखा-पर्यवेक्षणसमितेः सदस्यैः सह अध्यक्षाय संस्कृतभाषायाः पाठ्यचर्या-क्षेत्रसमूहस्य सर्वसदस्येभ्यः अन्येभ्यः अन्तःसम्बन्धिविषयाणां पाठ्यचर्याक्षेत्रसमूहानाम् अध्यक्षेभ्यः सदस्येभ्यश्च कार्तज्ञ्यं प्रकटयति।

प्रो. मीरा-भार्गव-महाशया पुस्तकस्य कात्स्न्र्येन पुनरीक्षणं कृत्वा प्रतिपुष्टिप्रदानेन अस्मान् अनुगृहीतवती। तदर्थं ताभ्यः भूरिशः धन्यवादान् ज्ञापयामः।

तथैव प्रो. विजयपालशास्त्रिमहोदयः अनेकविधमार्गदर्शनेन अस्मान् उपकृतवन्तः तदर्थं तेभ्यः हार्दां कृतज्ञतां विनिवेदयामः।

प्रो. सूर्यमणिः रथः, सेवानिवृत्तः *आचार्यः*, साहित्यविभागः, केन्द्रीयसंस्कृत-विश्वविद्यालयः-सदाशिवपरिसरः, पुरी, प्रो. सीमाचलः पण्डा, सेवानिवृत्तः *आचार्यः*, संस्कृतविभागः सर्वकारीय-महिला-महाविद्यालयः, पुरी, डॉ. कालीप्रसन्नः शतपथी, *प्राक्तनः* माध्यमिक-संस्कृतविशेषज्ञः, तथा च *उपाध्यक्षः*, दिव्यजीवनसङ्घः, केन्द्रापडा, डॉ. विपिनविहारी शतपथी, *पूर्वः संस्कृत-आचार्यः*, रेभेन्सा कलिजिएट् विद्यालयः, कटकं च पुस्तकस्य समीक्षणे पुनर्निरीक्षणे प्राधान्येन सहयोगं कृतवन्तः तदर्थं वयं कृतज्ञाः।

डॉ. स्नेहलता मिश्रः, *सहायिकाचार्या* शिक्षाशास्त्रविभागः केन्द्रीयसंस्कृत-विश्वविद्यालयः-सदाशिवपरिसरः, पुरी, डॉ. स्नेहः बंसलः, *सहायिकाचार्या* विशेष-आवश्यकतासमूह-शिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नव-देहली विशिष्टच्छात्राणां कृते गतिविधीनां निर्माणे सहयोगं कृतवत्यौ तथा च डॉ. मनीषः शर्मा, *सहायकाचार्यः*, भाषाशिक्षाविभागः राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषद् पुनरीक्षणकार्ये सहायतां कृतवान्; एतदर्थं तेभ्यः धन्यवादाः प्रदीयन्ते।

*वरिष्ठशोध-सहायकः* श्रीबालमुकुन्दः, *कनिष्ठपरियोजनाध्येतारः* श्रीः विशालः त्यागी, श्रीः सूर्यप्रकाशः नौटियालः, सुश्रीः चाँदनी शर्मा, सुश्रीः शाश्वती भारद्वाजः, श्रीः मनीषः तथा च विविधासु प्रक्रियासु यथायोग्यं सहायतां दत्तवन्तः अतः तेभ्यः साधुवादाः समर्प्यन्ते।

© NCERT not to be republished

अस्य पुस्तकस्य अन्तिमस्य रूपस्य प्रदानाय प्रकाशनप्रभागं प्रति कृतज्ञतां ज्ञापयामः। पाठ्यपुस्तकस्य संपादने *सहायकसंपादिकां* (संविदा) पारुलः त्यागी, अलका दिवाकरः, *प्रूफरीडर* प्रति तथा च प्रकाशन-विभागे *डी.टी.पी. प्रकोष्ठस्य प्रभारिणं* पवनकुमार-बरियारं प्रति धन्यवादं प्रकटयामः। रा.शै.अ.प्र.प. इत्यस्य प्रकाशन-प्रभागे संविदारूपेण कार्यरताः *डी.टी.पी.-संचालकाः* विपनकुमारः शर्मा, बिट्टूकुमारः महतो, अनीता कुमारीः, मनोजकुमारः च, एतान् प्रति अपि धन्यवादान् समर्पयामः।

© NCERT not to be republished

# भारत का संविधान

भाग-3 (अनुच्छेद 12-35)
(अनिवार्य शर्तों, कुछ अपवादों और युक्तियुक्त निर्बंधन के अधीन)
द्वारा प्रदत्त

# मूल अधिकार

**समता का अधिकार**

- विधि के समक्ष एवं विधियों के समान संरक्षण;
- धर्म, मूलवंश, जाति, लिंग या जन्मस्थान के आधार पर;
- लोक नियोजन के विषय में;
- अस्पृश्यता और उपाधियों का अंत।

**स्वातंत्र्य-अधिकार**

- अभिव्यक्ति, सम्मेलन, संघ, संचरण, निवास और वृत्ति का स्वातंत्र्य;
- अपराधों के लिए दोष सिद्धि के संबंध में संरक्षण;
- प्राण और दैहिक स्वतंत्रता का संरक्षण;
- छः से चौदह वर्ष की आयु के बच्चों को निःशुल्क एवं अनिवार्य शिक्षा;
- कुछ दशाओं में गिरफ्तारी और निरोध से संरक्षण।

**शोषण के विरुद्ध अधिकार**

- मानव के दुर्व्यापार और बलात् श्रम का प्रतिषेध;
- परिसंकटमय कार्यों में बालकों के नियोजन का प्रतिषेध।

**धर्म की स्वतंत्रता का अधिकार**

- अंतःकरण की और धर्म के अबाध रूप से मानने, आचरण और प्रचार की स्वतंत्रता;
- धार्मिक कार्यों के प्रबंध की स्वतंत्रता;
- किसी विशिष्ट धर्म की अभिवृद्धि के लिए करों के संदाय के संबंध में स्वतंत्रता;
- राज्य निधि से पूर्णतः पोषित शिक्षा संस्थाओं में धार्मिक शिक्षा या धार्मिक उपासना में उपस्थित होने के संबंध में स्वतंत्रता।

**संस्कृति और शिक्षा संबंधी अधिकार**

- अल्पसंख्यक-वर्गों को अपनी भाषा, लिपि या संस्कृति विषयक हितों का संरक्षण;
- अल्पसंख्यक-वर्गों द्वारा अपनी शिक्षा संस्थाओं का स्थापन और प्रशासन।

**सांविधानिक उपचारों का अधिकार**

- उच्चतम न्यायालय एवं उच्च न्यायालय के निर्देश या आदेश या रिट द्वारा प्रदत्त अधिकारों को प्रवर्तित कराने का उपचार।

# भारत का संविधान

*भाग 4क*

# नागरिकों के मूल कर्तव्य

**अनुच्छेद 51 क**

**मूल कर्तव्य** – भारत के प्रत्येक नागरिक का यह कर्तव्य होगा कि वह –

(क) संविधान का पालन करे और उसके आदर्शों, संस्थाओं, राष्ट्रध्वज और राष्ट्रगान का आदर करे;

(ख) स्वतंत्रता के लिए हमारे राष्ट्रीय आंदोलन को प्रेरित करने वाले उच्च आदर्शों को हृदय में संजोए रखे और उनका पालन करे;

(ग) भारत की संप्रभुता, एकता और अखंडता की रक्षा करे और उसे अक्षुण्ण बनाए रखे;

(घ) देश की रक्षा करे और आह्वान किए जाने पर राष्ट्र की सेवा करे;

(ङ) भारत के सभी लोगों में समरसता और समान भ्रातृत्व की भावना का निर्माण करे जो धर्म, भाषा और प्रदेश या वर्ग पर आधारित सभी भेदभावों से परे हो, ऐसी प्रथाओं का त्याग करे जो महिलाओं के सम्मान के विरुद्ध हों;

(च) हमारी सामासिक संस्कृति की गौरवशाली परंपरा का महत्त्व समझे और उसका परिरक्षण करे;

(छ) प्राकृतिक पर्यावरण की, जिसके अंतर्गत वन, झील, नदी और वन्य जीव हैं, रक्षा करे और उसका संवर्धन करे तथा प्राणिमात्र के प्रति दयाभाव रखे;

(ज) वैज्ञानिक दृष्टिकोण, मानववाद और ज्ञानार्जन तथा सुधार की भावना का विकास करे;

(झ) सार्वजनिक संपत्ति को सुरक्षित रखे और हिंसा से दूर रहे;

(ञ) व्यक्तिगत और सामूहिक गतिविधियों के सभी क्षेत्रों में उत्कर्ष की ओर बढ़ने का सतत प्रयास करे, जिससे राष्ट्र निरंतर बढ़ते हुए प्रयत्न और उपलब्धि की नई ऊँचाइयों को छू सके; और

(ट) यदि माता-पिता या संरक्षक है, छह वर्ष से चौदह वर्ष तक की आयु वाले अपने, यथास्थिति, बालक या प्रतिपाल्य को शिक्षा के अवसर प्रदान करे।

# पाठानुक्रमणिका


| | | | पृष्ठाङ्काः |
|---|---|---|---|
| *पुरोवाक्* | | | *iii* |
| *भूमिका* | | | *v* |
| *सरस्वतीप्रार्थना* | | | *xviii* |
| १. | प्रथमः पाठः | सत्यं शिवं सुन्दरं संस्कृतम् | 1 |
| २. | द्वितीयः पाठः | सुखस्य मूलं धर्मः धर्मस्य मूलम् अर्थः | 9 |
| ३. | तृतीयः पाठः | आत्मवत्सर्वभूतेषु यः पश्यति सः पण्डितः | 22 |
| ४. | चतुर्थः पाठः | न खलु वयस्तेजसो हेतुः | 38 |
| ५. | पञ्चमः पाठः | एषा सा कृतकबुद्धिः मानवबुद्धेः सहकरी | 51 |
| ६. | षष्ठः पाठः | मनःपूतं समाचरेत् | 67 |
| ७. | सप्तमः पाठः | उपायं चिन्तयेत् प्राज्ञस्तथापायं च चिन्तयेत् | 79 |
| ८. | अष्टमः पाठः | अन्नाद् आनन्दं प्रति | 92 |
| ९. | नवमः पाठः | कृतं प्रतिकृतं भूयादेष धर्मः सनातनः | 112 |
| १०. | दशमः पाठः | *णमो अरिहन्ताणम्* | 127 |
| ११. | एकादशः पाठः | वर्णोच्चारण-शिक्षा २ | 145 |
| (क) | परिशिष्टम् १ | अन्वयः | 161 |
| (ख) | परिशिष्टम् २ | समासः | 167 |
| (ग) | परिशिष्टम् ३ | वाच्यम् | 177 |
| (घ) | परिशिष्टम् ४ | शब्दरूपाणि | 184 |
| (ङ) | परिशिष्टम् ५ | धातुरूपाणि | 199 |


© NCERT not to be republished

# सरस्वतीप्रार्थना

शुभ्रां स्वच्छविलेपमाल्यवसनां
शीतांशुखण्डोज्ज्वलाम्
व्याख्यामक्षगुणं सुधाढ्यकलशं
विद्यां च हस्ताम्बुजैः।
बिभ्राणां कमलासनां त्रिनयनां
वाग्देवतां सुस्मितां
वन्दे तां परमेश्वरीं भगवतीं
सिद्धिप्रदां **शारदाम्**॥



© NCERT not to be republished

## प्रथमः पाठः

# सत्यं शिवं सुन्दरं संस्कृतम्

0902CH01

संस्कृतं भारतदेशस्य सम्पदस्ति। अस्मिन् भारतीयानां ज्ञानवैभवं सञ्चितमस्ति। संस्कृताध्ययनेन मानवः सुसंस्कृतः भवति। भारतीयभाषाणां सुचारुरूपेण अध्ययनार्थं संस्कृतं नितराम् अपेक्षितम् अस्ति। संस्कृताध्ययनेन किं किं साधितं भवति इति विषयम् अधिकृत्य कविना सुन्दरं गीतं प्रस्तुतम्।





भारतीयैकतासाधकं संस्कृतम्
भारतीयत्वसम्पादकं संस्कृतम्
ज्ञानपुञ्जप्रभादर्शकं संस्कृतम्
सर्वदानन्दसन्दोहदं संस्कृतम्॥ १॥

सर्वमस्तिष्कसंस्कारकं संस्कृतम्
सर्ववाणीपरिष्कारकं संस्कृतम्
सत्पथप्रेरणादायकं संस्कृतम्
सद्गुणग्रामसन्धायकं संस्कृतम्॥ २॥




विश्वबन्धुत्वविस्तारकं संस्कृतम्
सर्वभूतैकताकारकं संस्कृतम्
सर्वतः शान्तिसंस्थापकं संस्कृतम्
पञ्चशीलप्रतिष्ठापकं संस्कृतम्॥ ३॥

त्यागसन्तोषसेवाव्रतं संस्कृतम्
विश्वकल्याणनिष्ठायुतं संस्कृतम्
ज्ञानविज्ञानसम्मेलनं संस्कृतम्
भुक्तिमुक्तिद्वयोद्वेलनं संस्कृतम्॥ ४॥



© NCERT not to be republished

धर्मकामार्थमोक्षप्रदं संस्कृतम्
ऐहिकामुष्मिकोत्कर्षदं संस्कृतम्
कर्मदं ज्ञानदं भक्तिदं संस्कृतम्
सत्यनिष्ठं शिवं सुन्दरं संस्कृतम्॥ ५ ॥

शब्दलालित्यलीलावनं संस्कृतम्
चारुमाधुर्यधारागृहं संस्कृतम्
विश्वचेतश्चमत्कारकं संस्कृतम्
पूर्वजानां यशः स्मारकं संस्कृतम्॥ ६ ॥



## भावार्थः

१. संस्कृतभाषा भारतीयानाम् ऐक्यं साधयति, भारतीयत्वं सम्पादयति, ज्ञानसमूहस्य प्रभां दर्शयति, सर्वदा आनन्दस्य परम्परामेव जनयति च।

२. संस्कृतं सर्वेषां जनानां मानसं शोधयति, वचनानि परिष्करोति, सन्मार्गं दर्शयति, सद्गुणानां समूहमेव उत्पादयति।

३. संस्कृतं विश्वबन्धुत्वं वर्धयति, सर्वेषां प्राणिनामपि ऐक्यं बोधयति, सर्वत्रापि शान्तिं प्रतिष्ठापयति, प्रसिद्धानां पञ्चानां शीलानां रीतिं गमयति।

४. त्यागस्य, हर्षस्य, सेवाबुद्धेश्च व्रतं, प्रपञ्चस्य मङ्गलमेव कर्तव्यम् इति ज्ञानं, विज्ञानञ्च सङ्गमनीयम् इति विचारः, भोगस्य मोक्षस्य च मार्गः च संस्कृतेन लभ्यः।

५. इहलोके परलोके च संस्कृतेन उत्कर्षः लभ्यते। धर्मस्य, कामानाम्, अर्थस्य, मोक्षस्यापि साधनानि संस्कृतेन लभ्यन्ते। भक्तिम् आचरितुं ज्ञानं प्राप्तुं कर्म कर्तुं च संस्कृतं साधनम्। अतः संस्कृतं सत्यं शिवं सुन्दरं च अस्ति।

६. ललितपद्यानि संस्कृतवने वृक्षाः इव सन्ति। अन्वेषकस्य संस्कृतं माधुर्यस्य सौन्दर्यस्य शीतलगृहमिव आह्लादकम् अस्ति। संस्कृतस्य श्रवणेन अखिलस्यापि प्रपञ्चस्य जनाः चमत्कारं लभन्ते। अत एव एतादृशं संस्कृतम् अस्माकं भारतीयानां पूर्वजैः सम्पादितस्य कीर्तिराशेः द्योतकम् अस्ति।

© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| आमुष्मिकम् (नपुं.प्र.ए.व.) | परलोकस्य | परलोक का | Of the other world | |
| उत्कर्षदम् (नपुं.प्र.ए.व.) | उत्कर्षं ददाति इति | उन्नति को देने वाली | Bestower of excellence | |
| उद्वेलनम् (उद् + √वेल + ल्युट्, नपुं.प्र.ए.व.) | उदयकृत् | उत्थान करने वाला | Awakene | |
| ऐहिकम् (नपुं.प्र.ए.व.) | इह लोके भवम्, संसारस्य | संसार का | Of this world | |
| कर्मदम् (नपुं.प्र.ए.व.) | कर्म ददाति इति | पुरुषार्थ को देने वाली | Bestower of righteous action | |
| चारु (नपुं.प्र.ए.व.) | सुन्दरम् | मनोहर | Beautiful | |
| परिष्कारकम् (नपुं.प्र.ए.व.) | संस्कारकम् | शुद्ध करने वाली | Refiner | |
| पुञ्जः (पुं.प्र.ए.व.) | राशिः | समूह | Clump | |
| प्रभा (स्त्री.प्र.ए.व.) | दीप्तिः | प्रकाश | Light | |
| भक्तिदम् (नपुं.प्र.ए.व.) | भक्तिं ददाति इति | भक्ति को देने वाली | Bestower of Bhakti | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| माधुर्यधारा (स्त्री.प्र.ए.व.) | माधुर्यस्य धारा इति | मधुर रस की धारा | Flow of Sweetness | |
| विस्तारकम् (नपुं.प्र.ए.व.) | विस्तारं करोति/ वितनोति यत् | विस्तार करने वाली | Expander | |
| लीलावनम् (नपुं.प्र.ए.व.) | लीलायाः वनम् | क्रीडा का उद्यान | Garden for play | |
| सत्पथः (पुं.प्र.ए.व.) | सन्मार्गः | सत्य मार्ग | Noble Path | |
| सन्दोहः (पुं.प्र.ए.व.) | समूहः | समूह | Group | |

## अत्र इदम् अवधेयम्

### कविकाव्यपरिचयः

वाराणस्यां विद्यमानस्य सार्वभौमसंस्कृतप्रचारकार्यालयस्य संस्थापकः पण्डितः वासुदेव-शास्त्रि-द्विवेदिमहाभागः गीतस्यास्य रचयिता। महाशयेन सरलसंस्कृतेन बहवो ग्रन्थाः विरचिताः, अपि च संस्कृतप्रचारार्थं विपुलं साहित्यं च प्रकाशितम्। *परमार्थसुधा* इति संस्कृतपत्रिका अपि एतेन सम्पाद्यते स्म। *सुरभारतीसन्देशः*, *स्वर्गीयसंस्कृतकविसम्मेलनं*, *भोजराज्ये संस्कृतसाम्राज्यं*, *कौत्सस्य गुरुदक्षिणा* चेत्यादयो ग्रन्थाः अस्य कृतिषु सुप्रसिद्धाः सन्ति।

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

**१. छात्राः मिलित्वा पृथक् पृथक् पञ्चानां छात्राणां लघुसमूहान् निर्माय यति-गति-लयपूर्वकं गीतगानस्य अभ्यासं करिष्यन्ति।**

**२. एकपदेन उत्तरं लिखत —**

**यथा** — ज्ञानपुञ्जप्रभादर्शकं किम्? ........ संस्कृतम् ........

(क) संस्कृतं कस्याः साधकम्? ................................

(ख) सर्वदा संस्कृतं कस्य सन्दोहदम्? ................................

(ग) संस्कृतं कस्य प्रेरणादायकम्? ................................

(घ) संस्कृतं कासां परिष्कारकम्? ................................

(ङ) कस्य विस्तारकं संस्कृतम्? ................................

**३. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत —**

(क) सर्वतः कस्याः संस्थापकं संस्कृतम्?

(ख) कीदृशं व्रतं संस्कृतम्?

(ग) कयोः सम्मेलनं संस्कृतम्?

(घ) संस्कृतं कस्य चमत्कारकम्?

(ङ) केषां यशः स्मारकं संस्कृतम्?

**४. रिक्तस्थानानि पूरयन्तु —**

**यथा** — ... सर्वभूतैकता ... -कारकं संस्कृतम्।

(क) ........................ सम्पादकं संस्कृतम्।

(ख) ........................ दर्शकं संस्कृतम्।

(ग) ........................ संस्कारकं संस्कृतम्।

(घ) कर्मदं ........................ भक्तिदं संस्कृतम्।

(ङ) सत्यनिष्ठं ........................ संस्कृतम्।

(च) शब्दलालित्य ........................ संस्कृतम्।

© NCERT not to be republished

## ५. मञ्जूषायाः पदानि उपयुज्य षड् वाक्यानि रचयत —

वाणीपरिष्कारिका, एकता, सर्वतः, सेवा, सुन्दरम्, पूर्वजानाम्, सत्पथे प्रेरयितुम्, विश्वकल्याणाय, त्यागस्य, सन्तोषस्य, विश्वबन्धुत्वविस्तारकम्

**यथा** — वाणीपरिष्कारिका संस्कृत-भाषा भवति।

(क) ..........

(ख) ..........

(ग) ..........

(घ) ..........

(ङ) ..........

(च) ..........

## ६. अधोलिखितानां समस्तपदानाम् उदाहरणानुसारं विग्रहं कुरुत —

**यथा** — भारतीयैकतासाधकम् — भारतीयैकतायाः साधकम्।

(क) ज्ञानपुञ्जप्रभादर्शकम् ..........

(ख) सर्ववाणीपरिष्कारकम् ..........

(ग) विश्वबन्धुत्वविस्तारकम् ..........

(घ) सर्वभूतैकताकारकम् ..........

(ङ) शान्तिसंस्थापकम् ..........

(च) ज्ञानविज्ञानसम्मेलनम् ..........

## ७. प्रदत्तमञ्जूषातः पर्यायपदानि चित्वा रिक्तस्थाने लिखत —

उल्लासः, किरणः, जगत्, अनुपमा, तेजोराशयः, मानम्

(क) विद्वांसः .......... भवन्ति।

(ख) सूर्यस्य .......... सर्वेषां प्राणिनां कृते हितकरः भवति।

© NCERT not to be republished

(ग) ईश्वरं स्मृत्वा ........................ उपजायते।

(घ) विद्यायाः ........................ अजरं भवति।

(ङ) प्रकृतेः शोभा ........................ विद्यते।

(च) यत्र ........................ एकनीडं भवति।

## ८. अधोलिखितानां मेलनं कुरुत —

| | |
|---|---|
| (क) भारतीयैकतायाः | १. विस्तारकम् |
| (ख) सत्पथे | २. साधकम् |
| (ग) त्यागसन्तोषसेवारूपम् | ३. दर्शकम् |
| (घ) ज्ञानपुञ्जप्रभायाः | ४. प्रेरणादायकम् |
| (ङ) विश्वबन्धुत्वस्य | ५. व्रतम् |



## स्वाध्यायान्मा प्रमदः

### पञ्चशीलं किम् ?

बौद्धधर्मे सदाचरणस्य परिपालनाय पञ्च शीलानि सन्ति। येषामाचरणं मनुष्याणाम् अत्यन्तं लाभाय अस्ति। तेषां विवरणमस्ति —

१. अस्तेयम्

२. अहिंसा

३. ब्रह्मचर्यम्

४. सत्यम्

५. मादकद्रव्याणां परिहारः।

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**
**संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।**
**वेदतत्त्वार्थसंजुष्टं लोकाऽऽलोककरं शिवम्॥**
**सत्याहिंसागुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।**
**विश्वशान्तिसुखाधात्री भारतीया हि संस्कृतिः॥**

© NCERT not to be republished

## यस्तु क्रियावान् मनुजः स विद्वान्

१. **"संस्कृताधारिता भारतीयैकता"** इति एतं विषयम् आधृत्य एका भाषणप्रतियोगिता आयोजनीया। शिक्षकः भाषणप्रतियोगितायां निम्नाङ्कितानां बिन्दूनां समावेशं करिष्यति।

| **अङ्कयोजना** | ५ | ४ | ३ | २ | १ |
|---|---|---|---|---|---|
| प्रवाहः | प्रवाहपूर्वकं संवादं करोति। | केषुचित् बिन्दुषु विरामं करोति परन्तु सः संचारं न बाधते। | केषुचित् बिन्दुषु विरामं करोति यः संचारं बाधते। | कदाचित् प्रायः विरामं करोति येन संचारः कठिनः भवति। | संचार एव न जायते। |
| शुद्धता | योग्यवाक्य-संरचना | अत्यल्पाः व्याकरण-दोषाः | नैमित्तिक-व्याकरण-दोषाः | त्रुटिपूर्ण-वाक्य-संरचनाः | वाक्य-संरचना एव न जायमाना अस्ति। |
| शब्दकोषः | प्रासंगिक-शब्दकोशस्य विविधतायाः उपयोगः | शब्दावल्यां विविधतायाः उपयोगः | प्रासङ्गिक–सीमित-शब्दकोशस्य उपयोगः | सीमितशब्द-कोशस्य उपयोगः | द्वित्राः एव शब्दाः प्रयुक्ताः |

२. विश्वबन्धुत्वभावनायाः विकासाय के मार्गाः अवलम्बनीयाः इति विषयमधिकृत्य सहपाठिभिः सह आलोचनां कुरुत।

© NCERT not to be republished

द्वितीयः पाठः

# सुखस्य मूलं धर्मः धर्मस्य मूलम् अर्थः




भारतीयधर्मशास्त्रेषु अनेकाः सूक्तयः विद्यन्ते, याः मानवजीवनस्य यथार्थतत्त्वं प्रतिपादयन्ति। तेष्वेकं प्रसिद्धं सूत्ररूपं वाक्यं कौटिल्यस्य *अर्थशास्त्रे* अस्ति—

**"सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः।"**

अस्य आशयः अस्ति यत् वास्तविकसुखस्य आधारः धर्मः, धर्मपालनस्य च आधारः अर्थः। अर्थः इत्युक्ते धनं, यत् सर्वविधस्य आजीविकाव्यवहारस्य प्रमुखं साधनम्।

जीवने धर्मः, अर्थः, सुखम् इत्येतेषां त्रयाणां परस्परसम्बन्धः अविच्छिन्नः अस्ति। यः जनः न्यायपूर्वकम् अर्थोपार्जनं करोति, सः धर्मपालनं कर्तुं समर्थः भवति, धर्मपालनेन च दीर्घकालिकं सुखं लभते।



सामान्यजीवने अन्नं, वस्त्रम्, आवासः, शिक्षा, स्वास्थ्यसेवा चेत्यादीनां मूलभूतानाम् आवश्यकतानां पूर्तये धनम् आवश्यकम्। पर्याप्तधनस्य अभावात् स्वकर्तव्यपालनं कठिनं भवति। स्वास्थ्यं, शिक्षा, सेवा, दानम् चेत्यादीनि कार्याणि बाधितानि भवन्ति। दैनन्दिनजीवनं च असन्तुलितं भवति। अतः धर्मशास्त्रे चतुर्वर्गेषु धर्मार्थकाममोक्षेषु अर्थः



© NCERT not to be republished

अन्यतमः स्तम्भः इति गण्यते। उक्तं *गरुडपुराणे*—

**"ब्राह्मे मुहूर्ते चोत्थाय धर्ममर्थं च चिन्तयेत्।"**

अर्थात् दिनस्य आरम्भे धर्मार्थयोः चिन्तनम् आवश्यकम्।

स्वस्थः आर्थिकव्यवहारः त्रिविधः भवति—

**न्यायपूर्णम् अर्थोपार्जनम्**—सन्मार्गेण एव धनार्जनं करणीयम् इति। उक्तं भगवता मनुना—

**सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्।**
**योऽर्थे शुचिर्हि सः शुचिर्न मृद्वारिशुचिः शुचिः॥**

अस्य आशयः यत् अनैतिकः आर्थिकव्यवहारः कदापि न करणीयः।

**"मा गृधः कस्यस्विद्धनम्"** इति उपनिषदः वाक्यं सततं मनसि निधाय स्वकौशलेन विद्यया च धनम् उपार्जनीयम्।

**औचित्यपूर्णः व्ययः**—आवश्यकतानुसारं व्ययः करणीयः। येन व्ययेन स्वास्थ्यलाभः विद्यार्जनम् आत्मसुरक्षा वा भवेत्, सः व्ययः अवश्यं करणीयः। आडम्बरपूर्णः प्रदर्शनकारी व्ययः अथवा विलासव्यसनाय व्ययः अपव्ययः भवति। अपव्ययः वर्जनीयः, अतः प्रत्येकं व्ययस्य लेखः स्थापनीयः। अन्ते च तेषां परिशीलनं करणीयम्।



**भविष्यदृष्ट्या सञ्चयः**—उपार्जितधनस्य कश्चन भागः भविष्यसुरक्षायै सञ्चयनीयः। सञ्चयस्य अभ्यासेन जनः स्वावलम्बी भवति। स्वावलम्बनं स्वाभिमानस्य मूलं वर्तते। संकटकालेऽपि स्वाभिमानिजनः अन्यजनस्य आर्थिकसहायतां नापेक्षते।

© NCERT not to be republished




- **छात्रजीवने आर्थिकसाक्षरता**

अनेकदा छात्राः मातापितृभ्यां कष्टार्जितधनस्य तुच्छकारणैः अपव्ययं कुर्वन्ति। जिह्वालालसापूर्त्यर्थं त्वरिताहारः, शीतपेयं, पुटीकृतभोजनं, तथैव व्यसनपदार्थानां सेवनं, प्रदर्शनकारिपरिधानं विलासितापूर्णम् आचरणं चेत्यादि यत्र प्रभूतः अपव्ययः भवति। एतैः न केवलं धनहानिः, स्वास्थ्यहानिरपि जायते। स्वास्थ्यहानिकारणात् पुनः धनव्ययो वर्धते।

**अर्जितस्य सञ्चयः सञ्चितस्य च निवेशः**

चाणक्यनीतौ उक्तम्—

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**
**स क्रमः सर्वविद्यानां धर्मस्य च धनस्य च॥**



लघु-लघुः सञ्चयोपि कालान्तरे महत्सम्पत्तिरूपेण वर्धते।

यदि छात्राः प्रतिदिनम् अल्पधनस्यापि सञ्चयं कुर्वन्ति, तस्य उचितनिवेशं च कुर्वन्ति तर्हि तेषां भविष्यं सुरक्षितं भवेत्। भारतदेशे धनसञ्चयस्य सुरक्षितनिवेशस्य च कृते बहुविधाः मार्गाः सन्ति। तेषु प्रधानमन्त्री-जनधनयोजना, सुकन्या-समृद्धि-योजना, सार्वजनिक-भविष्य-निधिः, वरिष्ठ-नागरिक-संचय-योजना, किसान-विकास-पत्रं, राष्ट्रिय-संचय-प्रमाणपत्रं, राष्ट्रिय-पेंशन-योजना, नियतनिक्षेपः, आवृत्तिनिक्षेपः चेत्याद्याः प्रमुखाः सन्ति। एतासां सर्वकारीययोजनानां विषये सूचनाः



© NCERT not to be republished

लब्धुं लाभमवाप्तुं च समीपस्थवित्तागाराः पत्रालयाः वा गन्तव्याः, तत्सम्बद्धाः अधिकारिणः च प्रष्टव्याः। एतासु योजनासु न केवलं कष्टार्जितधनस्य सुरक्षा भवति अपि तु चक्रवृद्ध्यंशेन सह तद्धनं सततं वर्धमानं भवति।




भौतिकतावादियुगस्य आकर्षणेन यूनामपव्ययः अधिको भवति येन कारणेन अस्माकम् आर्थिकस्थितिः विपन्ना भवति। किन्तु अर्थविषयकसचेतनता अस्मान् अभावात् उद्धृत्य आर्थिकसम्पन्नतां प्रति नयति। अतः बुद्धिमतां छात्राणां ध्येयं स्यात्—धनस्य उचितोपार्जनम्, व्ययस्य मर्यादा, आपत्कालीननिधिसञ्चयः, दीर्घकालीननिवेशश्च। यः एतेषाम् अनुशासनेन पालनं करोति, स एव यथार्थतः धनस्य धर्मस्य च सन्तोलनं स्थापयितुं शक्नोति। यः विद्यार्थी अद्य अर्थविषये जागरूकोऽस्ति, सः भविष्ये उत्तरदायी नागरिको भवति। धर्मः, अर्थः, सुखम् चेत्येतेषां सन्तोलनम् एव यथार्थजीवनस्य लक्षणम्। अत एवोक्तम्—

**क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्।**
**क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम्॥**

© NCERT not to be republished

# सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अपव्ययः (पुं.प्र.ए.व.) | व्यर्थव्ययः | अनुचित व्यय | Unnecessary expense | |
| अवाप्तुम् (अव + √आप् + तुमुन्, अव्ययम् ) | प्राप्तुम् | प्राप्त करने के लिए | To get | |
| अविच्छिन्नः (नञ् तत्पुरुषः, पुं.प्र.ए.व.) | न विच्छिन्नः | अटूट | Inseparable | |
| अर्जितस्य (√अर्ज् + क्त, पुं.ष.ए.व.) | उपार्जितस्य | कमाए हुए का | Of the earned | |
| अर्थोपार्जनम् (ष.तत्पुरुषः, नपुं.प्र.ए.व.) | अर्थस्य उपार्जनम् | धन कमाना | Earning | |
| आजीविका (स्त्री.प्र.ए.व.) | वृत्तिः | व्यवसाय | Livelihood | |
| आडम्बरपूर्णः (पुं.प्र.ए.व.) | पाखण्डयुक्तः | दिखावे से भरा | Ostentatious | |
| आर्थिकव्यवहारः (पुं.प्र.ए.व.) | धनविषयकः व्यवहारः | आर्थिक लेन-देन | Financial behavior | |
| आर्थिकसाक्षरता (कर्मधारयः स्त्री.प्र.ए.व.) | आर्थिकी साक्षरता | वित्तीय साक्षरता | Financial literacy | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| आवृत्तिनिक्षेपः (पुं.प्र.ए.व.) | आवृत्तिनिक्षेपः | आवर्ती जमा | Recurring Deposit (RD) | |
| उचितनिवेशम् (पुं.द्वि.ए.व.) | साधुनिवेशम् | योग्य निवेश | Proper investment | |
| उद्धृत्य (उद् + √धृ + ल्यप्) | उद्धारं कृत्वा | ऊपर उठाकर | By lifting up | |
| औचित्यपूर्णः (पुं.प्र.ए.व.) | समुचितः | उपयुक्त | Justified | |
| कष्टार्जितधनस्य (कर्मधारयः, नपुं.ष.ए.व.) | कष्टेन अर्जितम् कष्टार्जितम् कष्टार्जितं धनं, तस्य | कष्ट से कमाए हुए धन का | Of the wealth earned with difficulty | |
| कालान्तरेण (नपुं.तृ.ए.व.) | अन्यः कालः, तेन | समय बीतने पर | By the course of time | |
| किसान-विकास-पत्रम् (नपुं.प्र.ए.व.) | कृषकस्य विकासः किसानविकासः, तदर्थं पत्रम् | किसान विकास पत्र | Kisan Vikas Patra (KVP) | |
| चक्रवृद्ध्यंशेन (तृ.तत्पुरुषः, पुं.तृ.ए.व.) | चक्रवृद्ध्या अंशेन | चक्रवृद्धि ब्याज से | By Compound Interest | |
| तुच्छकारणैः (कर्मधारयः, नपुं.तृ.ब.व.) | तुच्छं कारणम्, तैः | निरर्थक कारणों से | For trivial reasons | |
| त्वरिताहारः (कर्मधारयः, पुं.प्र.ए.व.) | त्वरितः चासौ आहारः | शीघ्र आहार | Fast Food | |
| नियतनिक्षेपः (मध्यपद-लोपी कर्मधारयः, पुं.प्र.ए.व.) | नियतकालिकः निक्षेपः | निश्चित अवधि के लिए जमा | Fixed Deposit (FD) | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| न्यायपूर्णम् (तृतीया-तत्पुरुषः, नपुं.प्र.ए.व.) | न्यायेन पूर्णम् | न्यायसङ्गत | Justified | |
| पुटीकृतभोजनम् (कर्मधारयः, नपुं.प्र.ए.व.) | पुटीकृतं भोजनम् | डिब्बाबन्द खाना | Packaged food | |
| पूर्तये (स्त्री.च.ए.व.) | सम्पूर्तिनिमित्तम् | उपलब्ध कराने के लिए | To fulfill | |
| प्रदर्शनकारिपरिधानम् (कर्मधारयः, नपुं.प्र.ए.व.) | प्रदर्शनकारि परिधानम् | प्रदर्शनकारी वेशभूषा | Fashionable attire | |
| प्रभूतः (पुं.प्र.ए.व.) | प्रचुरम् | पर्याप्त | Abundant | |
| प्रधानमन्त्री-जन धन योजना (स्त्री.प्र.ए.व.) | प्रधानमन्त्री-जन धन योजना | प्रधानमन्त्री जन धन योजना | Pradhan Mantri Jana Dhana Yojna | |
| बाधितानि (नपुं.प्र.ब.व.) | अवरोधितानि | बाधित होते हैं | Interrupted | |
| मा (अ) गृधः (पुं.प्र.ए.व.) | लोभं न कुरु | लालच न करो | Don't covet | |
| मूलभूतानाम् (नपुं.ष.ब.व.) | मूले भूतम्, तेषाम् | मौलिक | Basic | |
| यथार्थतत्त्वम् (नपुं.प्र.ए.व.) | यथार्थं तत्त्वम् | वास्तविक तत्त्व | True essence | |
| राष्ट्रिय-पेंशन-योजना (स्त्री.प्र.ए.व.) | राष्ट्रिय-पेंशन-योजना | राष्ट्रीय पेंशन प्रणाली | National Pension System (NPS) | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| राष्ट्रिय-संचय-प्रमाणपत्रम् (नपुं.प्र.ए.व.) | राष्ट्रिय-संचय-प्रमाणपत्रम् | राष्ट्रीय बचत प्रमाणपत्र | National Savings Certificate (NSC) | |
| वरिष्ठ-नागरिक-संचय-योजना (स्त्री.प्र.ए.व.) | वरिष्ठ-नागरिक-संचय-योजना | वरिष्ठ नागरिक बचत योजना | Senior Citizens' Savings Scheme (SCSS) | |
| विलासव्यसनाय (नपुं.च.ए.व.) | विलासश्च व्यसनञ्च, तस्मै | सुख भोग के लिए | For luxury and enjoyment | |
| विपन्ना (स्त्री.प्र.ए.व.) | सम्पन्नतारहिता | संकटग्रस्त | Destitute | |
| शीतपेयम् (कर्मधारय, नपुं. प्र.ए.व.) | शीतं पेयम् | मृदु पेय | Soft Drinks | |
| शुचिः (पुं.प्र.ए.व.) | पवित्रः | शुद्ध | Clean | |
| सचेतनता (स्त्री.प्र.ए.व.) | विवेकः | जागरूकता | Consciousness | |
| सञ्चयः (पुं.प्र.ए.व.) | सङ्ग्रहः | संचय | Accumulation | |
| सन्तोलनम् (नपुं.प्र.ए.व.) | समन्वयः | सन्तुलित करना | Balance | |
| सुकन्या-समृद्धि-योजना (स्त्री.प्र.ए.व.) | सुकन्या-समृद्धि-योजना | सुकन्या समृद्धि योजना | Sukanya Samriddhi Yojna | |
| सूत्ररूपम् (नपुं.प्र.ए.व.) | संक्षेपरूपम् | संक्षिप्त रूप | Aphoristic form | |
| स्वावलम्बी (पुं.प्र.ए.व.) | आत्मनिर्भरः | स्वावलम्बी | Self-reliant | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

**चक्रवृद्ध्यंशः**

चक्रवृद्ध्यंशः तादृशः वृद्ध्यंशः वर्तते यस्मिन् मूलधनेन सह वृद्ध्यंशस्य उपरि अपि वृद्ध्यंशः अर्ज्यते। येन कालान्तरेण धनस्य वृद्धिः अतिशीघ्रं भवति।

**यथा** — यदि भवान् ₹1000 निवेशं करोति, तत्र 10% वार्षिकं वृद्ध्यंशम् अर्जयति तर्हि प्रथमवर्षस्य अन्ते भवान् आहत्य ₹1100 धनं प्राप्स्यति।

द्वितीयवर्षे ₹1000 इत्यस्य स्थाने ₹1100 राशेः उपरि वृद्ध्यंशं प्राप्स्यति।

अनेन द्वितीयवर्षस्य अन्ते भवतः राशिः आहत्य ₹1210 यावत् वर्धते।

चक्रवृद्ध्यंशः कथं कार्यं करोति ? इति अनया सारिण्या स्पष्टं भविष्यति —

| वर्षाणि | आरम्भिकधनम् | वार्षिकः वृद्ध्यंशः (10%) | चक्रवृद्ध्यंश-सहितं धनम् | साधारणवृद्ध्यंशेन सह धनम् |
|---|---|---|---|---|
| 1. | 1,000.00 | 100.00 | 1,100.00 | 1100 |
| 2. | 1,100.00 | 110.00 | 1,210.00 | 1200 |
| 3. | 1,210.00 | 121.00 | 1,331.00 | 1300 |
| 4. | 1,331.00 | 133.10 | 1,464.10 | 1400 |
| 5. | 1,464.10 | 146.41 | 1,610.51 | 1500 |
| 6. | 1,610.51 | 161.05 | 1,771.56 | 1600 |
| 7. | 1,771.56 | 177.16 | 1,948.72 | 1700 |
| 8. | 1,948.72 | 194.87 | 2,143.59 | 1800 |
| 9. | 2,143.59 | 214.36 | 2,357.95 | 1900 |
| 10. | 2,357.95 | 235.80 | 2,593.74 | 2000 |

**सारः** —

- निवेशितं मूलधनम् — 1,000
- वार्षिकः चक्रवृद्ध्यंशः — 10%
- दशवर्षानन्तरं धनस्य मूल्यम् — 2,593.74

© NCERT not to be republished

**निगमनम्**—अनेन इदं सिद्धं यत् चक्रवृद्ध्या निवेशितं धनं शीघ्रं वर्धते यतोहि निवेशकर्ता न केवलं स्वस्य मूलधनस्य अपितु अर्जितवृद्ध्यंशस्य अपि उपरि वृद्ध्यंशम् अर्जयति। दीर्घकालीनसञ्चयस्य निवेशस्य च कृते एतत् किञ्चन सुशक्तं साधनमस्ति।

**गणनाकार्यम् (छात्राः कुर्वन्तु)**—उपर्युक्तगणनायाः आधारेण ₹1000 निवेशितस्य मूलधनस्य पञ्चदशवर्षेषु विंशतिवर्षेषु वा चक्रवृद्ध्या सकलधनराशेः परिमाणं लिखत।

## अभ्यासाद् जायते सिद्धिः

**१. एकपदेन उत्तरं लिखत—**

(क) वास्तविकसुखस्य आधारः कः? ..........................

(ख) कस्य अभावात् स्वकर्तव्यपालनं कठिनं भवति? ..........................

(ग) स्वस्थः आर्थिकव्यवहारः कतिविधः भवति? ..........................

(घ) कीदृशः आर्थिकव्यवहारः कदापि न करणीयः? ..........................

(ङ) स्वावलम्बनं कस्य मूलं वर्तते? ..........................

(च) जलबिन्दुनिपातेन क्रमशः किं पूर्यते? ..........................

**२. पूर्णवाक्येन उत्तरं लिखत—**

(क) "सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः" इतीदं प्रसिद्धं वाक्यं कस्मिन् ग्रन्थे प्राप्यते?

..........................................................................................

(ख) सामान्यजीवने कासाम् आवश्यकतानां पूर्त्यर्थं धनम् आवश्यकम्?

..........................................................................................

(ग) ब्राह्मे मुहूर्ते कयोः चिन्तनम् आवश्यकम्?

..........................................................................................

© NCERT not to be republished

(घ) जनः केन स्वावलम्बी भवति?

..............................................................................................

(ङ) लघुलघुसञ्चयः अपि कालान्तरे केन रूपेण वर्धते?

..............................................................................................

**३. वाक्येन सह ग्रन्थस्य सम्मेलनं कुरुत—**

| | |
|---|---|
| (क) जलबिन्दुनिपातेन क्रमशः पूर्यते घटः। | १. *गरुडपुराणम्* |
| (ख) ब्राह्मे मुहूर्ते चोत्थाय धर्ममर्थं च चिन्तयेत्। | २. *मनुस्मृतिः* |
| (ग) सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्। | ३. *अर्थशास्त्रम्* |
| (घ) सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः। | ४. *चाणक्यनीतिः* |

**४. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत—**

(क) सुखस्य मूलं धर्मः।

..............................................................................................

(ख) दिनस्य आरम्भे धर्मार्थयोः चिन्तनम् आवश्यकम्।

..............................................................................................

(ग) सन्मार्गेण एव धनार्जनं करणीयम्।

..............................................................................................

(घ) अनैतिकः आर्थिकव्यवहारः कदापि न करणीयः।

..............................................................................................

(ङ) संकटकाले स्वाभिमानिजनः अन्यजनस्य आर्थिकसहायतां नापेक्षते।

..............................................................................................

**५. उचितैः पदैः रिक्तस्थानानि पूरयत—**

| विद् | विद्यते | विद्येते | विद्यन्ते |
|---|---|---|---|
| लभ् | ........................ | लभेते | लभन्ते |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| अपेक्ष् | अपेक्षते | ........................ | अपेक्षन्ते |
| वर्ध् | ........................ | वर्धेते | ........................ |
| सेव् | ........................ | ........................ | सेवन्ते |
| मोद् | मोदते | ........................ | ........................ |

**६. अधोलिखितानां प्रश्नानां शुद्धं विकल्पं चिनुत—**

(क) "सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः" इत्यस्य मुख्य आशयः कः अस्ति?

(१) सुखस्य आधारः केवलम् अर्थः एव।

(२) धर्मस्य आधारः केवलं सुखम् एव।

(३) धर्मस्य आधारः अर्थः, सुखस्य आधारः धर्मः।

(४) सुखं, धर्मः, अर्थः – एतेषां मध्ये सम्बन्धः नास्ति।

(ख) *गरुडपुराणे* किम् उपदिष्टम् अस्ति?

(१) रात्रौ धनस्य चिन्तनं करणीयम्।

(२) प्रभाते धर्मार्थयोः चिन्तनं करणीयम्।

(३) केवलं धर्मचिन्तनं करणीयम्।

(४) केवलम् अर्थचिन्तनं करणीयम्।

(ग) "सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्" इत्यस्य तात्पर्यं किम्?

(१) जलशौचमेव श्रेष्ठम्।

(२) मृद्वारिशौचमेव श्रेष्ठम्।

(३) अर्थशौचं सर्वोपरि, अन्यविधशौचेभ्यः श्रेयः।

(४) शौचस्य आवश्यकता नास्ति।

(घ) छात्रैः क्रियमाणः अपव्ययः कः?

(१) स्वास्थ्यलाभाय व्ययः।

(२) विद्यार्जनाय व्ययः।

not to be republished © NCERT

(३) आडम्बरयुक्तः प्रदर्शनात्मकः व्ययः।

(४) आत्मसुरक्षायै व्ययः।

(ङ) "जलबिन्दुनिपातेन क्रमशः पूर्यते घटः" इति वाक्यं कः अवदत्?

(१) बृहस्पतिः (२) चाणक्यः

(३) मनुः (४) याज्ञवल्क्यः

## स्वाध्यायान्मा प्रमदः

**छात्राः** अभिभावकैः सह समीपस्थं वित्तकोषम् अथवा पत्रालयं गत्वा प्रधानमन्त्री-जनधनयोजना (PMJDY), सुकन्या-समृद्धि-योजना (SSY), सार्वजनिक-भविष्य-निधिः (PPF), वरिष्ठ-नागरिक-संचय-योजना (SCSS), किसान-विकास-पत्रम् (KVP), राष्ट्रिय-संचय-प्रमाणपत्रम् (NSC), राष्ट्रिय-पेंशन-योजना (NPS), नियतनिक्षेपः (FD), आवृत्तिनिक्षेपः (RD) चेत्यादियोजनानां विषये ज्ञानं प्राप्नुयुः। एकस्याः योजनायाः विषये टिप्पणीं च लिखेयुः।

© NCERT not to be republished

## यस्तु क्रियावान् मनुजः स विद्वान्

१. अस्मिन् पाठे पठितानां सूक्तीनां श्लोकानां च आशयं स्वभाषया विलिख्य शिक्षकाय दर्शयत।

२. भवन्तः स्वजीवने अपव्ययात् कथं दूरे स्थातुं शक्नुवन्ति? अस्मिन् विषये उपायान् लिखत।

३. स्वस्य एकस्य मासस्य आय-व्ययविवरणं विलिख्य शिक्षकाय दर्शयत।

४. जलस्य संरक्षणं कैः उपायैः करणीयमिति कक्षायां चर्चयत सचित्रं प्रदर्शयत च।

५. विद्युतः संरक्षणं कथं कर्तुं शक्यते तस्य चित्रं निर्माय शिक्षकाय दर्शयत।

तृतीयः पाठः

# आत्मवत्सर्वभूतेषु यः पश्यति सः पण्डितः

0802CH03



भारतदेशः बहूनां ब्रह्मर्षीणां महात्मनां च भूमिः। तेषां चरित्राणि सकलस्य विश्वस्य कृते प्रेरणास्पदम्। तेषां चरित्रेषु प्रतिपदं भूतदया, समता, क्षमा, अहिंसा, करुणा, ऋजुता, बन्धुता चेत्यादीनि जीवनमूल्यानि प्राप्यन्ते। महाराष्ट्रस्य प्रसिद्धः महात्मा नामदेवमहाराजः स्वीयव्यवहारेण करुणायाः महान्तम् आदर्शम् उपस्थापितवान्। सः सर्वात्मकस्य ईश्वरस्य न केवलं सङ्कीर्तनं कृतवान् अपि तु सर्वेषु जीवेषु सः भगवन्तं दृष्टवान्। नामदेवमहाराजस्य जीवनस्य काचित् शिक्षाप्रदा घटना अत्र प्रदर्शिता अस्ति यां पठित्वा अस्माकं जीवनं परिवर्तितं भवेत्।

कपिलः माधवी च अवकाशकाले मातुलगृहं गतवन्तौ। तत्र क्रीडावेलायां कञ्चन शुनकं दृष्टवन्तौ। तं दृष्ट्वा पाषाणखण्डं हस्ते स्वीकृत्य तं मारयितुं धावितवन्तौ। शुनकः भयेन आक्रोशं कुर्वन् वेगेन धावितवान्। तत् दृष्ट्वा कपिलः माधवी च उच्चैः हसितवन्तौ। मातामही तं प्रसङ्गं दूरात् दृष्टवती, तौ आहूतवती च।



© NCERT not to be republished

**मातामही** भोः कपिल ! माधवि ! किं कुरुतः ?

**कपिलः** मातामहि ! पश्यतु किल। सः शुनकः आवयोः क्रीडायां मध्ये मध्ये प्रविश्य आवां पीडयति स्म। अतः आवां तं सम्यक् दण्डितवन्तौ। *(पुनः उच्चैः हसितवन्तौ)*

**मातामही** वत्सौ, अधुना क्रीडया अलम्। कथां श्रोतुम् इच्छतः वा ?

**उभावपि** मातामह्याः कथा ! रोचते मे कथा ...
रोचते मे मातामही।
*(मातामहीम् आलिङ्गितवन्तौ)*



**मातामही** उपविशताम् , सावधानेन शृणुतां च। अस्माकं भारतभूमिः अनेकेषां नररत्नानां ब्रह्मर्षीणां राजर्षीणां च प्रसवित्री। बहवः सत्पुरुषाः स्वीयकर्तृत्वेन जन्म सार्थकं कृतवन्तः। किं भवन्तौ महात्मानं नामदेवं जानीतः ?

**माधवी** आम्। अहं श्रुतवती यत् तस्य कीर्तने स्वयं देवः पाण्डुरङ्गः नृत्यं कृतवान् इति। अपि सत्यम् ?

**मातामही** आम्। तस्यैव पुण्यश्लोकस्य पाण्डुरङ्गमित्रस्य नामदेवमहाराजस्य एषा कथा। नामदेवः न केवलं पाण्डुरङ्गस्य प्रियभक्तः अपि तु प्रियमित्रमपि। देवः नामदेवं परितः भवति स्म।

**माधवी** किं सत्यमेव नामदेवस्य मित्रम् आसीत् पाण्डुरङ्गः ?

**कपिलः** किं देवेन सह अपि मित्रता सम्भवति ?

**मातामही** आम् वत्सौ। देवः पाण्डुरङ्गः नामदेवस्य प्रियसुहृदासीत्। नामदेवः प्रतिदिनं पाण्डुरङ्गाय नैवेद्यं समर्प्य, तं भोजयित्वा ततः परमेव अन्नं सेवते स्म। तस्य गुरुः आसीत् विसोबा। विसोबा तम् अध्यापितवान्

© NCERT not to be republished

यत् 'ईश्वरः न केवलं मन्दिरे भवति, अपि तु सर्वेषु भूतेषु तस्य निवासो भवति। अतः तस्य सर्वात्मकस्य ईश्वरस्य पूजनं कुरु' इति।

**कपिलः** मातामहि ! किं सत्यमेव ईश्वरः सर्वेषु भूतेषु निवसति ?

**मातामही** आम्, शृणु वत्स ! नामदेवः प्रतिदिनम् अतीवश्रद्धया निष्ठया भक्त्या च नैवेद्यस्थालिकाम् आदाय मन्दिरं गच्छति स्म। एकदा सः नैवेद्यस्थालिकां गृहीत्वा विग्रहस्य पुरतः स्थापितवान्। नेत्रे निमील्य प्रार्थनां कृतवान्—



नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु।
ईप्सितं मे वरं देहि परत्र च परां गतिम्॥
शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च।
आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्॥

मन्त्रम् उच्चार्य श्रद्धया प्रणम्य सः नेत्रे उद्घाटितवान्।

अहो आश्चर्यम् ! पुरतः स्थितायां स्थालिकायां रोटिका नासीत्।

**माधवी** पाण्डुरङ्गः आगत्य भक्षितवान् किल ?

**मातामही** न हि। कश्चन बुभुक्षितः शुनकः आगत्य रोटिकां मुखे गृहीत्वा धावितवान्।

**कपिलः** धिक् शुनकम् ! मातामहि ! पश्यतु, शुनकाः दुष्टाः एव भवन्ति।

**माधवी** सत्यं भ्रातः ! नामदेवस्य कियत् दुःखं जातं स्यात् खलु।

**मातामही** पुत्रकौ, शृणुताम्। नामदेवः शुनकस्य पृष्ठे अनुधावितवान्। जानीतः किमर्थं कथं च ?

© NCERT not to be republished



**कपिलः** क्रोधेन लगुडम् आदाय शुनकं ताडयितुं धावितवान् स्यात् !

**माधवी** दण्डयितुं पाषाणखण्डम् आदाय धावितवान् स्यात् ! सत्यं किल मातामहि !

**मातामही** न हि बालौ ! नामदेवः कोपेन न धावितवान्, प्रत्युत सः करुणया धावितवान्। न लगुडं, न पाषाणखण्डम्, अपि तु घृतपात्रं धृत्वा।

**उभावपि** *(साश्चर्यम् उच्चैः)* किं घृतपात्रम् आधृत्य ?

**मातामही** आम्, घृतपात्रम् आधृत्य एव।

**उभौ** किन्तु किमर्थम् ?

**मातामही** जातौ, शुनकः शुष्करोटिकाम् अपहृत्य पलायितवान् खलु। महात्मनः नामदेवस्य चिन्ता आसीत् यत् यदि शुनकः शुष्करोटिकां खादेत् तर्हि तस्य उदरवेदना भवेत् इति। अतः तस्य पीडा मा भवतु इति चिन्तयन् घृतपात्रम् आदाय 'हे देव! शुष्कां रोटिकां

© NCERT not to be republished

मा खादतु, घृतम् अपि स्वीकरोतु' इति वदन् अनुधावितवान् सः।

*(उभौ परस्परं पश्यतः। अपराधभावनया तयोः मुखे म्लाने आस्ताम्।)*



**मातामही** धावन् शुनकः अदृश्यः जातः। तस्य स्थाने पाण्डुरङ्गः आविर्भूतः। स नामदेवम् उक्तवान् — 'वत्स नामदेव! उत्तीर्णः भवान् परीक्षाम्। 'ईश्वरः सर्वेषु भूतेषु निवसति' इति गुरूपदेशं न केवलं भवान् श्रुतवान् अपि तु अनुपालितवान्। सुतरां धन्यो भवान्।

**कपिलः** मातामहि! अहं प्रमादं कृतवान्। अकारणं हि शुनकं ताडितवान्। इतः पूर्वमपि बहुवारं जीवान् पीडितवान्। अद्य अहं ज्ञातवान् यत् सर्वेषु जीवेषु ईश्वरः निवसति, अतः कमपि न पीडयिष्यामि इति।

**माधवी** मातामहि! क्षाम्यतु माम्। अहमपि कदापि कस्यापि पीडां न जनयिष्यामि।



**मातामही** चिरञ्जीविनौ! मां निकषा आगच्छताम्। *(आलिङ्गनं कृत्वा)* अस्माकं कायेन वाचा मनसा वा कस्यापि पीडा न भवेत्। तथैव कस्यापि या कापि पीडा स्यात् तां निवारयितुं प्रयतामहे इति सङ्कल्पं कुर्मः। इदमस्तु अस्माकं ध्येयम् —

**'आत्मवत्सर्वभूतेषु यः पश्यति**
**स पण्डितः।'**

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अनुधावितवान् (अनु + √धाव् + क्तवतु, पुं.प्र.ए.व.) | पृष्ठतः अधावत् | पीछे दौड़ा | Chased | |
| अनुपालितवान् (अनु + √पाल् + क्तवतु, पुं.प्र.ए.व.) | अनुसरणम् अकरोत् | पालन किया | Followed | |
| अपहृत्य (अप + √हृ + ल्यप्, अव्ययम्) | चोरयित्वा | चुराकर | Having stolen | |
| आविर्भूतवान् (आविस् + √भू + क्तवतु, पुं.प्र.ए.व.) | प्रत्यक्षीभूतः | प्रकट हुए | Appeared | |
| आलिङ्गनं कृतवन्तौ (√कृ + क्तवतु, पुं.प्र.द्वि.व.) | आश्लिष्टौ | दोनों गले मिले | Hugged | |
| ऋजुता (स्त्री.प्र.ए.व.) | सरलता | सीधापन | Simplicity | |
| करुणया (स्त्री.तृ.ए.व.) | दयया | दया से | With mercy | |
| कायः (पुं.प्र.ए.व.) | देहः | शरीर | Body | |
| घृतम् (नपुं.प्र.ए.व.) | हविः | घी | Clarified butter | |
| दण्डितवन्तौ (√दण्ड् + क्तवतु, पुं.प्र.द्वि.व.) | दण्डं दत्तवन्तौ | दण्ड दिया | Punished | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| नैवेद्यम् (नपुं.प्र.ए.व.) | देवाय समर्पयितुं निर्मितः पदार्थः | भोग | Offering to God | |
| निकषा (अव्ययम्) | समीपे | पास | Near | |
| निमील्य (नि + √मिल् + ल्यप्) | पिधाय | बंद करके | Having closed | |
| पाषाणखण्डम् (पुं.द्वि.ए.व.) | शिलाखण्डम् | पत्थर का टुकड़ा | Piece of Stone | |
| पुण्यश्लोकः (पुं.प्र.ए.व.) | पुण्यः श्लोकः (चरितं) यस्य सः | पवित्र चरित्रवाला | Virtuous character | |
| प्रसवित्री (स्त्री.प्र.ए.व.) | जनयित्री | जन्म देने वाली | One who gives birth | |
| ब्रह्मर्षीणाम् (पुं.ष.ब.व.) | ब्रह्मज्ञानिनाम् ऋषीणाम् | ब्रह्म को जानने वाले ऋषियों का | Of Seers of Brahman | |
| बुभुक्षितः (पुं.प्र.ए.व.) | क्षुधार्तः | भूखा | Hungry | |
| भक्षितवान् (√भक्ष्+क्तवतु, पुं.प्र.ए.व.) | खादितवान् | खाया | Ate | |
| मातुलः (पुं.प्र.ए.व.) | मातुः भ्राता | मामा | Maternal uncle | |
| म्लाने (नपुं.प्र.द्वि.व.) | कान्तिहीने | कुम्हलाया | Withered | |
| लगुडम् (पुं.द्वि.ए.व.) | दण्डम् | लाठी | Stick | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| शिक्षाप्रदा (उपपदतत्पुरुषः, स्त्री.प्र.ए.व.) | शिक्षां प्रददाति इति | सीख देने वाली | Which imparts education | |
| सुहृत् (पुं.प्र.ए.व.) | सखा | मित्र | Friend | |

## अत्र इदम् अवधेयम्

**उपपदविभक्तयः**

उप इत्यस्य अर्थः सामीप्यम् इति। समीपस्थं पदम् आश्रित्य जायमाना विभक्तिः उपपदविभक्तिः इति कथ्यते।

(क) **'प्रति' इति शब्दस्य अर्थः आभिमुख्यम् इति। प्रति-शब्दयोगे द्वितीया विभक्तिः भवति। अतः प्रति-शब्दयोगे मन्दिर इति शब्दस्य द्वितीया।**

**यथा** — नामदेवः प्रतिदिनं **मन्दिरं प्रति** गच्छति स्म।
बालः सदा **मातरं प्रति** धावति।

(ख) **'विना' इति पदस्य योगे द्वितीया, तृतीया पञ्चमी चेति विभक्तयः भवन्ति।**

**यथा** — अहं **कारणं विना** शुनकं ताडितवान्।
अहं **कारणेन विना** शुनकं ताडितवान्।
अहं **कारणात् विना** शुनकं ताडितवान्।

(ग) **'धिक्' इति शब्दः निन्दावाचकः। धिक् इति शब्दस्य योगे द्वितीया विभक्तिः भवति।**

**यथा** — धिक् शुनकम्।
धिक् दुर्जनम्।

(घ) **'निकषा' इति शब्दस्य अर्थः समीपम् इति। निकषा इति शब्दस्य योगे द्वितीया विभक्तिः भवति।**

**यथा** — कपिलः **मातामहीं निकषा** आगतवान्।
केशवस्य गृहं **पाठशालां निकषा** अस्ति।

© NCERT not to be republished

(ङ) **'परितः' इति शब्दस्य अर्थः परिवृत्य / सर्वस्मिन् पार्श्वे इति। परितः इति शब्दयोगे द्वितीया विभक्तिः भवति।**

**यथा—** **देवं परितः** भक्ताः सन्ति।
**शिक्षकं परितः** छात्राः भवन्ति।

(च) **'सह, साकं, सार्धं, समम्' इति शब्दानां योगे तृतीया विभक्तिः भवति।**

**यथा—** माधवी **कपिलेन सह** भ्रमति।
**जनकेन सह** पुत्री क्रीडति।
त्वं **मित्रेण साकं** धावसि।
सः **पित्रा सार्धम्** आगच्छति।
रामः **लक्ष्मणेन समं** वनं गच्छति।
अहम् **अनुजेन साकं** ग्रामं गच्छामि।

(छ) **'अलम्' इति शब्दस्य योगेऽपि तृतीया विभक्तिः भवति।**

**यथा—** **अलं** क्रीडया।
**अलं** विस्तरेण।
**अलम्** आलस्येन।
**अलं** कलहेन।
**अलं** क्रोधेन।

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत —**

(क) मातामही कस्य कथां श्रावितवती?

(ख) नामदेवस्य गुरुः नामदेवं किम् अध्यापितवान्?

(ग) नामदेवः कया भावनया धावनं कृतवान्?

(घ) बालकयोः मुखे किमर्थं म्लाने संजाते?

(ङ) कपिलः माधवी च कं सङ्कल्पं कृतवन्तौ?

(च) तं दृष्ट्वा पाषाणखण्डं स्वीकृत्य मारयितुं धावितवन्तौ इति वाक्ये 'तम्' इति सर्वनामशब्दः कस्य कृते प्रयुक्तः?

(छ) कपिलः माधवी च कुत्र गतवन्तौ?

(ज) 'मातामही तं प्रसङ्गं दृष्टवती, तौ आहूतवती च'। इति वाक्ये 'तौ' इति शब्दः कस्यां विभक्तौ अस्ति?

**२. अधोलिखितानि वाक्यानि भूतकालेन परिवर्त्य पुनः लिखत —**

**यथा** — **नामदेवः** स्थालिकां स्वीकृत्य मन्दिरं गच्छति।

**नामदेवः** स्थालिकां स्वीकृत्य मन्दिरं गतवान्।

(क) नैवेद्यं विग्रहस्य पुरतः स्थापयति।

(ख) नेत्रे निमील्य प्रार्थनायाः आरम्भं करोति।

(ग) गुरुः विसोबा तम् अध्यापयति।

(घ) अहं शृणोमि।

(ङ) सत्पुरुषाः स्वकर्तृत्वेन जन्म सार्थकं कुर्वन्ति।

(च) नामदेवः शुनकस्य पृष्ठे अनुधावति।

**३. अधोलिखितानि कथनानि कः/का/कं/कां च प्रति कथयति इति लिखत —**

| | (कः/का | – कं/कां प्रति) |
|---|---|---|
| **यथा** — हे देव! शुष्कां रोटिकां न खादतु घृतमपि स्वीकरोतु। | नामदेवः | शुनकम् |
| (क) कथां श्रोतुम् इच्छतः वा? | ................ | ................ |
| (ख) अहं श्रुतवती यत् तस्य कीर्तने स्वयं देवः पाण्डुरङ्गः नृत्यं कृतवान् इति। | ................ | ................ |
| (ग) किं देवेन सह अपि मित्रता सम्भवति? | ................ | ................ |
| (घ) अतः तस्य सर्वात्मकस्य ईश्वरस्य पूजनं कुरु। | ................ | ................ |



© NCERT not to be republished

(ङ) नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु। ................ ................

(च) धिक् शुनकम्। ................ ................

(छ) नामदेवस्य कियत् दु:खं जातं स्यात् खलु? ................ ................

(ज) किं घृतपात्रम् आधृत्य? ................ ................

(झ) अद्य अहं ज्ञातवान् यत् सर्वेषु ईश्वरः निवसति इति। ................ ................

(ञ) उत्तीर्णः भवान् परीक्षाम्। ................ ................

## ४. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत —

**यथा** — पाण्डुरङ्ग: नामदेवस्य मित्रम् आसीत्।

पाण्डुरङ्ग: कस्य मित्रम् आसीत्?

(क) देवः नामदेवं परितः भवति स्म।

..........................................................................................

(ख) ईश्वरः सर्वेषु भूतेषु निवसति।

..........................................................................................

(ग) शुनकः आगत्य मुखे रोटिकां धृत्वा धावितवान्।

..........................................................................................

(घ) शुनकस्य स्थाने पाण्डुरङ्गः आविर्भूतवान्।

..........................................................................................

(ङ) आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।

..........................................................................................

© NCERT not to be republished

५. **घटनाक्रमानुसारं लिखत —**

(क) नामदेवः मन्त्रम् उच्चार्य श्रद्धया प्रणम्य नेत्रे उद्घाटितवान्।

(ख) नामदेवः घृतपात्रम् आधृत्य अनुधावितवान्।

(ग) नामदेवः नैवेद्यस्थालिकां विग्रहस्य पुरतः स्थापितवान्।

(घ) शुनकः शुष्करोटिकाम् अपहृत्य पलायितवान्।

(ङ) शुनकस्य स्थाने पाण्डुरङ्गः आविर्भूतवान्।

(च) नामदेवः मन्दिरं गतवान्।

६. **कोष्ठकेषु दत्तानां पदानाम् उचितां विभक्तिं योजयित्वा अनुच्छेदं पूरयत —**

**आगच्छन्तु , पायसं कुर्मः**

आगच्छन्तु , पायसं कुर्मः। ...................... (क्षीर) सह तण्डुलाः पक्वाः। ...................... (शर्करा) विना कथं शक्यते। शीघ्रमेव ...................... (आपण) प्रति गत्वा शर्कराम् आनयतु। ...................... (आपण) निकषा वाहनानि तिष्ठन्ति। शर्करा महानसे स्थापिता। ...................... (शर्करा) परितः पिपीलिकाः आगताः। पिपीलिकाः अपनीय पायसे शर्करा योजिता। ...................... (मधुर) विना पायसं रुचिकरं न भवति। अधुना ...................... (पायस) परितः बालक-बालिकावृन्दं तिष्ठति। धिक् ...................... (अन्ये मधुरपदार्थाः) इति एकः वदति, ...................... (तत्) विना जीवनम् अपूर्णम् इति अपरः। ...................... (पायस) सह एव भोजनं सरसम् इति अन्यः। तेषां वचनानि श्रुत्वा पायसं यच्छन्त्याः अम्बायाः मुखे मन्दहासः विलसति।

७. **अनुच्छेदे स्थूलाक्षरेण दत्तानां क्रियापदानां स्थाने उचितं क्तवतुप्रत्ययान्तरूपं योजयित्वा पुनः लिखत —**

कञ्चित् ग्रामं निकषा एका नदी आसीत्। नदी सर्वदा स्वच्छजलम् **अददात्**। जनाः तस्याः जलं पीत्वा सुखेन **अजीवन्**। एकः कृषकः तेन



© NCERT not to be republished

जलेन सर्वदा कृषिम् **अकरोत्**। कालान्तरम् अन्ये कृषकाः अपि तेन जलेन क्षेत्रसेचनम् **अकुर्वन्**। महिलाः पर्वसमये नदीम् **अपूजयन्**। एकवारं कश्चित् परिवारः नद्यां मालिन्यानि **अक्षिपत्**। क्रमशः अन्ये अपि **अक्षिपन्**। तेन नदी मलिना अभवत् , मीनाः **अम्रियन्त**। स्त्रियः रोगैः पीडिताः **अभवन्**। तदा एका शिक्षिता बालिका जलस्य महत्त्वं सर्वान् **अवदत्**। सा नदीतीरम् आगत्य स्वयं वृक्षम् **अरोपयत्**। महिलाः अपि ततः प्रेरणां प्राप्य तस्याः साहाय्यम् **अकुर्वन्**। सर्वे ग्रामवासिनः मिलित्वा नदीम् **अशोधयन्**। पुनः नदी स्वच्छा जाता निर्मलं जलं च **अददात्**। ततः आरभ्य वर्षे एकवारं जनाः नदीम् **अपूजयन्** वृक्षरोपणं च **अकुर्वन्**।

## ८. एतेषां समस्तपदानि पाठात् चित्वा लिखत—

**यथा**— महान् आत्मा, तेषां ............ महात्मनाम् ............

(क) घृतस्य पात्रम्, तत् ............................................

(ख) पाषाणस्य खण्डः, तम् ............................................

(ग) प्रियः सुहृद् ............................................

(घ) उदरे वेदना ............................................

(ङ) स्वीयः व्यवहारः ............................................

(च) जीवनस्य मूल्यानि ............................................

(छ) मातुलस्य गृहम्, तत् ............................................

(ज) नरेषु रत्नानि इव, तेषाम् ............................................

(झ) स्वीयं कर्तृत्वम्, तेन ............................................

(ञ) अपराधस्य भावना, तया ............................................

(ट) गुरोः उपदेशः, तम् ............................................

(ठ) दिने दिने ............................................

(ड) राजा ऋषिः इव, तेषाम् ............................................

© NCERT not to be republished

## स्वाध्यायान्मा प्रमदः

१. 'क्तवतु' - प्रत्ययान्तशब्दानां पुंलिङ्गे रूपाणि वयं पश्यामः —

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | गतवान् | गतवन्तौ | गतवन्तः |
| **द्वितीया** | गतवन्तम् | गतवन्तौ | गतवतः |
| **तृतीया** | गतवता | गतवद्भ्याम् | गतवद्भिः |
| **चतुर्थी** | गतवते | गतवद्भ्याम् | गतवद्भ्यः |
| **पञ्चमी** | गतवतः | गतवद्भ्याम् | गतवद्भ्यः |
| **षष्ठी** | गतवतः | गतवतोः | गतवताम् |
| **सप्तमी** | गतवति | गतवतोः | गतवत्सु |

२. 'क्तवतु' - प्रत्ययान्तशब्दानां स्त्रीलिङ्गे रूपाणि वयं पश्यामः —

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | गतवती | गतवत्यौ | गतवत्यः |
| **द्वितीया** | गतवतीम् | गतवत्यौ | गतवतीः |
| **तृतीया** | गतवत्या | गतवतीभ्याम् | गतवतीभिः |
| **चतुर्थी** | गतवत्यै | गतवतीभ्याम् | गतवतीभ्यः |
| **पञ्चमी** | गतवत्याः | गतवतीभ्याम् | गतवतीभ्यः |
| **षष्ठी** | गतवत्याः | गतवत्योः | गतवतीनाम् |
| **सप्तमी** | गतवत्याम् | गतवत्योः | गतवतीषु |

© NCERT not to be republished

३. ‘क्तवतु’ - प्रत्ययान्तशब्दानां नपुंसकलिङ्गे रूपाणि वयं पश्यामः —

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | गतवत् | गतवती | गतवन्ति |
| **द्वितीया** | गतवत् | गतवती | गतवन्ति |
| **तृतीया** | गतवता | गतवद्भ्याम् | गतवद्भिः |
| **चतुर्थी** | गतवते | गतवद्भ्याम् | गतवद्भ्यः |
| **पञ्चमी** | गतवतः | गतवद्भ्याम् | गतवद्भ्यः |
| **षष्ठी** | गतवतः | गतवतोः | गतवताम् |
| **सप्तमी** | गतवति | गतवतोः | गतवत्सु |

## पाण्डुरङ्गः

पाण्डुरङ्गस्य एव विट्ठलः, विठोबा, पण्ढरीनाथः, विठुमाऊली च इत्यादीनि बहूनि नामानि सन्ति। महाराष्ट्रस्य सोलापुरजनपदे पण्ढरपुरम् इति प्रसिद्धं तीर्थक्षेत्रं वर्तते। तच्च चन्द्रभागानद्याः तीरे विराजमानमस्ति। वारकरीसम्प्रदायस्य आराध्यं दैवतम् अस्ति पाण्डुरङ्गः। सः इष्टिकायां समचरणः स्थितः वर्तते। हस्तौ कट्यां संस्थाप्य भक्तानां रक्षणार्थम् अहं सर्वदा कटीबद्धः अस्मीति सः भक्तान् सूचयति।

## विषयप्रबोधनम्

**नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु।**
**ईप्सितं मे वरं देहि परत्र च परां गतिम्॥**
**शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च।**
**आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्॥**

अन्वयः — हे देव! नैवेद्यं गृह्यताम्। शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्। भक्तिं हि अचलां मे कुरु। ईप्सितं वरं मे देहि। परत्र च परां गतिं देहि।

© NCERT not to be republished

## यस्तु क्रियावान् मनुजः स विद्वान्

१. **स्वप्रदेशे विद्यमानानां द्वित्राणां महात्मनां चित्राणि संकलयत। तेषां विषयकं विवरणं पञ्चषैः वाक्यैः च लिखत। उदाहरणम्—**

छत्तीसगढ़प्रान्तस्य गिरौदपुरी-ग्रामे गुरु-घासिदासमहाराजस्य जन्म जातम्। 'मनखे मनखे एक समान' अर्थात् सर्वे मनुष्याः समानाः सन्ति इति तस्य उपदेशः आसीत्। समाजस्थां विषमतां दूरीकृत्य समानताम् आनेतुं घासिदासः महाराजः महान्तं प्रयत्नं कृतवान्। अस्माभिः न केवलं सर्वैः मनुष्यैः सह अपि तु सर्वैः जीवैः सह अपि वत्सलतया व्यवहरणीयम् इति सः उपदिशति स्म। सतनामी इति सम्प्रदायस्य सः संस्थापकः आसीत्।

२. **पाठे आगतानि क्तवतुप्रत्यययुतानि वाक्यानि संगृह्य तादृशानि अन्यानि वाक्यानि लिखत।**

**यथा**— कपिलः माधवी च अवकाशकाले मातुलगृहं गतवन्तौ।

रामः लक्ष्मणः च सीतया सह वनं गतवन्तौ।

३. **गुलावराव-महाराजः सन्तकवि-भीमभोई चेति एतयोः महापुरुषयोः विषये पञ्चभिः वाक्यैः दशभिः वाक्यैः वा वर्णयित्वा शिक्षकान् दर्शयत।**





चतुर्थः पाठः

# न खलु वयस्तेजसो हेतुः

0902CH04

भारतदेशस्य स्वतन्त्रतायाः अमृतमहोत्सववर्षं वयम् आचरितवन्तः। किं वयं जानीमः यत् देशाय स्वातन्त्र्यं प्रदातुं कियन्तः ज्ञाताः अज्ञाताः च क्रान्तिवीराः स्वतन्त्रतायज्ञे स्वीयपरिवारं स्वीयजीवनं च आहुतिरूपेण समर्पितवन्तः इति? छात्राः! ते सर्वेऽपि क्रान्तिवीराः अस्माभिः कृतज्ञताभावनया नित्यं वन्दनीयाः। खुदीरामः तेषु एव देशभक्तेषु कश्चन तेजस्वी बालक्रान्तिवीरः हुतात्मा अस्ति। क्रान्तिवीरस्य खुदीरामस्य जीवनवृत्तान्तः संक्षेपेण अत्र वर्णितः अस्ति।

भारतस्य स्वतन्त्रतासङ्ग्रामे सशस्त्रान्दोलने बङ्गप्रान्तः अग्रेसरः आसीत्। तस्मिन् बङ्गप्रान्ते मेदिनीपुरनामके जनपदे मोहोबनी-ग्रामे नवाशीत्यधिक-अष्टादशशततमे वर्षे (१८८९) दिसम्बरमासस्य तृतीये दिनाङ्के खुदीरामस्य जन्म अभवत्। तस्य जनकस्य नाम त्रैलोक्यनाथः इति, जनन्याः नाम लक्ष्मीप्रिया देवी च आसीत्। खुदीरामस्य बाल्यकाले एव तस्य पितरौ दिवङ्गतौ। अतः तस्य अग्रजया अपरूपादेव्या एव खुदीरामस्य पालनं पोषणं च कृतम्। बाल्यकालतः एव खुदीरामः असाधारणः आसीत्। साधारणबालानामिव क्रीडादिषु तस्य मनः न रमते स्म। सः देशवासिषु जायमानान् अत्याचारान् दृष्ट्वा व्यथितः भवति स्म।



© NCERT not to be republished



बङ्गप्रान्ते क्रान्तिवीराणां महद्भिः गुप्तगतिविधिभिः आङ्ग्लाः संत्रस्ताः आसन्। भारतस्य तात्कालिकः वायसरायः कर्जनः बङ्गप्रान्तस्य एतत् वीरत्वं दमयितुम्, उत्साहं ध्वंसयितुं, देशभक्तिं मर्दयितुं च बङ्गप्रान्तस्य पन्थाधारितं विभजनं करणीयम् इति निश्चितवान्। पञ्चाधिक-नवदशशततमे वर्षे (१९०५) तेन बङ्गप्रान्तः भागद्वये विभाजितः। तस्य एतया कृत्या न केवलं बङ्गप्रान्ते अपि तु सर्वस्मिन् देशे जनान्दोलनं प्रवृत्तम्। बङ्गभङ्ग-आन्दोलनमिति तस्य जनान्दोलनस्य नाम। यद्यपि खुदीरामः तस्मिन् समये केवलं पञ्चदशवर्षीयः तथापि देशभक्तेः भावनया सः प्रेरितः सन् जनान्दोलने कूर्दितः। आङ्ग्लानां पारतन्त्र्यशृङ्खलातः वन्दनीयभारतमातुः मोचनं करणीयम् इत्येव





© NCERT not to be republished

सङ्कल्पः आसीत्। अतः सः नवमीं कक्षाम् अपि पूर्णां कर्तुं न शक्तवान्। यतोहि देशभक्तानां जीवनं राष्ट्राय समर्पितं भवति।

बालानां संघटनं कृत्वा सः पदयात्राम् आयोजयति स्म। तस्यां यात्रायां देशभक्तियुतानि गीतानि, वन्दे मातरम् चेत्यादयः घोषणाः भवन्ति स्म। सः पदयात्रामाध्यमेन लोकजागरणविषयकाणि पत्रकाणि जनेषु वितरति स्म। कदाचित् खुदीरामः पत्रकवितरणसमये आङ्ग्लानां हस्तगतः जातः। किन्तु सामर्थ्यसम्पन्नः खुदीरामः आङ्ग्लानां ताडनं कृत्वा ततः निरगच्छत्।

बङ्गप्रान्ते क्रान्तिवीरैः सञ्चालितानि बहूनि गुप्तमण्डलानि आङ्ग्लानां मनसि आतङ्कं जनयन्ति स्म। कस्यचित् गुप्तमण्डलस्य सञ्चालकः आसीत् सत्येन्द्रनाथः। खुदीरामः स्वमित्रेण प्रफुल्लेन सह गत्वा सत्येन्द्रनाथेन अमिलत्। सत्येन्द्रनाथः उपादिशत्— "क्रान्तिकार्यं कर्तुं शरीरं वज्रसदृशं दृढं, बुद्धिः असिधारा इव तीक्ष्णा, मनः गङ्गाजलमिव निर्मलं च भवेत् इति"।

तस्मात् गुप्तप्रशिक्षणकेन्द्रात् द्वाभ्याम् अष्टमासात्मकं प्रशिक्षणं प्राप्तम्। भुशुण्डिसञ्चालने अपि तौ अचिरादेव प्रवीणौ सञ्जातौ। राणाप्रतापस्य चरित्रेण प्रेरितः खुदीरामः प्रतिज्ञातवान् यत् 'यावत् भारतम् आङ्ग्लशासनात् मुक्तं न भविष्यति तावत् पादत्राणं न धरिष्यामि' इति।



© NCERT not to be republished

कलकत्ता-जनपदस्य मुख्यः न्यायिकः आङ्ग्लः अधिकारी 'किङ्ग्ज़फोर्ड्' भारतीय-देशभक्तान् अतीवकठोररीत्या दण्डयति स्म। निर्दयः सः बालान् अपि न त्यजति स्म। तस्य स्थानान्तरणं यदा मुज़फ्फरनगरे जातं तदा 'सः हन्तव्यः' इति सशस्त्रक्रान्तिवीरमण्डलेन निश्चितम्। हत्यायोजनायाः सम्पूर्णम् उत्तरदायित्वं प्रफुल्ल-खुदीरामाभ्यां स्वीकृतम्। तस्य वधस्य सूक्ष्मा योजनापि द्वाभ्यां निर्मिता।



अष्टाधिक-नवदशशततमवर्षस्य एप्रिलमासस्य अष्टाविंशे दिनाङ्के (२८-०४-१९०८) किङ्ग्ज़फोर्ड् इत्यस्य रथविशेषे प्रफुल्ल-खुदीरामाभ्यां विस्फोटकं प्रक्षिप्तम्। महान् विस्फोटध्वनिः जातः। अग्निज्वालाः आकाशम् अस्पृशन्। 'किङ्ग्ज़फोर्ड् हतः' अस्माकम् उत्तरदायित्वं पूर्णम् इति कृतार्थभावनया तौ पलायितवन्तौ। किन्तु हा धिक्! यद्यपि सः किङ्ग्ज़फोर्ड् महोदयस्य रथः आसीत् तथापि तस्मिन् सः नासीदेव। केनेडीनामकस्य अधिकारिणः पत्नी पुत्री च तत्र आस्ताम्। ते मृते किन्तु किङ्ग्ज़फोर्ड् रक्षितः। आरात्रि द्वौ अपि क्रान्तिवीरौ अधावताम्। किन्तु दौर्भाग्यवशात् आङ्ग्लाः आरक्षकाः तौ अगृह्णन्। वीरप्रफुल्लेन



© NCERT not to be republished

आङ्ग्लानां विरोधे कृतः प्रतीकारयत्नः व्यर्थः अभूत्। अनन्यगतिकः प्रफुल्लः भारतमातरं मनसा प्रणम्य 'वन्दे मातरमिति' उद्घोष्य च स्ववक्षःस्थले भुशुण्ड्या गोलिकाप्रहारं कृतवान्। वीरबालः प्रफुल्लः हौतात्म्येन अमरः जातः।

आङ्ग्लैः गृहीतः खुदीरामः न्यायालयं नीतः। तत्र अधिवक्तॄणां प्रत्येकं प्रश्नस्य खुदीरामस्य निश्चितम् उत्तरम् आसीत् यत् 'वन्दे मातरम्' इति। न्यायाधीशेन निर्दयतया बालाय खुदीरामाय मृत्युदण्डः उद्घोषितः – उद्बन्धनम् इति। राष्ट्रभक्तस्य खुदीरामस्य मुखे भयं दुःखं वा नासीत् प्रत्युत प्रसन्नता, शान्तिः, तृप्तिः, तेजः च आसीत्। तत् दृष्ट्वा न्यायाधीशः आङ्ग्लाः अधिकारिणः चापि चकिताः। अष्टाधिक-नवदशशततमस्य वर्षस्य अगस्तमासस्य एकादशे दिनाङ्के (११-०८-१९०८) बाल्ये वयसि एव देशस्य स्वातन्त्र्यार्थं खुदीरामः हुतात्मा जातः। प्रियभारतमातुः दर्शनार्थं सः हसन्, वन्दे मातरम् इति जपन् आनन्देन दिवं गतः।

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अधिवक्तॄणाम् (पुं.ष.ब.व.) | अभिभाषकाणाम् | वकीलों के | Of advocates | |
| असाधारणः (नञ् तत्पुरुषः, पुं.प्र.ए.व.) | न साधारणः | असामान्य | Extra Ordinary | |
| आचरितवन्तः (आ + √ चर् + क्तवतु, पुं.प्र.ब.व) | पालितवन्तः | मनाये | Observed | |
| आतङ्कम् (आङ् + √ तकि + घञ्, पुं.द्वि.ए.व.) | भयम् | डर | Fear | |



© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| आन्दोलनम् (√आन्दोल् + ल्युट्, नपुं.प्र.ए.व.) | विप्लवः | आन्दोलन | Revolution | |
| उद्बन्धनम् (उद् √बन्ध् + ल्युट्, नपुं.प्र.ए.व.) | दण्डविशेषः | फाँसी | Execution | |
| कदाचित् (कदा + चित्, अव्ययम्) | एकदा | एक बार | Once | |
| चकितः (पुं.प्र.ए.व.) | विस्मितः | चौंकना | Amazed | |
| दिवम् (स्त्री.द्वि.ए.व.) | स्वर्गम् | स्वर्ग को | To heaven | |
| निर्दयः (पुं.प्र.ए.व.) | निर्गता दया यस्मात् | दया रहित | Merciless | |
| प्रतीकारयत्नः (पुं.प्र.ए.व.) | प्रत्युत्तरप्रयासः | प्रतिरोध का प्रयास | Attempt at retaliation | |
| भुशुण्डी (स्त्री.प्र.ए.व.) | शस्त्रविशेषः | बन्दूक | Gun | |
| व्यथितः (√ व्यथ् + क्त, पुं.प्र.ए.व.) | दुःखितः | चिन्तित | Worried | |
| विस्फोटकम् (नपुं.प्र.ए.व.) | युद्धोपकरणविशेषः | विस्फोटक सामग्री | Explosive | |
| संत्रस्तः (सम् + √ त्रस् + क्त, पुं.प्र.ए.व.) | भीतः, पीडितः | आतंकित | Frightened | |

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

**१. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तराणि लिखत—**

(क) खुदीरामस्य जन्म कुत्र अभवत्?

(ख) खुदीरामः किमर्थं व्यथितः भवति स्म?

(ग) सत्येन्द्रनाथः किम् उपदिष्टवान्?

(घ) खुदीरामः कदा पर्यन्तं पादत्राणं न धरिष्यामि इति प्रतिज्ञातवान्?

(ङ) किमर्थं न्यायाधीशः आङ्ग्लाः अधिकारिणः च चकिताः?

**२. अधः प्रदत्तेषु वाक्येषु किं वाक्यं सत्यं किं च असत्यम् इति सूचयत—**

(क) देशभक्तानां जीवनं राष्ट्राय समर्पितं भवति। (सत्यम्/असत्यम्)

(ख) निर्दयः किङ्ग्ज़फोर्ड् बालान् अपि दण्डयति स्म। (सत्यम्/असत्यम्)

(ग) खुदीरामस्य आक्रमणेन किङ्ग्ज़फोर्ड् मृतः। (सत्यम्/असत्यम्)

(घ) खुदीरामः किङ्ग्ज़फोर्ड्महोदयस्य रथस्य उपरि विस्फोटकं क्षिप्तवान्। (सत्यम्/असत्यम्)

(ङ) खुदीरामः बालानां सङ्घटनं कृत्वा पदयात्राम् आयोजयति स्म। (सत्यम्/असत्यम्)

**३. अधः प्रदत्तानां संवत्सराणां शब्दानाम् अङ्कैः सह मेलनं कुरुत—**

| | |
|---|---|
| (क) सप्तचत्वारिंशदधिक-नवदशशततमं वर्षम् | १. १९०५ |
| (ख) अष्टाधिक-नवदशशततमं वर्षम् | २. १८८९ |
| (ग) पञ्चाशदुत्तर-नवदशशततमं वर्षम् | ३. १९४७ |
| (घ) पञ्चाधिक-नवदशशततमं वर्षम् | ४. १९०८ |
| (ङ) नवाशीत्यधिक-अष्टादशशततमं वर्षम् | ५. १९५० |

© NCERT not to be republished

४. **अधः प्रदत्तानि पदानि आधृत्य चित्रं दृष्ट्वा पञ्च वाक्यानि लिखत —**



उद्यानं, गृहाणि, पक्षिणः, पुष्पाणि, स्वच्छता, द्विचक्रिका, पर्वतः, वृक्षाः, सूर्यः, मेघाः

(क) ................................................................................................

................................................................................................।

(ख) ................................................................................................

................................................................................................।

(ग) ................................................................................................

................................................................................................।

(घ) ................................................................................................

................................................................................................।

(ङ) ................................................................................................

................................................................................................।

© NCERT not to be republished

**५. सन्धिच्छेदं कुरुत —**

(क) इत्यादयः ............................ + ............................

(ख) सर्वेऽपि ............................ + ............................

(ग) कश्चित् ............................ + ............................

(घ) प्रत्येकम् ............................ + ............................

(ङ) वयस्तेजसः ............................ + ............................

(च) अचिरादेव ............................ + ............................

**६. विग्रहवाक्यं दृष्ट्वा पाठ्यपुस्तकात् समस्तपदानि चित्वा पूरयत —**

(क) देशस्य भक्ताः ..................................................

(ख) बालः च क्रान्तिवीरः च ..................................................

(ग) वज्रेण सदृशम् ..................................................

(घ) असेः धारा ..................................................

(ङ) मृत्युः एव दण्डः ..................................................

(च) न साधारणः ..................................................

(छ) निर्गता दया यस्मात् सः ..................................................

**७. लङ्लकारः, क्तवतु-प्रत्ययः, स्म, क्तप्रत्ययः – एते सर्वेऽपि भूतकालं सूचयन्ति। अधः दत्तानि वाक्यानि सूचनानुसारं परिवर्तयत —**

यथा — खुदीरामः हुतात्मा जातः। (लङ्-लकारः)

खुदीरामः हुतात्मा अजायत।

(क) वन्दे मातरम् इत्यादयः घोषणाः भवन्ति स्म। (लङ्-लकारः)

..........................................................................................

(ख) सत्येन्द्रनाथः खुदीरामम् उपादिशत्। (क्तवतु-प्रत्ययः)

..........................................................................................

© NCERT not to be republished

(ग) सः नवमीं कक्षां पूर्णां कर्तुं न शक्तवान्। (लङ्-लकारः)

..............................................................................................

(घ) क्रान्तिवीराः आङ्ग्लानां मनसि आतङ्कम् अजनयन्। (स्म)

..............................................................................................

(ङ) प्रफुल्लः भुशुण्ड्या गोलिकाप्रहारं कृतवान्। (लङ्-लकारः)

..............................................................................................

**८. पाठे कदाचित्, कस्यचित्, इति एवं विधानि पदानि सन्ति। एतानि 'चित्' प्रत्यययुक्तानि अव्ययानि भवन्ति। एतानि पदानि विशेषणानि भवन्ति। चित् प्रत्ययस्य योजनेन अर्थे अनिश्चयस्य भावः सूच्यते। यथा—**

| | | | |
|---|---|---|---|
| कदा + चित् | कदाचित् | कस्य + चित् | कस्यचित् |
| केन + चित् | केनचित् | कुत्र + चित् | कुत्रचित् |
| कति + चित् | कतिचित् | कुतः + चित् | कुतश्चित् |
| कथं + चित् | कथञ्चित् | का + चित् | काचित् |
| कः + चित् | कश्चित् | किं + चित् | किञ्चित् |

**उदाहणानुसारं चित्-प्रत्ययान्तपदानि प्रयुज्य रिक्तस्थाने पूर्णवाक्यं लिखत—**

कश्चित्, काचित्, किञ्चित्, कुत्रचित्, कदाचित्

(क) बालकः गच्छति। ......कश्चित् बालकः गच्छति।......

(ख) बालिका गच्छति। ..........................................

(ग) फलं खादतु। ..........................................

(घ) लेखनी लुप्ता। ..........................................

(ङ) सः आगच्छेत्। ..........................................

© NCERT not to be republished

## स्वाध्यायान्मा प्रमदः

**१. अधः प्रदत्तानि युगलपदानि अव्ययानि सन्ति। तेषां प्रयोगः अधः प्रदत्तेषु वाक्येषु प्रदर्शितः। ध्यानेन पठन्तु रिक्तस्थानानि च पूरयन्तु—**

**यथा**—स्वामी विवेकानन्दः उक्तवान् **यत्** सामर्थ्यमेव जीवनं दुर्बलता मृत्युः **इति**।

**यदा** कृष्णः शङ्खनादं कृतवान् **तदा** दुर्योधनादीनां हृदयानि कम्पितानि।

**यावत्** भूतले गिरयः भवन्ति **तावत्** रामायणकथा प्रचलिष्यति।

**यद्यपि** मेघाः सन्ति **तथापि** वृष्टिः न भवति।

(क) सुभाषचन्द्रः वदति ............................ भवन्तः महां रुधिरं यच्छन्तु अहं भवद्भ्यः स्वातन्त्र्यं प्रयच्छामि ............................।

(ख) ............................ अर्जुनः भीष्मद्रोणादीन् अपश्यत् ............................ शोकं प्राप्नोत्।

(ग) श्रीरामः भरतम् उक्तवान् ............................ जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ............................।

(घ) ............................ भरतः अयोध्यां प्राप्तवान् ............................ श्रीरामः तत्र नासीत्।

(ङ) ............................ खुदीरामाय मृत्युदण्डः उद्घोषितः ............................ सः प्रसन्नवदनः आसीत्।

(च) ............................ वृष्टिः भवति ............................ कृषकाः सन्तुष्टाः भवन्ति।

© NCERT not to be republished

(छ) ............................... खुदीरामः बालः ...............................
सः देशकार्यं कृतवान्।

(ज) ............................... कार्यं करोति ............................... फलं प्राप्नोति।

(झ) प्रफुल्ल-खुदीरामाभ्यां ............................... विस्फोटकं प्रक्षिप्तम् ............................... किङ्ग्ज़फोर्डः न मृतः।

(ञ) ............................... अध्ययनं सुदृढं भवति
............................... ज्ञानं विकसितं भवति।

(ट) ............................... खुदीरामः आङ्ग्लानां हस्तगतः
............................... सः ततः बहिरागतः।

## यस्तु क्रियावान् मनुजः स विद्वान्

**१. भगतसिंहः, मङ्गलपाण्डे, चन्द्रशेखरः, लक्ष्मीबाई, बालगङ्गाधरतिलकः इत्येतेषां क्रान्तिवीराणां जीवनचरितं संगृह्य ततः एकां घटनां कक्षायां वदत।**

**२. पाठे विद्यमानानि अव्ययपदानि संगृह्य दश (१०) वाक्यानि रचयत।**

**३. खुदीरामस्य जन्म नवाशीत्यधिके अष्टादशशततमे वर्षे (१८८९) दिसम्बरमासस्य तृतीये दिनाङ्के अभवत्। एवंप्रकारेण स्वविषये लिखन्तु।**

(क) मम जन्म ...............................................................................
............................................................................... अभवत्।

(ख) पितुः जन्म ...............................................................................
............................................................................... अभवत्।

© NCERT not to be republished

(ग) मातु: जन्म ................................................................................

................................................................................ अभवत्।

(घ) भ्रातु: जन्म ................................................................................

................................................................................ अभवत्।

(ङ) भगिन्या: जन्म ................................................................................

................................................................................ अभवत्।

**४. पारा-अलम्पिकस् स्पर्धायां कस्यापि एकस्य यशस्विप्रतिभागिन: विषये शिक्षकस्य पुरत: कथां श्रावयत।**

**५. नृत्यसङ्गीतादिक्षेत्रेषु कस्यापि एकस्य जनप्रियस्य कलाकारस्य विषये पञ्चवाक्यानि लिखित्वा शिक्षकान् दर्शयत?**

© NCERT not to be republished

पञ्चमः पाठः

0902CH05

# एषा सा कृतकबुद्धिः मानवबुद्धेः सहकरी

आधुनिके विज्ञानयुगे यदा मानवजीवनं द्रुतगत्या परिवर्तनशीलम् अस्ति, तदा अत्र कृतकबुद्धिः प्रभावशालि-साधनरूपेण समुपस्थिता वर्तते। अत्र यन्त्राणि मानववत् चिन्तयन्ति, निर्णयं च कुर्वन्ति। अहो ! अवलोकनीयं कृतकबुद्धेः सामर्थ्यं तत्र।

अस्मिन् पाठे "कृतकबुद्धिः-मानवबुद्धेः सहकरी" इति कश्चित् वार्तालापः प्रस्तुतः अस्ति। यत्र अध्यापकः छात्राः च मिलित्वा कृतकबुद्धेः स्वरूपम्, उपयोगक्षेत्राणि, लाभान् सीमां च अधिकृत्य चर्चां कुर्वन्ति।

एषः पाठः न केवलं कृतकबुद्धेः विषये सूचनां प्रयच्छति अपि तु विद्यार्थिनां चिन्तन-शक्तिं विवेकं च जागरयति। एषा कृतकबुद्धिः कथं मानवहिताय उपयोगिनी भवेत् इति चिन्तनीयः विषयः।

© NCERT not to be republished



*(स्थानं – विद्यालयकक्षा। अध्यापकः कक्षायां प्रविशति।)*

**सर्वे छात्राः** शुभप्रभातं, गुरुवर्य !

**अध्यापकः** शुभप्रभातं, प्रियच्छात्राः !

**यशिका** महोदय ! अद्य अहम् किञ्चन चालकरहितं पटु-कारयानं दृष्टवती। अहम् आश्चर्यचकिता। किम् एतत् संभवम् ?

**अध्यापकः** अवश्यं यशिके ! एतत् कृतकबुद्ध्या सम्भवति।

**कात्यायनी** महोदय ! केयं कृतकबुद्धिः, अद्य वयम् अस्याः विषये ज्ञातुमिच्छामः।

**अध्यापकः** अद्यत्वे अयं बहुचर्चितः विषयः अस्ति। भवत्सु कृतकबुद्धेः विषये कोऽपि जानाति वा ?

**श्रेया** आचार्य ! अहं जानामि। यदा यन्त्राणि मनुष्यवत् चिन्तयन्ति, निर्णयं कुर्वन्ति, कार्यं च कुर्वन्ति, तदा तत्र कृतकबुद्धिः उपस्थिता अस्ति इति जानीमः।

**अध्यापकः** सुष्ठु ! यया अचेतनयन्त्राणि मानवबुद्धिवत् कार्यं कुर्वन्ति, सा कृतकबुद्धिः इति वैज्ञानिकाः मन्यन्ते।

**अथर्वः** आम्, चैट-जीपीटी इति नामकं संवादोपकरणमपि कृतकबुद्ध्या युक्तम् अस्ति।

**अध्यापकः** साधु ! चैट-जीपीटी, सिरि, एलेक्सा, गूगल मानचित्रं, जेमिनि, मेटा-कृतकबुद्धिः, परप्लेक्सिटि चेत्यादयः अनुप्रयुक्ततन्त्रविशेषाः कृतकबुद्धियुक्ताः सन्ति।

**यशिका** अहं चैट-जीपीटी इत्यनेन अनेकेषां प्रश्नानां यथेष्टम् उत्तराणि प्राप्तवती। इदं कृतकबुद्ध्याः कारणात् एव संभवम्।

**अथर्वः** मम माता 'एलेक्सा'-नामकस्य यन्त्रस्य उपयोगं करोति। एतत् गीतं गायति, विद्युद्दीपं ज्वालयति, दैनिकसंवादं वातावरणस्थितिं च सूचयति।

**पावनी** अहो ! मम माता गूगल-सहायकेन सह वार्तां करोति।

© NCERT not to be republished

**अध्यापकः** साधु! एषा काचित् 'बुद्धिमती' यन्त्रप्रणाली अस्ति। किं यूयं जानीथ कृतकबुद्धेः कतिपयाः प्रमुखाः प्रकाराः सन्ति?

**अक्षतः** के ते प्रकाराः मान्यवर!

**अध्यापकः** ते सन्ति —




- सङ्कुचितकृतकबुद्धिः — जीपीटी, गूगल-मानचित्रं, यू-ट्यूब्।
- सामान्यकृतकबुद्धिः — मानवसमाना बुद्धिमत्ता (एतत् लक्ष्यं भवति)।
- अत्युत्कृष्टकृतकबुद्धिः — मानवात् अपि अधिका बुद्धिमती – एषा काल्पनिकी अस्ति।

**वेदः** किन्तु आचार्य! अस्माकं बुद्धिस्तु ईश्वरेण मस्तिष्के स्थापिता अस्ति, कथम् एषा बुद्धिः यन्त्रे स्थाप्यते?

**अध्यापकः** उत्तमः प्रश्नः। प्रौद्योगिकीविशारदाः यन्त्राधिगमः, गहनाधिगमः चेति विधिना एतानि यन्त्राणि प्रशिक्षयन्ति, अनुप्रयोगाय च सज्जीकुर्वन्ति।



© NCERT not to be republished

**आर्यः** यन्त्राणामपि पाठशाला अस्ति वा?

*(सर्वे हसन्ति)*

**अध्यापकः** अस्याः यन्त्रपाठशालायाः नाम "डेटासेट्" इति! कृतकबुद्धिः यन्त्रं दत्तांशमाध्यमेन शिक्षणं करोति।

**यशिका** किन्तु आचार्य! यदि अशुद्धदत्तांशः दीयते तर्हि कृतकबुद्धिः अपि त्रुटिं करोति?

**अध्यापकः** आम्। यदा प्रशिक्षणदत्तांशः पक्षपातयुक्तः भवति, तदा निष्कर्षाः अपि पक्षपातयुक्ताः भवन्ति। एषः दोषः 'पूर्वग्रहः' इति कथ्यते। कृतकबुद्धिः अद्यापि विकासपदे अस्ति। सेदानीं मानवीयपरिचर्या-विवेकेन सह त्रुटिरहितरूपेण ग्रहीतुं शक्यते।

**श्रेया** गुरुवर! एषा बुद्धिः केषु स्थलेषु उपयुज्यते?

**अध्यापकः** श्रेये! तव प्रश्नः अतीव महत्त्वपूर्णः। शिक्षायां, चिकित्सायां, कृषि-क्षेत्रे, न्यायालये, सञ्चारे, वित्ते, कलासङ्गीतक्षेत्रे मनोरञ्जनादिषु क्षेत्रेषु च कृतकबुद्धिः भूरिशः उपयुज्यते।

**अथर्वः** महोदय! कृतकबुद्धिः कथं शिक्षायां साहाय्यं करोति? किं शिक्षकस्य स्थाने कृतकबुद्धिः अस्मान् पाठयिष्यति? एतत् कथं सम्भवति?

**अध्यापकः** दीक्षा, स्वयम्, सर्वेषां कृते कृतकबुद्धिः, पी.एम्.-ईविद्या, संशयनिराकरणार्थं चैट्बोट्, भाषानुवादोपकरणानि च यत्र तत्र प्रयुज्यन्ते। एतानि कृतकबुद्ध्याधारितानि उपकरणानि सन्ति। एतेषां साहाय्येन छात्राः शिक्षकाणाम् अनुपस्थितौ अपि स्वयम् अध्येतुं शक्नुवन्ति।

**आकाशः** हा धिक्! एतेषां कारणेन मानवशिक्षकः किं प्रयोजनरहितः भविष्यति?

© NCERT not to be republished

**अध्यापकः** न न! कृतकबुद्धिः गुरुमित्रम् अस्ति, गुरुविकल्पः नास्ति। शिक्षकाणां सान्निध्ये छात्रेषु व्यक्तित्वविकासः भवति। शिक्षकाः पुस्तकीयज्ञानेन सह छात्रेषु मानवीयमूल्यबोधम् अपि जनयन्ति। ते अनुशासनं, परोपकारं, करुणां, तथैव व्यवहारज्ञानं च शिक्षयन्ति। सदा स्मरणीयं यत् कृतकबुद्धिः उपकरणम् अस्ति, प्रेरणा तु मानवेभ्यः एव आगच्छति।

**वेदः** अहम् कस्मिंश्चित् चलच्चित्रे दृष्टवान् यत् यन्त्राणि मानवेभ्यः संसारम् अधिगृह्णन्ति इति।

**यशिका** अपि च, आचार्य! किं कृतकबुद्धिः मानवस्य स्थानं हर्तुं शक्नोति?

**अध्यापकः** एषा चिन्ता समाजे प्रगाढं जायमाना अस्ति, किन्तु अत्र बोद्धव्यं यत् कृतकबुद्धिः सहायिका अस्ति, मनुष्यस्य प्रतिस्पर्धिनी न।

**आर्यः** महोदय! किं कृतकबुद्धिः चिकित्सायाम् अपि प्रयुज्यते?

**अध्यापकः** आम्! रोबोटिक्-सर्जरी, रोग-पूर्वज्ञानं, कृतकबुद्धिः रश्मिपरीक्षणविद्या, चैट-कृतकबुद्धिः, औषधशुश्रूषा चेत्यादीनि तदाधारितानि चिकित्सोपकरणानि सन्ति।

**अक्षतः** किं कृषि-क्षेत्रे अपि प्रयुज्यते?

**अध्यापकः** नूनं! कृषि-क्षेत्रे अपि ड्रोनमाध्यमेन बीज-वपनं, कीटनिरीक्षणं, भूमिक्षमता-चेत्यादीनां परीक्षणम् अपि यन्त्रैः भवन्ति।

**अथर्वः** गुरुदेव! अपराधशमनाय कृतकबुद्धिः कथं साहाय्यं करोति?

**अध्यापकः** मुखपरिचयप्रणाली, पूर्वानुमेय-नियन्त्रणं चेत्यादि-योजनासु कृतकबुद्धेः प्रयोगः अस्ति।

**यशिका** किं कृतकबुद्धिः काव्यमपि रचयितुं समर्था?

**अध्यापकः** अत्र भवन्तः किं चिन्तयन्ति?

**वेदः** अहं चैट-जीपीटी इत्यस्मात् एनं श्लोकं प्राप्तवान्—



© NCERT not to be republished

**विद्युत्प्रज्ञया यन्त्राणि नित्यं वदन्ति चेतनाः।**
**अहोरात्रं न विश्रान्ताः मानवान् धारयन्ति ते॥**

*(सर्वे सोत्साहं पठन्ति, आश्चर्यं च कुर्वन्ति)*

**पावनी** किन्तु श्रीमन्, कृतकबुद्धि-सकाशात् समाजे महत् भयम् अपि अस्ति।

**अध्यापकः** सत्यं, भयस्य कारणमपि यथार्थम् अस्ति। अद्यत्वे कृतकबुद्धेः दुरुपयोगेन हि विभिन्नप्रकारकाः साइबर्-अपराधाः समाजेषु देशेषु च चलन्ति। किं भवन्तः 'डीप्-फेक्' इति समस्याविषये जानन्ति?

**आकाशः** गुरुवर! तत् डीप्-फेक् इति किमस्ति?

**अध्यापकः** डीप्-फेक् कृतकबुद्ध्या निर्मितं मिथ्याचित्रं, दृश्यं, ध्वनिः वा अस्ति। मिथ्यादृश्ये यत्र मुखं वाणी च मिथ्या प्रस्तूयते— उपहासाय, अनेकदा अपराधाय चापि।

**अथर्वः** अस्य निराकरणार्थम् उपायः कः?

**अध्यापकः** अस्माकं कृतकबुद्धि-साक्षरता, नैतिकतापूरितं प्रशिक्षणं, सर्वकारेण नियन्त्रणम्, आत्मनियन्त्रणं चेति विविधाः उपायाः अस्माभिः करणीयाः।

**भास्करः** अहो! "कृतकबुद्धिः मित्रं भवेत्, न भवेत् स्वामी" इति वाक्यं मम मनः स्पृशति।

**वेदः** तथापि यदि कृतकबुद्धिः मनुष्यान् स्वस्ववृत्तेः निष्कासयति तर्हि कः तत्र रक्षणोपायः?

**अध्यापकः** तथाविधः सङ्कटः नापतेत् इति भारतसर्वकारेण स्किल्-इण्डिया, डिजिटल्-इण्डिया ई-स्किल्-इण्डिया, चेत्याद्याः अनेकाः योजनाः सञ्चाल्यन्ते। एताभिः योजनाभिः प्रशिक्षिताः युवानः

© NCERT not to be republished

नवीनवृत्तीः प्राप्तुम् अर्हन्ति। वस्तुतः कृतकबुद्धिः स्वतः कस्यापि वृत्तिं न हरति। अपि तु कृतकबुद्धिप्रशिक्षितः जनः कदाचित् अप्रशिक्षितस्य जनस्य पारम्परिकवृत्तिं हरेत्।

**यशिका** गुरुवर! कृतकबुद्धि-द्वारा भविष्ये मानुषजीवनं कीदृशं भविष्यति?

**अध्यापकः** यदि विवेकपूर्वकं प्रयुज्यते, तर्हि जीवनम् अधिकं सुगमं, सुरक्षितं श्रेयस्करं च भविष्यति।

**श्रेया** कृतकबुद्धिः एव मानवीयबुद्धिं कार्यक्षमतां च द्विगुणितां करिष्यति इति मम मतम्। भारतीय-कृतकबुद्धिप्रभाव-सम्मेलनम्–२०२६ (India AI Impact Summit–2026) इत्यत्रापि उक्तमेतम्

**अध्यापकः** उत्तमं कथनम्! 'कृतकबुद्धिः मानवबुद्धेः सहकरी' — इति वाक्यम् अस्माकं मनसि स्पष्टं स्यात्।

**सर्वे** आम्! वयं जागरूकाः नागरिकाः भवाम, सुरक्षितं जालप्रवेशं करवाम, अपि च डिजिटल्-भारतं समृद्धं करवाम।

© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अध्येतुम् (अधि + √ इ + तुमुन्) | अध्ययनं कर्तुम् | अध्ययन करने के लिए | For Studying | |
| अधिगृह्णन्ति (अधि + √ग्रह् + लट्, प्र.पु.ब.व.) | स्वीकुर्वन्ति | अधिग्रहण करते हैं | Aquire | |
| अपराधशमनाय (षष्ठी-तत्पुरुषः, नपु.च.ए.व.) | अपराधस्य शमनाय | अपराध की रोकथाम के लिए | Reducing crime | |

| | | | | |
|---|---|---|---|---|
| अर्हन्ति (√ अर्ह + लट्., प्र.पु.ब.व.) | शक्नुवन्ति | योग्य होते हैं | Deserve | |
| कृतकबुद्धिः (कर्मधारयः, स्त्री.प्र.ए.व.) | कृतका बुद्धिः | मनुष्य-बुद्धि जैसे यन्त्र का चिन्तन-कौशल | Artificial Intelligence | |
| चिकित्सायाम् (स्त्री.स.ए.व.) | रोगोपचारस्य क्षेत्रे | चिकित्सा में | In medicine | |
| डीप्-फेक् | गहनमिथ्याचित्रं कृतकबुद्ध्या निर्मितम् | कृत्रिम बुद्धि द्वारा निर्मित मिथ्याचित्र | AI-generated fake media | |
| तन्त्रांशः (पुं.प्र.ए.व.) | संगणक-तन्त्रः | सॉफ्टवेयर | Software | |
| दत्तांशः (पुं.प्र.ए.व.) | पूर्वदत्तं ज्ञानम् | डेटा, आँकड़े | Data | |
| नैतिकता (स्त्री.प्र.ए.व.) | सदाचारः, धर्मनिष्ठता | नैतिक मूल्य | Ethics | |
| परीक्षणम् (नपुं.प्र.ए.व.) | समीक्षणम् | जाँच पड़ताल करना | Examination | |
| पूर्वाग्रहः (पुं.प्र.ए.व.) | पूर्वं स्थापितं पक्षपातयुक्तं मतम् | पूर्वपक्षपात | Bias | |
| प्रशिक्षयन्ति (प्र + √शिक्ष् + लट्, पुं.प्र.ब.व.) | शिक्षयन्ति, अभ्यासं कारयन्ति | प्रशिक्षण देते हैं | They coach | |
| प्रतिस्पर्धिनी (स्त्री.प्र.ए.व.) | स्पर्धायुक्ता | प्रतियोगी | Competitor | |
| प्रौद्योगिकीविशारदाः (पुं.प्र.ब.व.) | प्रौद्योगिकीशास्त्रे कुशलाः जनाः | तकनीकी विशेषज्ञ | Technology Experts | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| रश्मिपरीक्षणविद्या (षष्ठी-तत्पुरुषः, स्त्री.प्र.ए.व.) | रश्मिपरिक्षणस्य विद्या | किरण विज्ञान चिकित्सा | Radiology | |
| वाञ्छामः (√वाञ्छ्+लट्, प्र.पु.ब.व.) | इच्छामः | (हम) इच्छा करते हैं | We wish | |
| वित्ते (नपुं.स.ए.व.) | अर्थव्यवस्थायाम् | वित्त क्षेत्र में | In finance | |
| संवादोपकरणम् (नपुं.प्र.ए.व.) | संवादसाधनम् | वार्तालाप करने का साधन | Communication tool | |
| सहकरी (स्त्री.प्र.ए.व.) | सहयोगिनी | सहयोगी | Helper | |

## तन्त्रान्शाः/अनुप्रयोगाः

| | |
|---|---|
| सिरि | Siri |
| जेमिनि | Gemini |
| मेटा-कृतकबुद्धिः | Meta AI |
| परप्लेक्सिटि-कृतकबुद्धिः | Perplexity AI |
| पटु-कारयानम् | Smart Car |
| गूगल-सहायकम् | Google Assistant |
| सङ्कुचितकृतकबुद्धिः | Narrow AI |
| सामान्यकृतकबुद्धिः | General AI |
| अत्युत्कृष्टकृतकबुद्धिः | Super AI |
| यन्त्राधिगमः | Machine Learning |
| गहनाधिगमः | Deep Learning |
| स्वयम् | SWAYAM |
| सर्वेषां कृते कृतकबुद्धिः | AI for All |

© NCERT not to be republished

| | |
|---|---|
| पी.एम्. ई-विद्या | PM e-Vidya |
| मुखपरिचयप्रणाली | Facial Recognition System |
| दीक्षा | DIKSHA |

## अत्र इदम् अवधेयम्

### १. पञ्चमी विभक्तिः (अपादानकारकम्)

**उपयोगः** — 'कस्मात्' ? इत्यस्य उत्तररूपेण उपयुज्यते। वियोगं, कारणम् अपसरणं च सूचयति।

**प्रयोगविधानम्**

(क) कारणबोधकः — मूषकः बिडालात् बिभेति।

(ख) वियोगबोधकः — छात्रः **विद्यालयात्** आगतः।

(ग) अपसरणबोधकः — दुर्जनः मूर्खतया **धर्मात्** भ्रष्टः।

### २. षष्ठी विभक्तिः (सम्बन्धः)

**उपयोगः** — 'कस्य' ? इत्यस्य उत्तररूपेण प्रयुज्यते। सम्बन्धं, स्वामित्वम्, अंशं विषयं च दर्शयति।

**प्रयोगविधानम्**

(क) सम्बन्धबोधकः — मम मित्रम्।

(ख) स्वामित्वबोधकः — बालकस्य पुस्तकम्।

(ग) अंशबोधकः — शरीरस्य ऊर्ध्वभागे हृदयं मस्तिष्कं च स्तः।

(घ) विषयबोधकः — फलस्य स्वादः रुचिकरः।

### ३. सप्तमी विभक्तिः (अधिकरणकारकम्)

उपयोगः — 'कस्मिन्' ? इत्यस्य उत्तररूपेण प्रयुज्यते। स्थानं, कालम् आधारं च बोधयति।

© NCERT not to be republished

**प्रयोगविधानम्**

(क) स्थानबोधकः — विद्यालये पठति।

(ख) कालबोधकः — प्रभाते सूर्यः उदेति।

(ग) आधारबोधकः — भूमौ पादपाः रोहन्ति।

## अभ्यासाद् जायते सिद्धिः

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत —**

(क) कृतकबुद्धिः का अस्ति?

(ख) अध्यापकः कृतकबुद्धेः कानि उदाहरणानि उक्तवान्?

(ग) यन्त्राणि कथं शिक्ष्यन्ते?

(घ) 'डेटासेट्' केषां पाठशाला अस्ति?

(ङ) कृतकबुद्धिः कुत्र प्रयुज्यते?

(च) शिक्षायां कृतकबुद्धेः उपयोगः कथं भवति?

(छ) यदि अशुद्धदत्तांशः दीयते तर्हि का समस्या भवति?

(ज) कृतकबुद्धेः दुरुपयोगेन कीदृशं भयम् अस्ति?

(झ) 'कृतकबुद्धिः मित्रं भवेत्, न भवेत् स्वामी' इति वाक्यस्य कः अर्थः?

**२. मेलनं कुरुत — तन्त्रांशानां कार्याणि विचिन्त्य यथोचितं विकल्पं चिनुत —**

| स्तम्भः अ | स्तम्भः ब |
|---|---|
| (क) चैट-जीपीटी (Chat-GPT) | १. नैतिकतायाः शिक्षां करोति |
| (ख) डीप्-फेक् (Deepfake) | २. ए.आई. आधारित-शिक्षाप्रणाली |

© NCERT not to be republished

| | |
|---|---|
| (ग) शिक्षकः | ३. पथनिर्देशनं करोति |
| (घ) एलेक्सा (Alexa) | ४. संवादयन्त्रम् |
| (ङ) डेटासेट् (Dataset) | ५. पक्षपातयुक्तं प्रशिक्षणफलम् |
| (च) दीक्षा (DIKSHA) | ६. गीतं गायति, दीपं प्रकाशितं करोति च |
| (छ) अपूर्वानुमेय-नियन्त्रणम् (Predictive Policing) | ७. मिथ्याचित्रस्य निर्माणम् |
| (ज) गूगल मानचित्रं (Google Maps) | ८. चित्रोत्पादनाय ए.आई.अनुप्रयोगः |
| (झ) पूर्वग्रहः | ९. यन्त्रपाठशालायाः नाम |
| (ञ) डॅल्ल्-ई (DALL-E) | १०. अपराधशमनाय प्रयोगः |

## ३. अधः प्रदत्तमञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत —

कृतकबुद्धिः, डेटासेट्, शिक्षकः,
डीप्-फेक्, सम्वादयन्त्रम्, कृषिक्षेत्रे,
प्रशिक्षणम्, पूर्वाग्रहः, नैतिकता

(क) यन्त्राणां शिक्षणाय .......................... नामकः दत्तांशसमूहः उपयुज्यते।

(ख) चैट-जीपीटी, एलेक्सा, सिरि इत्यादीनि .......................... इत्यस्य उदाहरणानि सन्ति।

(ग) यः मनुष्यवत् प्रश्नोत्तरं करोति, सः .......................... इति उच्यते।

(घ) यदा पक्षपातयुक्तः दत्तांशः प्रयुज्यते तर्हि कृतकबुद्धिः अपि .......................... करोति।

© NCERT not to be republished

(ङ) ........................... सदैव करुणां, विवेकं च शिक्षयन्ति, कृतकबुद्धिः तु तस्य सहायिका अस्ति।

(च) कृतकबुद्धिः यन्त्राणि अभ्यासेन ........................... प्राप्नुवन्ति।

(छ) मिथ्याचित्रं, मिथ्यावाणी च यदि कृतकबुद्ध्या निर्मीयते तर्हि सः दोषः ........................... इति कथ्यते।

(ज) ड्रोनस्य माध्यमेन बीज-वपनं, भूमिक्षमतापरीक्षणं च ........................... भवति।

(झ) यदा कृतकबुद्धिः विवेकहीनतया उपयुज्यते तर्हि ........................... हानिं प्राप्नोति।

**४. पाठे आगतानां शब्दानाम् आधारेण शब्दजालं प्रदत्तम् अस्ति। अत्र वामतः दक्षिणं (यथा-कृतकबुद्धिः) उपरितः अधः (यथा-डेटासेट्) च उदाहरणानुसारं नूतन-पदानां रेखाङ्कनं कुरुत इति।**

### वर्गचित्रजालम्

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| स्फू | आ | कृ | त | क | बु | द्धिः | च | र्चा |
| र्त | चा | गू | ग | ल | मा | न | चि | त्रः |
| प | र्यः | ग | र | डी | प् | आ | र्ट | क |
| ट | गो | ल | दी | प | म् | ए | आ | ई |
| ल | चै | स | क्षा | फे | सि | रि | डे | जै |
| म् | ट | हा | य | क् | शि | क्षा | टा | म |
| द | जी | य | न्त्रा | धि | ग | मः | से | ना |
| त्तां | पी | कः | र | चै | ट | बो | ट् | ई |
| शः | टी | ए | ले | क्सा | डि | जि | ट | ल् |



© NCERT not to be republished

## ५. अधोलिखितानि वाक्यानि पठित्वा शुद्धम् (✓) अशुद्धं (✗) वा चिनुत—

(क) आर्यः यशिका च विद्यालये कृतकबुद्धेः उपयोगं कुरुत। ( )

(ख) कृतकबुद्धिः केवलं विनोदानुकूलम् उपकरणम् अस्ति। ( )

(ग) अथर्वः अपि शिक्षायां कृतकबुद्धेः प्रयोगं करोति। ( )

(घ) अक्षतः चैट्बोट् इत्यस्य साहाय्येन उपन्यासलेखनं करोति। ( )

(ङ) ए.आइ. डीप्-फेक् इत्यपि कश्चन दुरुपयोगः अस्ति। ( )

(च) आर्यः चित्रनिर्माणाय कृतकबुद्धेः साहाय्यं प्राप्नोति। ( )

(छ) शिक्षकः गम्भीरतया चैट्बोट् वाक्यानां मूल्याङ्कनं करोति। ( )

## ६. एतत् चित्रम् आधारीकृत्य संस्कृतभाषायां पञ्च वाक्यानि रचयत—




(क) ..........

(ख) ..........

(ग) ..........

(घ) ..........

(ङ) ..........

not to be republished © NCERT

## ७. अधोलिखित-वाक्येषु कर्तृपदं-क्रियापदं च चिनुत—

| | कर्तृपदम् | क्रियापदम् |
|---|---|---|
| (क) आर्यः संगणकस्य उपयोगं कुर्वन् आसीत्। | .................. | .................. |
| (ख) यशिका कृतकबुद्धेः उपयुक्तानाम् उपयोगान् वर्णयति। | .................. | .................. |
| (ग) शिक्षकः बालेभ्यः सतर्कतायाः आवश्यकतां सूचयति। | .................. | .................. |
| (घ) अथर्वः अपि कस्यचित् रोबोटिक्-यन्त्रस्य ज्ञानं दत्तवान्। | .................. | .................. |
| (ङ) वेदः अपि कृतकबुद्धेः दोषान् विवेचयति। | .................. | .................. |

## ८. अधोलिखितेषु वाक्येषु विशेषणं विशेष्यं च चिनुत—

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (क) अद्यतनं संगणकयन्त्रम् अतिसक्रियम् अस्ति। | .................. | .................. |
| (ख) वेदस्य गवेषणं गम्भीरम् आसीत्। | .................. | .................. |
| (ग) यशिकायाः प्रस्तुतिः सुबोधा आसीत्। | .................. | .................. |
| (घ) शिक्षकस्य सन्देशः सुस्पष्टः आसीत्। | .................. | .................. |
| (ङ) आर्यस्य दृष्टिकोणः आधुनिकः आसीत्। | .................. | .................. |

© NCERT not to be republished

## स्वाध्यायान्मा प्रमदः

**बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।**
**प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतना॥**
**धीर्धारणावती मेधा सङ्कल्पः कर्म मानसम्।**
**अवधानं समाधानं प्रणिधानं तथैव च॥ (१.५.१-२, *अमरकोशः*)**

बुद्धिः इत्यर्थे अमरकोषे बहवः पर्यायवाचकाः शब्दाः उल्लिखिताः सन्ति। ते यथा— मनीषा, धिषणा, धी, प्रज्ञा, शेमुषी, मति, प्रेक्षा, उपलब्धिः, चित्, संविद्, प्रतिपत्, ज्ञप्तिः, चेतना, धारणावती मेधा च एते सर्वेऽपि शब्दाः स्त्रीलिङ्गे विद्यन्ते।

## यस्तु क्रियावान् मनुजः स विद्वान्

**अधोलिखितेषु क्षेत्रेषु कृतकबुद्ध्या युक्तानाम् उपकरणानां, तन्त्राणाम् अनुप्रयोगाणां च क्षेत्रानुसारं नामानि सङ्गृह्य लिखत।**

शिक्षाक्षेत्रे, चिकित्साक्षेत्रे, वाणिज्ये, सैन्यक्षेत्रे, कृषिक्षेत्रे, मनोरञ्जनक्षेत्रे, वास्तुकलाक्षेत्रे, विधिक्षेत्रे, सामान्यजीवनक्षेत्रे च।

© NCERT not to be republished

## षष्ठः पाठः

# मनःपूतं समाचरेत्

0902CH06




आचार्ये ! अस्मिन् पाठे विविधेभ्यः ग्रन्थेभ्यः सुभाषितानि सङ्कलितानि दृश्यन्ते। किम् एतानि सुभाषितानि वर्तमानसमये अपि उपयोगीनि सन्ति ?
भवन्तः स्वयमेव चिन्तयन्तु।


अहं वदामि आचार्ये ! एतानि सुभाषितानि न केवलं पठनाय अपितु जीवने आचरणाय सन्ति।
सम्यक् उक्तम्। आयान्तु, वयं सुभाषितानि पठामः जीवने च आचरामः।

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत्।
सत्यपूतां वदेत् वाचं मनः पूतं समाचरेत्॥ १॥

(*मनुस्मृति:* — ६.४६)

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥ २॥

(*मनुस्मृति:* — ६.९२)

यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ ३॥

(*श्रीमद्भगवद्गीता* — ३.२१)

अभ्यासेन क्रियाः सर्वाः अभ्यासात् सकलाः कलाः।
अभ्यासाद् ध्यानमौनादि किमभ्यासस्य दुष्करम्॥ ४॥

(*सुभाषितरत्नभाण्डागार:*)

प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारभ्य चोत्तमजनाः न परित्यजन्ति॥ ५॥

(*नीतिशतकम्* — २७)

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः॥ ६॥

(*पञ्चतन्त्रम् — मित्रभेद:* — १४९)





© NCERT not to be republished

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः॥ ७॥

(*मालविकाग्निमित्रम्* — १.२)

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥ ८॥

(*किरातार्जुनीयम्* — २.३०)

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अनुवर्तते (अनु + √ वृत्, लट्.प्र.पु.ए.व.) | अनुसरति | अनुसरण करता है | Follows | |
| अवद्यम् (नञ्-तत्पुरुषः, न+वद्+यत्) | न वद्यम् | निम्नस्तरीय | Inferior | |
| अस्तेयम् (नञ्-तत्पुरुषः, नपुं.प्र.ए.व.) | न स्तेयम् | चोरी न करना | Not stealing | |
| आपदाम् (स्त्री.ष.ब.व.) | विपत्तीनाम् | खतरों का | Of dangerous | |
| उद्योगिनम् (पुं.द्वि.ए.व.) | उद्योगः अस्य अस्ति इति, तम् | प्रयत्न करने वाले को | Industrious | |
| कापुरुषाः (कर्मधारयसमासः, पुं.प्र.ब.व.) | कुत्सिताः पुरुषाः | कायर / अधम | Cowards | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| गुणलुब्धाः (सप्तमीतत्पुरुषः, पुं.प्र.ब.व.) | गुणानाम् अभिलाषिणः, गुणेषु लुब्धाः | गुण को चाहने वाले | Those who desire good qualities | |
| दमः (पुं.प्र.ए.व.) | इन्द्रियाणां मनसः च नियन्त्रणम् | इन्द्रिय एवं मन को वश में करना | Controlling senses | |
| दैवम् (नपुं.प्र.ए.व.) | विधिः / भाग्यम्, देवस्य इदम् | भाग्य | Luck | |
| निहत्य (नि + √हन् + ल्यप्) | अतिक्रम्य | अतिक्रमण करके | Having crossed | |
| नीचैः (कर्मवाच्ये, तृ.ब.व.) | अधमजनैः | अधम लोगों द्वारा | By inferior people | |
| न्यसेत् (नि + √अस् + विधि, प्र.पु.ए.व.) | स्थापयेत् | रखे | Should place | |
| पदम् (नपुं.प्र.ए.व.) | स्थानम् | स्थान | Place | |
| पुराणम् (नपुं.प्र.ए.व.) | पुरातनम् | पुराना | Old | |
| पूतम् (√ पू + क्त, नपुं.प्र.ए.व.) | शुद्धम् | शुद्ध | Cleansed | |
| परप्रत्ययनेयबुद्धिः (बहुव्रीहिः, स्त्री.प्र.ए.व.) | परप्रत्ययेन नेया बुद्धिः यस्य सः | दूसरों के द्वारा निर्देशित बुद्धि वाला | One who is influenced by the thinking of others | |
| प्रतिहन्यमानाः (प्रति + √हन् + यक् शानच्, पुं.प्र.ब.व.) | बाधिताः | बाधित | Obstructed | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| भजन्ते (√ भज् + लट्, प्र.पु.ब.व.) | स्वीकुर्वन्ति | स्वीकारते हैं | Accept | |
| मूढः (पुं.प्र.ए.व.) | मूर्खः | मूर्ख | Fool | |
| यत्ने (पुं.स.ए.व.) | श्रमे | यत्न में | By doing effort | |
| वाचम् (स्त्री.द्वि.ए.व.) | वाणीम् | वाणी को | Speech | |
| विदधीत (वि + √धा + विधिलिङ्, प्र.पु.ए.व.) | कुर्यात् | करना चाहिए | Should be done | |
| विघ्नविहताः (तृतीया-तत्पुरुषः, पुं.प्र.ब.व.) | विघ्नैः विहताः | विघ्नों से हत | Struck by obstacles | |
| विमृश्यकारिणम् (पुं.द्वि.ए.व.) | यः चिन्तयित्वा कार्यं करोति, तम् | भली-भाँति चिन्तन करके कार्य करने वाले को | One who acts thoughtfully | |
| विरमन्ति (वि + √रम् + लट्, प्र.पु.ब.व.) | स्थगनं कुर्वन्ति | छोड़ते हैं | Leave | |
| वृणते (√वृ + लट्, प्र.ब.व.) | आश्रयन्ते | आश्रय लेते हैं | Take refuge | |
| शौचम् (नपुं.प्र.ए.व.) | शुचेः भावः, पावित्र्यम् | पवित्रता | Purity | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| सन्तः (प्र.ब.व.) | सज्जनाः | सज्जन लोग | Great people | |
| सम्पदः (स्त्री.प्र.ब.व.) | ऐश्वर्यम् | सम्पत्ति | Wealth | |

## अत्र इदम् अवधेयम्

### (श्लोकानाम् अन्वयः)

१. दृष्टिपूतं पादं न्यसेत्, वस्त्रपूतं जलं पिबेत्, सत्यपूतां वाचं वदेत्, मनः पूतं समाचरेत्।

२. धृतिः क्षमा दमः अस्तेयं शौचम् इन्द्रियनिग्रहः धीः विद्या सत्यम् अक्रोधः (च इति) दशकं धर्मलक्षणं (भवति)।

३. श्रेष्ठः यत् यत् आचरति इतरः जनः तत् तत् एव (आचरति)। सः यत् प्रमाणं कुरुते, लोकः तत् अनुवर्तते।

४. सर्वाः क्रियाः अभ्यासेन (सिध्यन्ति)। सकलाः कलाः अभ्यासात् (सिध्यन्ति)। ध्यानमौनादि (अपि) अभ्यासात् (सिध्यति)। अभ्यासस्य दुष्करं किम् (अस्ति)?

५. नीचैः विघ्नभयेन (कार्यं) न प्रारभ्यते खलु। मध्याः (कार्यं) प्रारभ्य विघ्नविहताः (कार्यात्) विरमन्ति। उत्तमजनाः (कार्यं) प्रारभ्य विघ्नैः पुनः पुनः अपि प्रतिहन्यमानाः (कार्यं) न परित्यजन्ति।

६. लक्ष्मीः उद्योगिनं पुरुषसिंहम् उपैति, दैवेन देयम् इति (तु) कापुरुषाः वदन्ति, दैवं निहत्य पौरुषं कुरु, यत्ने कृते यदि (कार्यं) न सिध्यति, (तर्हि) अत्र कः दोषः (स्यात्)?

७. पुराणम् इति सर्वं साधु न (वर्तते), काव्यं नवम् इति अवद्यं न (वर्तते), सन्तः परीक्ष्य अन्यतरत् भजन्ते, मूढः परप्रत्ययनेयबुद्धिः (भवति)।

८. क्रियां सहसा न विदधीत, अविवेकः परम् आपदां पदम् (भवति), हि गुणलुब्धाः सम्पदः स्वयमेव विमृश्यकारिणं वृणते।

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

**१. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत—**

(क) लोकः कस्य आचरणम् अनुकरोति?

(ख) कीदृशी वाणी वक्तव्या?

(ग) लक्ष्मीः कम् उपैति?

(घ) उत्तमजनाः कार्यं प्रारभ्य किं न कुर्वन्ति?

(ङ) धर्मस्य लक्षणानि कानि?

(च) सकलाः कलाः कस्मात् सिध्यन्ति?

(छ) सम्पदः कं वृणते?

**२. अधोलिखितेषु श्लोकांशेषु रिक्तस्थानानि पूरयत—**

(क) .................................................. परमापदां पदम्।

(ख) सन्तः .................................................. अन्यतरद् भजन्ते।

(ग) दैवं निहत्य कुरु .................................................. आत्मशक्त्या।

(घ) स यत् .................................................. कुरुते।

(ङ) धीर्विद्या सत्यमक्रोधो .................................................. धर्मलक्षणम्।

**३. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत—**

(क) <u>नीचैः</u> विघ्नभयेन कार्यं न प्रारभ्यते।

(ख) सकलाः कलाः <u>अभ्यासात्</u> सिध्यन्ति।

(ग) <u>वस्त्रपूतं</u> जलं पिबेत्।

(घ) लक्ष्मीः <u>पुरुषसिंहम्</u> उपैति।

(ङ) <u>सन्तः</u> परीक्ष्य अन्यतरद् भजन्ते।

(च) <u>क्रियां</u> सहसा न विदधीत।

© NCERT not to be republished

**४. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत—**

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत्।
सत्यपूतां वदेत् वाचं मनः पूतं समाचरेत्॥

(क) अस्मिन् श्लोके प्रथमं क्रियापदं किम्?

(ख) कं न्यसेत्?

(ग) कीदृशं पादं न्यसेत्?

(घ) द्वितीयं किं क्रियापदम् अस्ति?

(ङ) किं पिबेत्?

(च) कीदृशं जलं पिबेत्?

(छ) तृतीयं किं क्रियापदम् अस्ति?

(ज) कां वदेत्?

(झ) कीदृशीं वाणीं वदेत्?

(ञ) चतुर्थं किं क्रियापदम् अस्ति?

(ट) कथं समाचरेत्?

**५. मञ्जूषातः पदानि चित्वा भावार्थेषु रिक्तस्थानानि पूरयत—**

बुद्धिः, लक्ष्यं, पुरुषस्य, अभिप्रायं, धीराः, नूतनम्

(क) लक्ष्मीः प्रयत्नशीलस्य पराक्रमिणः .............................. समीपं स्वयम् आगच्छति। कापुरुषाः तु 'विधिः एव बलीयान्' इति वदन्ति। ये पौरुषेण परिस्थितिम् अतिक्रम्य कार्याणि साधयन्ति ते एव .............................. । प्रयत्नं कृत्वा अपि यदि .............................. न प्राप्तं तर्हि तत्र दोषः नास्ति खलु।

(ख) पुरातनम् अस्ति इति कारणेन किमपि वस्तु तत्त्वं व्यक्तित्वं वा समीचीनं भवेदेव इति नियमः नास्ति। तथैव ..............................



© NCERT not to be republished

अस्ति इति कारणेन दोषरहितं भवेत् इत्यपि नियमः नास्ति। येषां ........................ पक्वा अस्ति ते परीक्षण-निरीक्षणानन्तरम् एव उत्तमं स्वीकुर्वन्ति। किन्तु अज्ञानाः अन्येषाम् ........................ श्रुत्वा तदनुसारेण प्रवर्तन्ते।

**६. श्लोकानाम् अन्वयेषु रिक्तस्थानानि पूरयत —**

(क) सर्वाः .................. अभ्यासेन (सिध्यन्ति)। .................. कलाः अभ्यासात् (सिध्यन्ति)। ध्यानमौनादि (अपि) .................. (सिध्यति)। अभ्यासस्य .................. किम् (अस्ति)?

(ख) श्रेष्ठः यत् यत् .................. इतरः जनः तत् तत् एव (आचरति)। सः यत् .................. कुरुते, लोकः तत् ..................।

**७. यथोचितं मेलनं कुरुत —**

| श्लोकांशः | स्रोतोग्रन्थः |
|---|---|
| (क) पुराणमित्येव न साधु सर्वम् | १. *मनुस्मृतिः* |
| (ख) प्रारभ्य चोत्तमजनाः न परित्यजन्ति | २. *पञ्चतन्त्रम्* |
| (ग) यद्यदाचरति श्रेष्ठः | ३. *नीतिशतकम्* |
| (घ) धृतिः क्षमा दमोऽस्तेयम् | ४. *मालविकाग्निमित्रम्* |
| (ङ) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः | ५. *श्रीमद्भगवद्गीता* |

**८. रेखाङ्कितेषु पदेषु सन्धिविच्छेदं कुरुत —**

**यथा** — यो <u>बहून्यपि</u> साधयेत् ....बहूनि.... + ....अपि....

(क) धृतिः क्षमा <u>दमोऽस्तेयम्</u>।

.................. + ..................

(ख) पुराणमित्येव न साधु सर्वम्।

.................... + .................... + ....................

(ग) विघ्नैः पुनरपि प्रतिहन्यमानाः।

.................... + ....................

(घ) प्रारभ्य चोत्तमजनाः न परित्यजन्ति।

.................... + .................... + ....................

(ङ) विघ्नविहता विरमन्ति मध्याः।

.................... + ....................

(च) लोकस्तदनुवर्तते।

.................... + .................... + ....................

(छ) सन्तः परीक्ष्यान्यतरद्भजन्ते।

.................... + .................... + ....................

**९. अत्र कतिचन विग्रहवाक्यानि दत्तानि सन्ति। तेषां समस्तपदानि पाठात् चित्वा लिखत —**

| विग्रहवाक्यानि | समस्तपदानि |
|---|---|
| यथा — मनसा पूतं समाचरेत् | ......मनःपूतम्...... |
| (क) विघ्नैः विहताः (कार्यात्) विरमन्ति। | .............................. |
| (ख) वस्त्रेण पूतं जलं पिबेत्। | .............................. |
| (ग) पुरुषः सिंहः इव तम् उपैति लक्ष्मीः। | .............................. |
| (घ) उत्तमाः जनाः न परित्यजन्ति। | .............................. |
| (ङ) न विवेकः परमापदां पदम्। | .............................. |

© NCERT not to be republished

## स्वाध्यायान्मा प्रमदः

अधोलिखितां सारिणीं पठित्वा भारतीय-ज्ञान-परम्परा-विषये, कवीनां कालविषये च जानीत।

| क्र. सं. | ग्रन्थस्य नाम | भारतीय-ज्ञान-परम्परा-स्थानम् | ग्रन्थकर्ता |
|---|---|---|---|
| १. | *रामायणम्* | ऐतिहासिकं काव्यम् | महर्षिः वाल्मीकिः |
| २. | *मनुस्मृतिः* | धर्मशास्त्रीयग्रन्थः | मनुः |
| ३. | *श्रीमद्भगवद्गीता* | ज्ञानोपदेशः | महर्षिः व्यासः |
| ४. | *हठयोगप्रदीपिका* | योग-दर्शनम् | स्वात्मारामः |
| ५. | *नीतिशतकम्* | नीति-साहित्यम् | भर्तृहरिः |
| ६. | *पञ्चतन्त्रम्* | कथा-साहित्यम् | विष्णुशर्मा |
| ७. | *मालविकाग्निमित्रम्* | रूपकम् | कालिदासः |
| ८. | *किरातार्जुनीयम्* | महाकाव्यम् | भारविः |

© NCERT not to be republished

## यस्तु क्रियावान् मनुजः स विद्वान्

१. पाठे आगतेषु सुभाषितेषु कानि-कानि जीवनमूल्यानि सन्ति? तानि जीवनमूल्यानि अधिकृत्य पञ्च पञ्च सुभाषितानि सङ्गृह्णीत। तेषां सन्दर्भग्रन्थानां नामानि अपि लिखत।

२. दृष्टिपूतं, वस्त्रपूतं, सत्यपूतं च आचरणं कथं भवेत् इति विषये स्वस्य अनुभवं कक्षायां कथयत।

## सप्तमः पाठः

0902CH07

# उपायं चिन्तयेत् प्राज्ञस्तथापायं च चिन्तयेत्





कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म। अथ कदाचित्पापबुद्धिना चिन्तितं यदहं तावान्मूर्खो दरिद्रतया पीडितश्च। अत एनं धर्मबुद्धिं स्वीकृत्य अन्यं देशं गच्छामि, तत्र अस्य आश्रयणेन धनं सम्पादयामि, अनन्तरम् एनमपि वञ्चयित्वा सुखी भवामि इति।

अथान्यस्मिन् अहनि धर्मबुद्धिमुपेत्याह—



**पापबुद्धिः** भो मित्र! यदा भवान् वृद्धः भवति तदा 'बाल्ये यौवने वा मया एवं कृतम्' इति वक्तुं योग्यं किं कार्यं स्मरति? भवता अन्यः देशः न दृष्टः एव चेत् भवतः शिशून् अन्यदेशसम्बन्धे कां कथां वदिष्यति? उक्तमेव—

**देशान्तरेषु बहुविधभाषावेषादि येन न ज्ञातम्।**
**भ्रमता धरणीपीठे तस्य फलं जन्मनो व्यर्थम्॥**

एवमेव

**विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक्।**
**यावद् व्रजति न भूमौ देशाद्देशान्तरं हृष्टः॥**

अतः आवां देशान्तरं गत्वा धनम् अर्जयित्वा आगच्छाव इति। अथ तस्य तद्वचनमाकर्ण्य प्रहृष्टमनाः धर्मबुद्धिः आह – अस्तु तावत् गुरुजनाज्ञया गच्छावः। *(ततस्तौ गुरुजनानामनुमतिं प्राप्य शुभेऽहनि देशान्तरं प्रस्थितौ। पापबुद्धिः धर्मबुद्धेः प्रभावेण प्रभूतं धनं सम्पादितवान्)*

**पापबुद्धिः** मित्र! आवाभ्यामिदानीं प्रचुरं धनमुपार्जितम्। अत्रागत्य वर्षाणि व्यतीतानि, सर्वं धनं स्वीकृत्य स्वग्रामं गच्छावः।

© NCERT not to be republished



**धर्मबुद्धिः** अथ किम्। तथैवास्तु।

*(यदा तौ स्वनगरसमीपमागतवन्तौ तदा)*

**पापबुद्धिः** भद्र! एतत् सर्वं धनं गृहं प्रति नेतुं न उचितम्। अतः एतद् धनमत्रैव गहनारण्ये कुत्रापि भूमौ निक्षिप्य किञ्चिन्मात्रमादाय गृहं प्रविशावः।

**धर्मबुद्धिः** सत्यमेवाभिहितं भवता, तथैव कुर्वः। यथा द्वाभ्यां चिन्तितं तथैव भूमिं खनित्वा तत्रैव धनं निक्षिप्य स्वगृहं गतवन्तौ। अन्यस्मिन्नहनि पापबुद्धिः निशीथे अटव्यां गत्वा तत्सर्वं वित्तं समादाय गर्तं पूरयित्वा स्वभवनं गतवान्।

*(अथ कतिचिद्दिनानन्तरम्)*



© NCERT not to be republished



**पापबुद्धिः** सखे ! मम कुटुम्बे बहवः जनाः सन्ति, धनाभावात् कष्टम् अनुभवामि। अतः तत्र गत्वा किञ्चिन्मात्रं धनमानयावः।

**धर्मबुद्धिः** अस्तु मित्र ! गच्छावः।

*(अथ द्वावपि गत्वा तत्स्थानं यावत् खनतः तावद्रिक्तं भाण्डं दृष्टवन्तौ। अत्रान्तरे पापबुद्धिः शिरस्ताडयन् उक्तवान्)*

**पापबुद्धिः** भोः धर्मबुद्धे! त्वयैवापहृतम् एतद्धनं, नान्येन। तत्प्रयच्छ मे तदर्धम्। अन्यथा अहं राजकुले निवेदयिष्यामि।

**धर्मबुद्धिः** भोः दुरात्मन्! मा मैवं वद। धर्मबुद्धिः खल्वहम्। नैतत् चौरकर्म करोमि।

**मातृवत्परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत्सर्वभूतेषु वीक्षन्ते धर्मबुद्धयः॥**

*(एवं द्वावपि विवदमानौ धर्माधिकारिणं निकषा गतौ)*

**धर्माधिकारी** ननु न कोऽपि साक्षी युवाभ्यामन्यतरस्य चौरकर्मणः। अतः यत्र मानुषप्रमाणम् अनुपलब्धं तत्र वनदेवता एव न्यायनिर्णयं करिष्यति। अतः प्रातःकाले युवामस्माभिः सह तत्र वनप्रदेशं गच्छतम्। तत्रैव निर्णयः भविष्यति।

*(अत्रान्तरे पापबुद्धिः गृहं गत्वा स्वजनकं प्रबोधितवान्)*

**पापबुद्धिः** तात! मया धर्मबुद्धेः प्रभूतः अर्थः चोरितः। भवान् यदि मदुक्तप्रकारेण वदति तर्हि तद्धनं मयि स्थिरं तिष्ठति, अन्यथास्माकं प्राणैः सह यास्यति।

© NCERT not to be republished

**पिता** वत्स ! द्रुतं वद,अहं किं करवाणि येन तद्द्रव्यं स्थिरं तिष्ठेत्।

**पापबुद्धिः** तात ! अस्ति वनप्रदेशे महाशमी नाम वृक्षः। तस्मिन् महाकोटरम् अस्ति। तत्र भवान्साम्प्रतमेव प्रविशतु। ततः प्रभाते यदाहं सत्यश्रावणाय निवेदयामि, तदा भवता वक्तव्यं यद् धर्मबुद्धिः चौर इति।

*(तथा कृते, प्रातःकाले स्नात्वा पापबुद्धिः धर्मबुद्धिना धर्माधिकारिणा च सह न्यायार्थं वनदेवतायाः समीपमुपागतः। अन्येऽपि सामाजिकाः तद्द्रष्टुमागताः)*

**पापबुद्धिः**

**आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च।**
**अहश्च रात्रिश्च उभे च संध्ये धर्मो हि जानाति नरस्य वृत्तम्॥**

भगवति वनदेवते ! आवयोर्मध्ये यः चौरः त्वं कथय।

**पिता शमीकोटरस्थः** भोः ! शृणुत, शृणुत ! धर्मबुद्धिना हृतम् एतद्धनम्।

*(तद् आकर्ण्य ते सर्वे जनाः विस्मयेन उत्फुल्ललोचनाः सञ्जाताः)*

**सर्वे जनाः** धनापहरणदोषहेतोः शास्त्रविहितप्रकारेण धर्मबुद्धये दण्डः दातव्यः।



© NCERT not to be republished

**धर्मबुद्धिः** इदं मिथ्याभाषितमस्ति। नाहं चोरितवान्। अहम् एतत् शमीकोटरं वह्निभोज्यद्रव्यैः परिवेष्ट्य वह्निना प्रज्वालयामि। *(तथा करोति)* *(अथ ज्वलति तस्मिन् शमीकोटरे अर्धदग्धशरीरः स्फुटितेक्षणः करुणं विलपन् पापबुद्धिपिता बहिरागतः)*

ततश्च

**जनाः** *(साश्चर्यम्)* भोः ! किमिदम्? किमिदम्?

**पिता पापबुद्धेः** एतत् सर्वमपि पापबुद्धेः चेष्टितम्। *(इत्युक्त्वा मृतः)*

**धर्माधिकारी** एष पापबुद्धिः दण्डनीयः।

*(राजपुरुषाः नियमानुसारं पापबुद्धिं दण्डितवन्तः धर्मबुद्धिं प्रशंसितवन्तः च)*

**सर्वे जनाः** भो धर्मबुद्धे! त्वया सम्यक् कृतम्। पापबुद्धेः व्यर्थपाण्डित्यात् पिता वह्निना घातितः। अतः साधूक्तम्—

**उपायं चिन्तयेत् प्राज्ञस्तथापायं च चिन्तयेत्।**

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अटव्याम् (स्त्री.स.ए.व.) | वने | जंगल में | In the forest | |
| अपायम् (पुं.द्वि.ए.व.) | विघ्नम् | समस्या/संकट | Problem | |
| अहनि (अहन्, नपुं.स.ए.व.) | दिवसे | दिन के समय | During the day | |
| आपः (स्त्री.प्र.ब.व.) | जलम् | जल | Water | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| उत्फुल्ललोचनाः (बहुव्रीहिः, पुं.प्र.ब.व.) | उत्फुल्लानि लोचनानि येषां ते | आश्चर्य से फटी हुई आँखों वाले | With surprise | |
| खनित्वा (√ खन् + क्त्वा) | खननं कृत्वा | खोद कर | Having dug | |
| द्यौः (स्त्री.प्र.ए.व.) | आकाशः | आकाश | Sky | |
| धरणीपीठे (षष्ठी तत्पुरुषः, नपुं.स.ए.व) | धरण्याः पीठे | धरती पर | On the earth | |
| निक्षिप्य (नि + √ क्षिप् + ल्यप्) | स्थापयित्वा | रखकर | Having kept | |
| निशीथे (पुं.स.ए.व.) | अर्धरात्रे | आधी रात में | At midnight | |
| परिवेष्ट्य (परि + √ वेष्ट् + ल्यप्) | आवृत्य | घेरकर | Encircling | |
| प्रहृष्टमनाः (बहुव्रीहिः, पुं.प्र.ब.व) | प्रहृष्टं मनः यस्य सः | प्रसन्न मन वाला | Joyful minded | |
| भाण्डम् (नपु.द्वि.ए.व.) | पात्रम् | घड़े को | Pot | |
| यास्यति (√या + लृट्, प्र.पु.ए.व.) | गमिष्यति | जाएगा | Will go | |
| वञ्चयित्वा, (√ वञ्च् + क्त्वा) | वञ्चनं कृत्वा | ठग कर | Having Deceived | |
| वीक्षन्ते (वि + √ ईक्ष्, लट्, प्र.पु.ब.व.) | पश्यन्ति | देखते हैं | See | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| व्रजति (√ व्रज्, लट्, प्र.पु.ए.व.) | गच्छति | जाता है | He goes | |
| लोष्ठवत् (लोष्ठ + वत्) | पाषाणखण्डवत् | पत्थर के टुकड़े के समान | Like a stone | |
| स्फुटितेक्षणः (बहुव्रीहिः, पुं.प्र.ब.व) | स्फुटिते इक्षणे यस्य सः | नष्ट हुई आँखों वाला | One with damaged eyes | |

## अत्र इदम् अवधेयम्

### नित्यबहुवचनान्तशब्दाः

संस्कृतभाषायाम् अनेकेशब्दाः नित्यबहुवचनान्ताः भवन्ति। यथा— आपः (Water), दाराः (Wife), लाजाः (Puffed Rice), अक्षतानि (Rice-grains), गृहाः (Wife / House), प्राणाः (Life-force), असवः (Life-force), वर्षाः (Rain), समाः (Rain), सिकताः (Sand), कति (How many), यति (As many), तति (So many), त्रि-आरभ्य संख्याः (यथा—त्रयः / तिस्त्रः / त्रीणि, चत्वारः / चतस्त्रः / चत्वारि, पञ्च, षट् इत्यादयः)। अत एव आदित्यचन्द्रावनिल..... इति पाठगते श्लोके अनिलः, अनलः, द्यौः, भूमिः इति शब्दाः एकवचने विद्यन्ते, परन्तु आपः इति शब्दः बहुवचने।

### विशेषणानि विशेष्याणि च

प्रहृष्टमनाः पापबुद्धिः—अत्र पापबुद्धिः विशेष्यपदम् प्रहृष्टमनाः विशेषणं च भवति। विशेषण-विशेष्याणां मध्ये लिङ्ग-विभक्ति-वचनसम्बन्धोऽस्ति। यथा—

| | | |
|---|---|---|
| नूतनं भवनम् | नूतनः विद्यालयः | (लिङ्ग सम्बन्धः) |
| चतुरः बालः | चतुराः बालाः | (वचन सम्बन्धः) |
| बुद्धिमती गृहिणी | बुद्धिमत्या गृहिण्या | (विभक्ति सम्बन्धः) |

© NCERT not to be republished

**सर्वनामशब्दाः अपि विशेषणानि भवन्ति।**

यथा पाठे—एतेन धनेन, एनं धर्मबुद्धिम्, यः चौरः, तस्मिन् वृक्षे, कां कथाम्, एतत् चौरकर्म।

एतेषाम् अपि विशेष्यपदेन सह लिङ्ग-विभक्ति-वचन सम्बन्धः अस्ति। यथा—

| | | |
|---|---|---|
| एषः पिता | एषा माता | एतत् मित्रम् |
| कः समर्थः ? | का चतुरा ? | किम् उत्तमम् ? |

## अभ्यासाद् जायते सिद्धिः

**१. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत—**

(क) नरस्य वृत्तं के जानन्ति ?

(ख) धर्मबुद्धयः किं वीक्षन्ते ?

(ग) कस्य जन्मनः फलं व्यर्थम् ?

(घ) पापबुद्धिः स्वपितरं किम् उक्तवान् ?

(ङ) प्राज्ञः किं-किं चिन्तयेत् ?

(च) मानवः कदा विद्यां वित्तं शिल्पं च प्राप्नोति ?

(छ) पापबुद्धिः किं चिन्तयित्वा देशान्तरं प्रस्थितः ?

**२. अधोलिखितवाक्येषु स्थूलाक्षरपदानि आश्रित्य प्रश्ननिर्माणं कुरुत—**

(क) **एनम्** अपि वञ्चयित्वा सुखी भवामि।

(ख) सर्वं धनं स्वीकृत्य **स्वग्रामं** गच्छावः।

(ग) **निशीथे** अटव्यां गत्वा तत् सर्वं वित्तम् आनीतवान्।

(घ) तत् आकर्ण्य सर्वे ते जनाः **विस्मयोत्फुल्ललोचनाः** सञ्जाताः।

(ङ) अहम् एतत् शमीकोटरं **वह्निना** प्रज्वालयामि।

© NCERT not to be republished

३. **अधोलिखितानि वाक्यानि कः कं प्रति कथयति इति लिखत—**

| | कः | कं प्रति |
|---|---|---|
| (क) वत्स ! द्रुतं वद येन तद् द्रव्यं स्थिरं तिष्ठेत्। | ............... | ............... |
| (ख) प्रातःकाले युवामस्माभिः सह तत्र वनप्रदेशं गच्छतम्। | ............... | ............... |
| (ग) त्वया हृतम् एतद्धनं, नान्येन । | ............... | ............... |
| (घ) भोः दुरात्मन्! मा मैवं वद। | ............... | ............... |
| (ङ) एतत् सर्वमपि पापबुद्धेः चेष्टितम्। | ............... | ............... |

४. **उदाहरणानुसारं भूतकालिकवाक्यानि वर्तमानकालिकवाक्येषु परिवर्तयत—**

| भूतकालिकवाक्यानि | वर्तमानकालिकवाक्यानि |
|---|---|
| उदाहरणम्— भवानपि मया सहैव प्रभूतं धनं प्राप्तवान्। | भवानपि मया सहैव प्रभूतं धनं प्राप्नोति। |
| (क) राजपुरुषाः पापबुद्धिं दण्डितवन्तः। | ................................ |
| (ख) पापबुद्धिः अत्यधिकं धनं सम्पादितवान्। | ................................ |
| (ग) पापबुद्धिः वनदेवतायाः समीपम् आगतवान्। | ................................ |
| (घ) अत्रान्तरे पापबुद्धिः शिरस्ताडयन् उक्तवान्। | ................................ |
| (ङ) सर्वे जनाः धर्मबुद्धिं प्रशंसितवन्तः। | ................................ |

© NCERT not to be republished

५. **श्लोकानां भावार्थान् विचिन्त्य कोष्ठकात् समुचितपदैः रिक्तस्थानानि पूरयत—**

(क) सूर्यः चन्द्रः ………… अग्निः आकाशः भूमिः जलं ………… यमः दिवसः रात्रिः प्रभातं सायं च मनुष्याणां सर्वविधं ………… जानन्ति। अतः वयं सर्वदा उत्तमं व्यवहारं कुर्मः। (व्यवहारं / पवनः / हृदयं)

(ख) यः ………… न अटति, विविधदेशानां संस्कृतीः ………… च न जानाति, पृथिवीपृष्ठे तस्य जन्म ………… भाति। (भाषाः / व्यर्थं / अन्यदेशेषु)

(ग) सज्जनाः सर्वासु नारीषु ………… इव, अन्येषां ………… मृत्पिण्डम् इव, सर्वेषु प्राणिषु च ………… इव चिन्तयन्ति। (द्रव्येषु / स्वयम् / मातरः)

(घ) बुद्धिमान् मनुष्यः ………… मार्गान् समस्यादूरीकरणस्य ………… च …………। (कौशलानि / कार्यसाधनस्य/ जानीयात्)

६. **उदाहरणं दृष्ट्वा अधोलिखितानां पदानां विग्रहं मेलनं वा कुरुत—**

| | |
|---|---|
| उदाहरणम्— अर्थोपार्जनम् | ……अर्थस्य उपार्जनम्…… |
| (क) गुरुजनाज्ञया | ……………………………… |
| (ख) वनदेवता | ……………………………… |
| (ग) ……………………………… | वित्तस्य अभावात् |
| (घ) बुद्धिप्रभावेण | ……………………………… |
| (ङ) ……………………………… | धरण्याः पीठे |
| (च) राजकुले | ……………………………… |

७. **अधोलिखितानि वाक्यानि कथाक्रमानुसारं पुनः लिखत—**

(क) भवान् यदि मदुक्तप्रकारेण वदति तर्हि तद्धनं मयि स्थिरं तिष्ठति।

(ख) ततस्तौ गुरुजनानाम् अनुमतिं प्राप्य शुभेऽहनि देशान्तरं प्रस्थितौ।



© NCERT not to be republished

(ग) द्वावपि गत्वा तत् स्थानं यावत् खनतः तावद् रिक्तं भाण्डं दृष्टवन्तौ।

(घ) कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म।

(ङ) यथा द्वाभ्यां चिन्तितं तथैव भूमिं खनित्वा तत्रैव धनं निक्षिप्य स्वगृहं गतवन्तौ।

(च) राजपुरुषाः पापबुद्धिं दण्डितवन्तः।

## स्वाध्यायान्मा प्रमदः

१. **पञ्चतन्त्रम्** — *पञ्चतन्त्रं* नीतिशिक्षाप्रदानां रोचकानां कथानां सङ्ग्रहः वर्तते। अस्य ग्रन्थस्य लेखकः विष्णुशर्मा अस्ति। पशुपक्षिणां कथामाध्यमेन *नीतिशास्त्रस्य* गहनतत्त्वमपि सरलतया अत्र शिक्षितम्। अस्मिन् ग्रन्थे कथाः पञ्चसु तन्त्रेषु विभक्ताः सन्ति। यथा — मित्रभेदः, मित्रसम्प्राप्तिः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं चेति। प्रस्तुतकथा मित्रभेदः इति प्रथमतन्त्रात् स्वीकृता।

२. **क्तवतुप्रत्ययः** — भूतकालार्थे कर्तरि धातोः क्तवतुप्रत्ययस्य प्रयोगः भवति। क्तवतुप्रत्ययान्तपदानि विशेषणपदत्वेन प्रयुज्यन्ते। कर्तृपदानुसारं क्तवतुप्रत्ययान्तपदानां लिङ्गवचननिर्धारणं भवति।

**यथा** —

| धातुः + प्रत्ययः | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| पठ् + क्तवतु | बालकः पठितवान् | बालिका पठितवती | मित्रं पठितवत् |
| खाद् + क्तवतु | बालकः खादितवान् | बालिका खादितवती | मित्रं खादितवत् |
| कृ + क्तवतु | बालकः कृतवान् | बालिका कृतवती | मित्रं कृतवत् |

© NCERT not to be republished

**उदाहरणवाक्यानि —**

(क) ह्यः शिक्षकः पञ्च श्लोकान् पाठितवान्।

(ख) गतशनिवासरे छात्राः विद्यालयपरिसरे स्वच्छतां कृतवन्तः।

(ग) माता प्रातः स्वल्पाहारं दत्तवती।

(घ) गतवर्षे वार्षिकोत्सवे नवमकक्षायाः छात्राः नाटके अभिनीतवन्तः।

(ङ) गतसप्ताहे वयं जयपुरं गतवन्तः।

३. **तत्पुरुषसमासः** — द्वयोः पदयोः,अनेकेषां पदानां वा एकपदीकरणं भवति समासः। तत्पुरुषसमासे उत्तरपदस्य प्रधानता भवति। यस्य पदस्य क्रियया सह सम्बन्धः भवति तत् पदं प्रधानम् इत्युच्यते। पूर्वपदस्य विभक्तीनां लोपः क्रियते। यस्याः विभक्तेः लोपं कृत्वा पदमेलनं भवति तन्नाम्ना एव तस्य तत्पुरुष-समासस्य नाम भवति।

**यथा —**

| | |
|---|---|
| शरणम् आगतः – शरणागतः | द्वितीयातत्पुरुषः |
| सुखेन अन्वितः – सुखान्वितः | तृतीयातत्पुरुषः |
| छात्रेभ्यः हितम् – छात्रहितम् | चतुर्थीतत्पुरुषः |
| रोगात् भयम् – रोगभयम् | पञ्चमीतत्पुरुषः |
| देशस्य भक्तः – देशभक्तः | षष्ठीतत्पुरुषः |
| कार्ये कुशलः – कार्यकुशलः | सप्तमीतत्पुरुषः |

## यस्तु क्रियावान् मनुजः स विद्वान्

१. पुस्तकालयात् *पञ्चतन्त्रस्य* पुस्तकं स्वीकृत्य एकां कथां पठत। तस्याः कथायाः सारांशं संस्कृतेन लिखित्वा कक्षायां श्रावयत।

२. कक्षायां छात्राः अध्यापकस्य साहाय्येन कथाधारितस्य नाटकस्य प्रस्तुतिं कुर्वन्तु।

© NCERT not to be republished

## अष्टमः पाठः

# अन्नाद् आनन्दं प्रति

संस्कृतवाङ्मये उपनिषत्-साहित्यस्य विशिष्टं महत्त्वपूर्णं च स्थानम् अस्ति। उपनिषत्सु अनेके ज्ञानप्रदाः संवादाः सन्ति। *तैत्तिरीयोपनिषदि* समग्रजीवनविकासाय पञ्चकोषाणां महत्त्वं पितापुत्रसंवादरूपेण वर्णितम्। तादृशज्ञानप्रदसंवादानाम् अध्ययनेन बोधनेन च वयम् आत्मविकासं कर्तुं शक्नुमः। अस्मिन् पाठे वयम् पितापुत्रयोः भृगुवरुणयोः संवादं पठिष्यामः।

*(एकदा ब्रह्मज्ञानाय तत्परः वरुणस्य पुत्रः भृगुः सविनयं पितरं प्रति गत्वा निवेदयति)*



**भृगुः** अयि भोः पितः! अभिवादयेऽहं सादरम्। भगवन्! ब्रह्मविषये मयि काचिद् जिज्ञासा **वर्तते**। किं तद् ब्रह्म येन सर्वं जगदिदं सञ्चाल्यते? कृपया उपदिशतु।

**वरुणः** पुत्र! शुभं भूयात्। ब्रह्मज्ञानाय त्वया स्वयमेव अन्वेषणं **क्रियताम्**। यत्नः अभ्यासश्च **क्रियेताम्**। तपस्तप्यताम्। तपसैव ज्ञायते।



© NCERT not to be republished

**भृगुः** अस्तु तात!

*(ततो भृगु: अनेकवर्षाणि तप आचरति। तपस्तप्त्वा पुन: पितरं निकषा गच्छति। पिता तं पृच्छति—)*

**वरुणः** अयि पुत्र! त्वया किं ज्ञातम्?




**भृगुः** भो: पित:! **अन्नं वै ब्रह्म** इति।

**वरुणः** कथम् अन्नं ब्रह्मरूपेण ज्ञातम्?

**भृगुः** हे पित:! अन्नाद् एव प्राणिन: जायन्ते। अन्नेन एव प्राणिनः जीवन्ति। अन्नेनैव शरीरं बलं च वर्धेते। अतोऽन्नं ब्रह्म इति। उच्यते हि—

**आहारात् सर्वभूतानि सम्भवन्ति महीपते।**
**आहारेण विवर्धन्ते तेन जीवन्ति जन्तव: ॥**

**वरुणः** पुत्र! त्वया सम्यग् अवबुद्धम्। अत उच्यते— अन्नं हि भूतानां ज्येष्ठम्। तस्मात् (अन्नं) सर्वौषधम् इति उच्यते। अत: कदापि अन्नं न निन्द्यात्। अन्नं सदा ईश्वरबुद्ध्या सेवताम्। कदापि अन्नं न परिहर्तव्यम्। प्रयत्नेन अन्नं बहु कुर्वीत। सर्वदा सात्त्विकं हितकारकं च आहारं सेवताम्। परं च हे वत्स! ब्रह्म ज्ञातुम् इतोऽपि यतताम्। तपः कुरुताम्।

**भृगुः** अस्तु तात!

*(पुन:भृगु: पर्वतं गत्वा बहूनि वर्षाणि तप आचरति। तपस्तप्त्वा पितु: समीपं गच्छति। आगतं पुत्रं दृष्ट्वा पिता पृच्छति)*




**वरुणः** हे पुत्र! तपसा त्वया किं ज्ञातम्?

© NCERT not to be republished

**भृगुः** हे पितः! **प्राणो वै ब्रह्म** इति।

**वरुणः** हे भृगो! कथं प्राणो ब्रह्म इति ज्ञातम्?

**भृगुः** हे भगवन्!

**प्राणो हि भूतानाम् आयुः। प्राणे शरीरं प्रतिष्ठितम्।**

प्राण एव अस्माकं जीवनम्। प्राणेन विना शरीरं क्रियाशून्यं भवति। अतः **प्राणो ज्येष्ठः श्रेष्ठश्च**। तस्मात् **प्राणो वै ब्रह्म** इति विज्ञातम्।

**वरुणः** पुत्र! त्वया सत्यम् **उदीरितम्। प्राणाद् एव इमानि भूतानि जायन्ते**। प्राणेन जातानि जीवन्ति। प्राणशक्त्या एव शारीरिकक्रियाशक्तेर्विकासो भवति। अत एव प्राणः सर्वथा **रक्षणीयः**। तस्मात् प्राणविकासाय प्रतिदिनं प्राणायामः **कर्तव्यः**। उक्तं हि—

**यावद् वायुः स्थितो देहे तावज्जीवनमुच्यते।**
**मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत्॥**

पुत्र! भवान् तपसा प्राणतत्त्वस्य महत्त्वं ज्ञातवान्। किन्तु ब्रह्मज्ञानाय इतोऽपि कठोरं तपः **कुरुताम्**।






not to be republished © NCERT

**भृगुः** अस्तु पितः !

*(सः पुनः बहुकालं यावद् वनं गत्वा तपश्चर्यां* **कुरुते**। *तपस्तप्त्वा प्रसन्नवदनो वरुणं निकषा प्राप्नोति, वरुणः भृगुं पृच्छति —)*

**वरुणः** हे पुत्र ! त्वया तपसा किं **ज्ञातम्**?

**भृगुः** हे तात ! मया तपसा **मनो वै ब्रह्म इति ज्ञातम्**।

**वरुणः** पुत्र ! कथं मनो वै ब्रह्म इति ?

**भृगुः** हे पितः ! मया तपसा एवम् **अनुभूतं** यद् अस्माकं मन एव सर्वकर्मणः प्रवर्तकम्। समस्तानि इन्द्रियाणि अपि मनसा सञ्चाल्यन्ते। मानवः मनसा एव सर्वं कार्यं सम्पादयति। मनसः सङ्कल्पाः, भावाः, विचाराश्च **जायन्ते**। अतो **मनो वै ब्रह्म** इति।

**वरुणः** हे वत्स ! त्वया सम्यग् अनुभूतं यद् मन एव सर्वमिति। अत उपनिषदि उच्यते—

**कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा**
**धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव।**

वत्स ! मानवः चिन्तनशक्त्या मननशक्त्या दृढसङ्कल्पशक्त्या च सर्वं लब्धुं शक्नोति। अतो मनसः शक्तिप्राप्तये मनः सदा सत्कर्मणा **साधनीयम्**। शोकादिरहितम् उत्साहयुक्तं शान्तं च **करणीयम्**। आहारशुद्धिश्च **करणीया**। किञ्च हे पुत्र ! ब्रह्मज्ञानाय इतोऽपि **प्रयतस्व**।

**भृगुः** अस्तु श्रीमन् !

*(पुनः भृगुः बहुकालं यावत् कठोरं तपः कुरुते, तपः कृत्वा पितुः समीपं प्राप्नोति, पिता तं पृच्छति)*

**वरुणः** हे भृगो ! तपसा किम् अनुभूतम् ?

**भृगुः** हे पितः! मया तपसा सूक्ष्मज्ञानेन च इदं ज्ञातं यद् **विज्ञानं वै ब्रह्म** इति।

© NCERT not to be republished

**वरुण:** पुत्र ! किं नाम विज्ञानम् ?

**भृगु:** हे भगवन् ! बुद्धितत्त्वमेव विज्ञानम्।

**वरुण:** पुत्र ! कथं विज्ञानं (बुद्धितत्त्वम्) ब्रह्म इति विज्ञातम् ?



**भृगु:** हे पित: ! बुद्धितत्त्वं विना अस्माकं बोधशक्ते:, तर्कशक्ते:, विवेकशक्ते:, निर्णयशक्ते:, स्मृतिशक्तेश्च विकासो न भवति। बुद्धिरेव सारथिरूपेण अस्मान् कर्मणि प्रवर्तयति। समग्रज्ञानं बुद्धौ एव **विद्यते**। अत एव **विज्ञानं वै ब्रह्म** इति।

**वरुण:** पुत्र ! सत्यं **भाषसे**। अत: बौद्धिकविकासाय विज्ञानमयकोषस्य विकास: कर्त्तव्य:। तदर्थं प्रतिदिनं ध्यानं योगासनं च कर्तव्यम्। किञ्च यदि ब्रह्मण: स्वरूपं वेत्तुम् इच्छति तर्हि इतोऽपि **प्रयतताम्**, **अन्विष्यतां च**।




**भृगु:** अस्तु श्रीमन् !

*(भृगु: पुन: बहुकालं यावत् तपश्चर्यां करोति। तपस्तप्त्वा प्रसन्नमुखेन पितु: निकटे समुपस्थितो भवति।)*

**वरुण:** भो: वत्स ! तपसा त्वया किं विज्ञातम् ?

**भृगु:** हे भगवन् ! अत्यन्तं सूक्ष्मचिन्तनेन तपसा च मया एवम् अवबुद्धम् **आनन्दो वै ब्रह्म** इति।

**वरुण:** हे पुत्र ! कथम् **आनन्दो वै ब्रह्म इति** ?

**भृगु:** हे पित: ! अस्माकं सर्वकर्माणि आनन्दाय भवन्ति। अस्माकं कर्मणो लक्ष्यम् आनन्दप्राप्तिरेव। आनन्देन एव प्राणिनो जीवन्ति। आनन्देन रहितं जीवनं मृत्युरूपमिति। तस्मात् **आनन्दो वै ब्रह्म** इति।



**वरुण:** हे वत्स ! त्वया सत्यं **प्रकटितम्**। अत: आनन्दप्राप्तये प्रतिदिनं ध्यानं योगासनं च **कर्तव्यम्**। प्राणिषु दया **कर्तव्या**। परोपकार: **कर्तव्य:**। राग:, द्वेष:, ईर्ष्या, क्रोध:, लोभ:, मोहश्च **हातव्या:**। सर्वदा ईश्वरं **सेवतां** मोदतां च।

**भृगु:** अस्तु श्रीमन् ! तथैव आचरामि।

**वरुण:** हे पुत्र ! त्वं तपसा सूक्ष्मविज्ञानेन च अन्नस्य, प्राणस्य, मनस:, विज्ञानस्य, आनन्दस्य च महत्त्वं ज्ञातवान्। एतै: पञ्चभिरेव अस्माकं पूर्णविकासो भवति, अत: एते ब्रह्मपदेन व्यवह्रियन्ते। ब्रह्मण: स्वरूपं तु ततोऽपि परे अस्ति। एतानि ब्रह्मज्ञानाय द्वाराणि सन्ति। यदि एतेषां क्रमशो विकासं करिष्यसि तर्हि ब्रह्मण: स्वरूपबोधो भविष्यति। उक्तञ्च—

**आहारशुद्धौ सत्त्वशुद्धि: सत्त्वशुद्धौ ध्रुवा स्मृति:।**
**स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष: इति**

**भृगु:** अस्तु श्रीमन् ! अनुगृहीतोऽस्मि।

© NCERT not to be republished

# सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अन्वेष्टव्यम् (अनु + √इष् + तव्यत्, नपुं.प्र.ए.व.) | अनुसन्धेयम् | खोज करनी चाहिए | Explore | |
| अवबुद्धम् (अव + √बुध् + क्त, नपुं.प्र.ए.व.) | ज्ञातम् | समझा गया | Understood | |
| उदीरितम् (उद् + √ईर् + क्त, नपुं.प्र.ए.व.) | उक्तम् / प्रकटितम् | कहा गया | Spoken | |
| कामः (पुं.प्र.ए.व.) | इच्छा | इच्छा | Desire | |
| कुर्वीत (√कृ, विधिलिङ्, आ.प्र.पु.ए.व.) | कुर्यात् | करना चाहिए | Should do | |
| धृतिः (स्त्री.प्र.ए.व.) | धैर्यम् | धैर्य | Courage | |
| धीः (स्त्री.प्र.ए.व.) | बुद्धिः | बुद्धि | Intelligence | |
| निष्क्रान्तिः (निस् + √क्रम् + क्तिन्, स्त्री.प्र.ए.व.) | बहिर्निर्गमनम् | बाहर जाना | Going out | |
| परिहर्तव्यम् (परि + √हृ + तव्यत्, नपुं.ए.व.) | त्यक्तव्यम् | त्याग करना चाहिए | To be discarded | |
| प्रकटितम् (प्र + √कट् + क्त, नपुं.प्र.ए.व.) | प्रकाशितम् | प्रकट हुआ | Revealed | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| प्राणः (पुं.प्र.ए.व.) | प्राणवायुः | प्राण वायु | Life-breathe | |
| ब्रह्म (नपुं.प्र.ए.व.) | परमात्मा/ ईश्वरः | परमात्मा | Supreme being | |
| भूतानि (नपुं.प्र.ब.व.) | प्राणिनः | प्राणी जन | Living beings | |
| विचिकित्सा (स्त्री.प्र.ए.व.) | सन्देहः | सन्देह | Doubt | |
| विज्ञानम् (नपुं.प्र.ए.व.) | बुद्धिः | बुद्धि | Intellect | |
| विप्रमोक्षः (वि + प्र + मोक्षः) | अत्यन्त मोक्षः | अत्यन्त मोक्ष | Final liberation | |
| विवर्धन्ते (वि + √वृध् + लट्, आ. प्र.पु.ब.व.) | विशेषेण वृद्धिं प्राप्नुवन्ति | विशेष रूप से वृद्धि को प्राप्त होते हैं | Grow | |
| श्रद्धा (स्त्री.प्र.ए.व.) | आदरः | निष्ठा | Faith | |
| सङ्कल्पः (पुं.प्र.ए.व.) | प्रतिज्ञा | सङ्कल्प | Come into being | |
| सम्भवन्ति (सम् + √भू + लट्, प्र.पु.ब.व.) | जायन्ते | उत्पन्न होते हैं | Arise | |
| सर्वग्रन्थीनाम् (पुं.ष.ब.व.) | सर्वेषां ग्रन्थीनाम् (सन्देहानाम्) | सभी गाँठ (सन्देहों के) | Of all the doubts | |
| साधनीयम् (√साध् + अनीयर्, नपुं.प्र.ए.व.) | संस्करणीयम् | संस्कार करना चाहिए | Should be achieved | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| स्मृतिलम्भे (षष्ठी-तत्पुरुषः, पुं.स.ए.व.) | स्मृतेः लम्भे (ध्रुवस्मृतेः प्राप्तौ) | ध्रुवस्मृति (आत्मज्ञान) की प्राप्ति होने पर | Obtaining the everlasting memory or self actualization | |
| हातव्याः (√हा + तव्यत्, पुं.प्र.ब.व.) | त्यक्तव्याः | त्याग करना चाहिए | Should be sacrificed | |
| ह्रीः (स्त्री.प्र.ए.व.) | लज्जा | लज्जा | Modesty | |

## अत्र इदम् अवधेयम्

मानव: क्रमश: शरीरेण, प्राणेन, मनसा, बुद्ध्या, अध्यात्मशक्त्या च पूर्णविकासं लभते। अत: समग्रजीवनविकासाय (१) अन्नमयकोष:, (२) प्राणमयकोष:, (३) मनोमयकोष:, (४) विज्ञानमयकोष:, (५) आनन्दमयकोष इति पञ्चकोषा: शास्त्रेषु वर्णिता:। एतेषामेव महत्त्वम् अस्मिन् पाठ्यक्रमे वर्णितम्। मानव: पञ्चकोषविवेकत: समग्रं विकासं प्राप्नोति। एतेषां पञ्चकोषाणां परस्परं सम्बन्ध: अस्ति। अन्नमयकोषस्य विकासं विना प्राणमयकोषस्य विकास: नैव भवितुं शक्नोति। अन्नमयकोषस्य प्राणमयकोषस्य च विकासं विना मनोमयकोषस्य विकासो न भवति। एवं क्रमेण क्रमिकविकासाय तावद् आदौ अन्नमयकोषस्य विकासाय यत्न: कर्तव्य:। तत: प्राणमयकोषस्य, मनोमयकोषस्य, विज्ञानमयकोषस्य आनन्दमयकोषस्य च विकास: कर्तव्य:। अनया क्रमिक-विकासपद्धत्या एव मानव: पूर्णतां प्राप्नोति।

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

**१. एकेन पदेन रिक्तस्थानं पूरयत —**

**उदाहरणम् — अन्नेन** शरीरं वर्धते।

(क) ..........अन्नेन.......... शरीरं वर्धते।

(ख) .......................... शरीरं प्रतिष्ठितम्।

(ग) .......................... विना शरीरं क्रियाशून्यं भवति।

(घ) .......................... एव इमानि भूतानि जायन्ते।

(ङ) .......................... समस्तानि इन्द्रियाणि सञ्चाल्यन्ते।

(च) .......................... विना बोधशक्तेः तर्कशक्तेश्च विकासो न भवति।

(छ) .......................... एव सर्वकर्मणः प्रवर्तकम्।

**२. अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तराणि लिखत —**

(क) भृगोः जिज्ञासा कस्मिन् विषये आसीत्?

(ख) भृगुणा ब्रह्मज्ञानाय किम् आचरितम्?

(ग) भृगुः प्रथमं तपसा ब्रह्मरूपेण किं ज्ञातवान्?

(घ) मनसः के जायन्ते?

(ङ) प्राणिनः कस्मात् जायन्ते?

(च) इन्द्रियाणि केन सञ्चाल्यन्ते?

(छ) शरीरं कुत्र प्रतिष्ठितम् अस्ति?

(ज) केन विना स्मृतिशक्तेर्विकासो न भवति?

(झ) भृगुः तपसा केषां महत्त्वं ज्ञातवान्?

© NCERT not to be republished

३. **उदाहरणं दृष्ट्वा अधोलिखतेषु 'किं सत्यं किम् असत्यम्' इति रिक्तस्थाने पूरयत —**

**उदाहरणम्** — प्रस्तुते पाठे पितापुत्रयो: संवाद: अस्ति

(क) प्रस्तुते पाठे पितापुत्रयो: संवाद: अस्ति ........सत्यम्........

(ख) अस्मिन् संवादे अन्नस्य महत्त्वं वर्णितम् ..........................

(ग) प्राणिन: मनस: जायन्ते इति कथनम् अस्ति ..........................

(घ) अन्नेन शरीरं वर्धते इति ..........................

(ङ) मन: सारथिरूपेण अस्मान् कर्मणि प्रवर्तयति ..........................

(च) भृगु: वरुणस्य पुत्रोऽस्ति ..........................

(छ) भृगु: तपसा मनो ब्रह्मरूपेण ज्ञातवान् ..........................

(ज) विना योगे तृतीया विभक्तिर्भवति ..........................

४. **क्रियापदेन सह समुचितं पदं योजयत —**

| | | | |
|---|---|---|---|
| (क) | प्राणिन: | १. | क्रियताम् |
| (ख) | शरीरम् | २. | कुरुताम् |
| (ग) | तप: | ३. | जायन्ते |
| (घ) | पितरं | ४. | वर्धते |
| (ङ) | यत्न: | ५. | ब्रूते |

५. **अवशिष्ट-धातुरूपाणि पूरयत —**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| ......वर्तते...... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |

© NCERT not to be republished

६. **एतानि पदानि लट्-लकारस्य त्रिषु पुरुषेषु रूपाणि पठत लिखत च —**

लभते, जायते, भाषते, विद्यते, मोदते, सेवते, सहते, शोभते, यतते, वर्धते, मन्यते, द्योतते, रोचते, कम्पते, याचते, सहते, स्पर्धते, लज्जते, क्षीयते

७. **आत्मनेपदिधातूनां लोट्-लकारे त्रिषु पुरुषेषु अभ्यासं कुरुत लिखत च —**

**वन्द्-धातुः, लोट्-लकारः**

| | | |
|---|---|---|
| वन्दताम् | वन्देताम् | वन्दन्ताम् |
| वन्दस्व | वन्देथाम् | वन्दध्वम् |
| वन्दै | वन्दावहै | वन्दामहै |

**कृ -धातुः, लोट्-लकारः**

| | | |
|---|---|---|
| कुरुताम् | कुर्वाताम् | कुर्वताम् |
| कुरुष्व | कुर्वाथाम् | कुरुध्वम् |
| करवै | करवावहै | करवामहै |

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| १. | मोदताम् | .................... | .................... |
| | .................... | .................... | .................... |
| | .................... | .................... | .................... |
| २. | वर्धताम् | .................... | .................... |

८. **एतानि क्रियापदानि लोट्-लकारे त्रिषु पुरुषेषु पठत लिखत च —**

लभताम्, सेवताम्, जयताम्, भाषताम्, विद्यताम्, सहताम्, यतताम्, याचताम्, स्पर्धताम्, लज्जताम्, कुरुताम्

**कर्तृपदानुसारं लोट्-लकारेण क्रियापदं परिवर्तयत —**

| **लट्-लकारः** | **लोट्-लकारः** |
|---|---|
| उदाहरणम् — सः अन्नं सदा ईश्वरबुद्ध्या **सेवते**। | भवान् सदा अन्नम् ईश्वरबुद्ध्या **सेवताम्**। |

© NCERT not to be republished

| | |
|---|---|
| (क) बालक: अन्नस्य निन्दां न कुरुते। | भवान् .................................. .................................. |
| (ख) मम जीवने यशो वर्धते। | तव .................................. |
| (ग) अहं बौद्धिकविकासाय सदा योगासनं कुर्वे। | त्वं .................................. .................................. |
| (घ) रमेश: सर्वदा सत्यं भाषते। | दिनेश: .................................. |
| (ङ) छात्र: लक्ष्यसिद्धये कष्टं सहते। | अहं .................................. |
| (च) साधव: सर्वदा रमन्ते। | भवन्त: .................................. |
| (छ) भवान् योगेन आरोग्यं लभते। | अहं .................................. |
| (ज) रमा सदा सत्कर्मणि यतते। | लता .................................. |
| (झ) भक्त: ईश्वरं वन्दते। | त्वं .................................. |

### कर्तृ-कर्मवाच्यनियम:

कर्तृवाच्ये कर्तरि प्रथमा विभक्ति:। कर्मणि द्वितीया विभक्ति:। क्रिया कर्तृपदानुसारिणी भवति। यतोहि कर्तृवाच्ये कर्तु: प्राधान्यं भवति अत: क्रियापदस्य वचनं पुरुषश्च कर्तृपदानुसारं भवत:। तथैव—कर्मवाच्ये कर्मणि प्रथमा, कर्तरि तृतीया, क्रिया कर्मपदानुसारिणी भवति। कर्मवाच्ये कर्मकारकस्य प्राधान्यं भवति। अत: क्रियाया: वचनं पुरुषश्च कर्मपदानुसारं भवत:। कर्मवाच्यप्रयोगे क्रियापदानि आत्मनेपदयुक्तानि भवन्ति।

**यथा**— **राम: ग्रामं गच्छति** इति कर्तृवाच्यम् अस्ति। अत्र **राम:** कर्तृवाचकं पदम्, अत: तत्र प्रथमा विभक्ति:। **ग्रामम्** इति कर्मवाचकं पदम् अत: द्वितीया विभक्ति:। **गच्छति** इति क्रियापदं कर्त्रनुसारि भवति, अत: एकवचने। अस्यैव कर्मवाच्यप्रयोगे—**रामेण ग्राम: गम्यते इति**

© NCERT not to be republished

वाक्यं भवति। अत्र **रामेण** इति कर्तृपदम्, अत: तृतीया विभक्ति:। **ग्राम:** इति कर्मवाचकपदं, तस्मात् प्रथमा। क्रिया कर्मपदानुसारिणी एकवचने, आत्मनेपदयुक्ता च। तथैव **छात्रा: विद्यालयं गच्छन्ति** इत्यत्र **छात्रा:** इति कर्तृपदं बहुवचने वर्तते, अत: क्रियापदमपि बहुवचने अस्ति। अस्यैव कर्तृवाच्यस्य कर्मवाच्यप्रयोगे **छात्रै: विद्यालय: गम्यते** इति भवति। अत्र कर्मपदम् (विद्यालय:) एकवचने अस्ति, अत: क्रियापि एकवचने भवति।

**अधोलिखितानि वाक्यानि उच्चै: पठत अवगच्छत च —**

| कर्तृवाच्यम् | कर्मवाच्यम् |
|---|---|
| • राम: पाठं पठति। | रामेण पाठ: पठ्यते। |
| • छात्रा: विद्यालयं गच्छन्ति। | छात्रै: विद्यालय: गम्यते। |
| • बालिका: गीतं गायन्ति। | बालिकाभि: गीतं गीयते। |
| • छात्र: श्लोकान् लिखति। | छात्रेण श्लोका: लिख्यन्ते। |
| • माता पुत्रौ पश्यति। | मात्रा पुत्रौ दृश्येते। |
| • मन: सर्वाणि इन्द्रियाणि सञ्चालयति। | मनसा सर्वाणि इन्द्रियाणि सञ्चाल्यन्ते। |
| • ब्रह्मज्ञानाय त्वं स्वयमेव अन्वेषणं कुरु। | ब्रह्मज्ञानाय त्वया स्वयमेव अन्वेषणं क्रियताम्। |
| • त्वं यत्नम् अभ्यासं च कुरु। | त्वया यत्न:, अभ्यासश्च क्रियेताम्। |
| • शिष्य: गुरुं सेवते। | शिष्येण गुरु: सेव्यते। |

अत्र सर्वेषु उदाहरणेषु क्रियापरिवर्तनं कर्मपदानुसारम् अस्ति। अत: एतानि कर्मवाच्यस्य उदाहरणानि सन्ति। यो नियम: अत्र (तिङन्तस्थले) प्रदर्शित: स: एव नियम: कृत्-प्रत्ययस्थलेषु (क्त-तव्यत्-अनीयर्-प्रत्ययान्तपदेषु) बोद्धव्य:। केवलं

© NCERT not to be republished

तत्र कर्मपदगत-लिङ्गानुरूपं कृदन्तपदस्य लिङ्गं वचनं च भवत: इति विशेष:। तव्यत्-अनीयर्-प्रत्ययौ लृट्-लोट्- विधिलिङ्लकाराणां विषये योग्यार्थे च भवत:। यथा —

अन्नं न **परिहरेत्/परिहरतु/परिहरिष्यति** = अन्नं न परिहर्तव्यम् **(परि + हृ + तव्यत्/परिहरणीयम् (परि + हृ + अनीयर्)** इति।

योग्यार्थे – **पानीयं** जलम्। **कर्तव्यं/करणीयं** = कर्म।

## तव्यत्-अनीयर्-प्रत्यययो: प्रयोगस्थलम्

| विधिलिङ्लकार:/ लोट्लकार:/ लृट्लकारश्च | तव्यत्-प्रत्यय: | अनीयर्-प्रत्यय: |
|---|---|---|
| अन्नं न **परिहरेत्/परिहरतु/ परिहरिष्यति** | अन्नं न **परिहर्तव्यम्** | अन्नं न **परिहरणीयम्** |
| मानव: क्रोधं **त्यजेत्/त्यजतु/त्यक्ष्यति** | मानवेन क्रोध: **त्यक्तव्य:** | मानवेन क्रोध: **त्यजनीय:** |
| मन: सदा सत्कर्मणा **साध्नुयात्/साध्नोतु/सात्स्यति** | मन : सदा सत्कर्मणा **साद्धव्यम्** | मन: सदा सत्कर्मणा **साधनीयम्** |
| सर्वदा ईश्वरं **सेवेत/ सेवताम्/ सेविष्यते** | सर्वदा ईश्वर: **सेवितव्य:** | सर्वदा ईश्वर: **सेवनीय:** |
| प्रतिदिनं योगासनं **करोतु/कुर्यात्/ करिष्यति** | प्रतिदिनं योगासनं **कर्तव्यम्** | प्रतिदिनं योगासनं **करणीयम्** |

## त्रिषु लिङ्गेषु तव्यत्-अनीयर्-प्रत्यययो: प्रयोग:

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| मया परोपकार: कर्तव्य: (कृ+तव्यत्) | मया प्राणिषु दया कर्तव्या | मया योगासनं कर्तव्यम् |
| शिष्येण वेद: पठितव्य: (पठ्+तव्यत्) | शिष्येण गीता पठितव्या | शिष्येण संस्कृतं पठितव्यम् |

© NCERT not to be republished

| | | |
|---|---|---|
| सर्वथा धर्म: रक्षणीय: (रक्ष्+अनीयर्) | मातृभूमि: रक्षणीया | आरोग्यं रक्षणीयम् |
| त्वया क्रोध: त्यक्तव्य: (त्यज्+तव्यत्) | ईर्ष्या त्यक्तव्या | दूषितान्नं त्यक्तव्यम् |
| अस्माभि: प्रतिदिनं योग: करणीय: (कृ+अनीयर्) | प्रतिदिनं मया क्रीडा करणीया | अस्माभि: समयेन भोजनं करणीयम् |

## त्रिषु वचनेषु तव्यत्-अनीयर्-प्रत्यययो: प्रयोग:

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| शिष्येण वेद: पठितव्य: | शिष्येण वेदौ पठितव्यौ | शिष्येण वेदा: पठितव्या: |
| अस्माभि: वेद: पठनीय: | अस्माभि: वेदौ पठनीयौ | अस्माभि: वेदा: पठनीया: |
| त्वया गीतं पठितव्यम् | त्वया गीते पठितव्ये | त्वया गीतानि पठितव्यानि |
| मया उद्याने लता दृश्यते | मया उद्याने लते दृश्येते | मया उद्याने लता: दृश्यन्ते |
| मया क्रोध: त्यक्तव्य: | भवता लोभमोहौ त्यक्तव्यौ | त्वया दोषा: त्यक्तव्या: |

© NCERT not to be republished

## स्वाध्यायान्मा प्रमदः

१. आत्मनेपदिधातूनां लोट्-लकारे त्रिषु पुरुषेषु अभ्यासं कुरुत—

**वन्द्-धातुः (लट्-लकारः)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दते | वन्देते | वन्दन्ते |
| मध्यमपुरुषः | वन्दसे | वन्देथे | वन्दध्वे |
| उत्तमपुरुषः | वन्दे | वन्दावहे | वन्दामहे |

**कृ-धातुः (लट्-लकारः)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुरुते | कुर्वाते | कुर्वते |
| मध्यमपुरुषः | कुरुषे | कुर्वाथे | कुर्वध्वे |
| उत्तमपुरुषः | कुर्वे | कुर्वहे | कुर्महे |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भक्तः देवं वन्दते | भक्तौ देवं वन्देते | भक्ताः देवं वन्दन्ते |
| मध्यमपुरुषः | त्वं देवं वन्दसे | युवां देवं वन्देथे | यूयं देवं वन्दध्वे |
| उत्तमपुरुषः | अहं देवं वन्दे | आवां देवं वन्दावहे | वयं देवं वन्दामहे |

२. एतेषु वाक्येषु निहितानि क्रियापदानि उच्चैः पठत—

| एकवचनरूपाणि | बहुवचनरूपाणि |
|---|---|
| १. बालकः उद्याने रमते | बालकाः उद्याने रमन्ते |
| २. शिष्यः गुरुं सेवते | शिष्याः गुरुं सेवन्ते |
| ३. रात्रौ चन्द्रः राजते | साधुपुरुषाः सर्वत्र राजन्ते |

© NCERT not to be republished

| | | |
|---|---|---|
| ४. | वृक्ष: वायुना कम्पते | वृक्षाः वायुना कम्पन्ते |
| ५. | कण्ठे हार: शोभते | वृक्षे पुष्पाणि शोभन्ते |
| ६. | योगासनेन मानव: आरोग्यं लभते | योगासनेन मानवा: आरोग्यं लभन्ते |
| ७. | भिक्षुक: धनं याचते | भिक्षुका: धनं याचन्ते |
| ८. | छात्र: गृहकार्यं कुरुते | छात्रा: गृहकार्यं कुर्वते |

**३. आहारात् सर्वभूतानि सम्भवन्ति महीपते।**
**आहारेण विवर्धन्ते तेन जीवन्ति जन्तव: ॥**

(*महाभारतम्* , वनपर्व 131/7)

**अन्वय:** हे महीपते ! सर्वभूतानि आहारात् सम्भवन्ति, आहारेण जन्तव: विवर्धन्ते, तेन आहारेण जीवन्ति च।

**भावार्थ:** हे राजन्! सर्वे प्राणिन: अन्नादिभोज्यपदार्थाद् जायन्ते। प्राणिन: आहारेण एव शरीरस्य विकासं प्राप्नुवन्ति। तेन आहारेण एव जीवन्ति।

**आहारशुद्धि:** मानसिक-बौद्धिक-विकासाय सर्वदा सात्त्विकं हितकारकं च आहारं सेवताम्। सात्त्विकम् अन्नं मनसि सद्भावान् गुणांश्च विकासयति। तेन अस्माकं स्मृतिशक्ते: आध्यात्मिकशक्ते: अन्नमयादिकोषाणां च विकासो भवति। अत एव उक्तम् —

**आहारशुद्धौ सत्त्वशुद्धि: सत्त्वशुद्धौ ध्रुवा स्मृति:।**
**स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष:।**

(*छान्दोग्योपनिषद्* ०७/२६/२)

**४. यावद् वायु: स्थितो देहे तावज्जीवनमुच्यते।**
**मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत्॥**

(*हठयोगप्रदीपिका*)

**अन्वय:** यावद् देहे वायु: स्थित: तावत् जीवनम् उच्यते। तस्य निष्क्रान्ति: मरणम्, तत: वायुं निरोधयेत्।

© NCERT not to be republished

**भावार्थः** यावत् कालपर्यन्तं प्राणवायुः शरीरे रक्षितो भवति, तावत् कालपर्यन्तम् जीवनं भवति। वायोः शरीराद् निर्गमनम् एव मरणम् इति, अस्मात् हेतोः प्राणवायुं रक्षेत्। प्राणमयकोषविकासाय अस्माभिः सर्वदा प्राणायामः, आसनानि, च करणीयानि। शयनं जागरणं च यथासमयं करणीयम्।

५. **मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**
**बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥**

(*अमृतबिन्दु* — उपनिषद् १/२)

**अन्वयः** मनः एव मनुष्याणां बन्धमोक्षयोः कारणं, विषयासक्तं बन्धाय, निर्विषयं मुक्त्यै स्मृतम् अस्ति।

**भावार्थः** मनुष्याणां बन्धस्य मोक्षस्य च कारणं मन एव भवति। यदि मनः विषयेषु आसक्तं भवति अर्थात् कामादिदोषयुक्तं भवति तर्हि बन्धाय कारणं भवति। यदि मनः विषयेषु आसक्तं न भवति तर्हि बन्धाय कारणं न भवति। यदि अस्माकं मनः निर्मलं शान्तं राग-द्वेष-शोकादिरहितं च भवति तर्हि मानसिकशक्तेः, मनोमयकोषस्य च विकासो भवति। शास्त्रेषु मनसः द्विविधं रूपं वर्ण्यते।
(१) शुद्धम् (२) अशुद्धम् इति।

६. **मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च।**
**अशुद्धं कामसङ्कल्पं शुद्धं कामविवर्जितम्॥**

(*अमृतबिन्दु* — उपनिषद् १/१)

७. **मनसः विषयाः —**
**कामः, संकल्पः, विचिकित्सा, श्रद्धा, अश्रद्धा, धृतिः, अधृतिः, ह्रीः, धीः, भीः इत्येतत् सर्वं मन एव।**

(*बृहदारण्यकोपनिषद्* १/५/३)

८. **यन्मनसा ध्यायति तद् वाचा वदति यद् वाचा वदति तत् कर्मणा करोति यत् कर्मणा करोति तदभिसम्पद्यते।**

(*शतपथब्राह्मणम्*)

**एतानि उपनिषद्वचनानि उच्चैः पठन्तु स्मरन्तु च —**

१. अन्नादेव खलु इमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति।

२. अन्नं हि भूतानां ज्येष्ठम्। तस्मात् सर्वौषधमुच्यते।

३. अन्नं न निन्द्यात्। अन्नं बहु कुर्वीत।

४. प्राणो हि भूतानाम् आयुः। प्राणे शरीरं प्रतिष्ठितम्। प्राणो वै ज्येष्ठः श्रेष्ठश्च।

५. कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव।

६. तन्मे मनः शिवसङ्कल्पमस्तु।



## यस्तु क्रियावान् मनुजः स विद्वान्

१. एकां छात्रसंगोष्ठीम् आयोज्य अस्य पाठस्य अस्माकं जीवने कीदृशी प्रासङ्गिकता अस्तीति स्वविचारान् उपस्थापयत।

२. पाठे आगतानाम् उपनिषद्वचनानाम् आशयं दशसु वाक्येषु प्रकटयत।

३. पाठे आगतानि क्रियापदानि चित्वा विंशतिवाक्यानि रचयत।

४. अन्नरक्षणाय भवता के उपायाः क्रियन्ते इति वर्णयत।

५. मनसः कार्यं दशसु वाक्येषु निरूपयत।

६. केषाञ्चन त्रयाणाम् आत्मनेपदिधातूनां लट्-लोट्लकारयोः त्रिषु पुरुषेषु रूपाणि स्मरत लिखत च।

७. अस्माकं जीवने प्रत्येकं कोषस्य विकासाय किं किं कर्तुं शक्यते इत्युपरि चर्चां कुरुत।

© NCERT not to be republished

नवमः पाठः

# कृतं प्रतिकृतं भूयादेष धर्मः सनातनः

0902CH09

*रामायणं महाभारतं* चेति द्वौ प्रसिद्धौ इतिहास-ग्रन्थौ। *महाभारतम्* अवलम्ब्य बहवो ग्रन्थाः विरचिताः। तेषु महामहोपाध्यायेन श्रीरङ्गनाथशर्मणा विरचितम् *एकचक्रम्* इति लघुरूपकम् अन्यतमम्। *महाभारते* प्रतिपादितः बकासुरवधः अस्य कथावस्तु। अयं पाठ्य-भागः *एकचक्रम्* इति रूपकस्य तृतीय-चतुर्थाङ्काभ्याम् उद्धृतः।

**अङ्कद्वयस्य पूर्वकथाप्रसङ्गः**

पाण्डवाः एकचक्रनगरे कस्यचित् ब्राह्मणस्य गृहे निवसन्ति। गृहस्वामिनः गृहे रोदनध्वनिं श्रुत्वा तत्र गता पाण्डवानां माता कुन्ती रोदनकारणं पृच्छति। ततः शोकाकुलेन परिवारेण सा ज्ञापिता यत् एकचक्रनगरवासिनां नातिदूरस्थितेन बकनाम्ना असुरेण सह सन्धिनियमानुसारं प्रतिदिनं कश्चित् नगरवासी स्वेच्छया असुरस्य भक्ष्यं भवेत्, तद्दिने पर्यायेण तस्यैव ब्राह्मणपरिवारस्य बलिदानस्य वारः आसीत् इति। तेषां दुःस्थितिं ज्ञात्वा स्वपुत्रेषु एकं बकासुरस्य समीपं प्रेषयामीति कुन्ती प्रतिज्ञां कृतवती।

इमं विषयं ज्ञात्वा ब्राह्मणेन कृतस्य उपकारस्य प्रत्युपकारकालः सन्निहितः इति भावयन् भीमः मृष्टान्न-भाण्डसहितः बकासुरस्य समीपं गन्तुम् उद्युक्तः भवति।

*(ततः प्रविशति कुन्ती भीमसेनेन सह)*

**कुन्ती** पुत्र ! किञ्चित् प्रतिश्रुतं मया प्रतिवेशिने ब्राह्मणाय।

**भीमः** सम्यगनुष्ठितम्। आतिथेयः किल तत्र भवान् उपकर्ता वसति प्रदानेन।

**कुन्ती** आकर्णय, अस्य एकचक्रस्य पुरस्यादूरवर्तिनि पर्वते वसति बकनामा दैत्यः।

**भीमः** श्रुतं तस्य दुरात्मनो वृत्तम्। पर्यायक्रमेण तस्मै बलिमाहरन्ति पौराः।

© NCERT not to be republished



**कुन्ती** श्वः प्रभाते भवत्यस्य विप्रस्य पर्यायः।

**भीमः** बाढम्।

**कुन्ती** न चैतावत्। मानुषभोजी स राक्षसः श्रूयते। भोज्यसमाहारे मानुषोऽपि तस्मै प्रेषयितव्यः।

तस्माद् बालकस्य पिता तपस्वी शोचति।

**भीमः** विदितमवशिष्टम्। मत्पुत्रेषु कोऽपि प्रेषयिष्यत इति भवत्या प्रतिश्रुतम्।

**कुन्ती** (मौनमवलम्बते)



**भीमः** मातः ! नास्त्यत्र किमप्यनुशोचितव्यम्। क्षत्रियाण्या यदुचितं तदनुष्ठितम्। युक्तोऽयं प्रतिश्रवः। श्रोत्रियोऽयं प्रतिवेशी प्रत्युपकारमर्हति। पश्य —

**भैक्षप्रदानेन चिरं परैरुपकृता वयम्।**
**कृतं प्रतिकृतं भूयादेष धर्मः सनातनः॥**

अहमेव बकासुरमभिगमिष्यामि।

**कुन्ती** वत्स भीम! अनुरूपमभिहितं भरतवंशप्रदीपेन मम पुत्रेण। भक्ष्यभोज्यादिकं मृष्टान्नं शकटपूरं पूरयित्वा प्रेषणीयं भवति राक्षसाय। तदेतत् सज्जीक्रियतामिति प्रेरयिष्यामि ब्राह्मणकुटुम्बम्।

**भीमः** अहो ! प्रियं मे। सज्जीक्रियताम्। अपरमिदं प्रियमनुष्ठितं मे भवत्या। प्रभूतमुपाहरिष्यते भोजनम्।

*(ततः प्रविशन्ति युधिष्ठिरादयः)*



NCERT not to be republished

**युधिष्ठिरः** (विलोक्य) अये ! हर्षेण उत्फुल्लाक्ष इव वत्सो भीमः।

**भीमः** प्रभूतमुपस्थितं मे भोजनम्।

**अर्जुनः** स्थाने खलु प्रहर्षः औदरिकस्य।

**नकुलः** ओष्ठौ स्फुरतः इवाग्रजस्य।

**भीमः** पश्यत, बाहू अपि स्फुरतः।

**सहदेवः** अपि हस्तद्वयेन भोक्ष्यसे ?

**भीमः** तदपि भविष्यति। न केवलं भोजनमुपस्थितम्। आयोधनमपि।

**युधिष्ठिरः** आयोधनमिति। केन ?

**भीमः** बकासुरेण।

**युधिष्ठिरः** अम्ब ! किमिदानीमुपक्षिप्तम् ?

**कुन्ती** पुत्रकाः ! बकासुरस्य भोजनपरिकल्पनं जानीथ पौराणाम्। तदिदानीं पर्यायपतितं प्रतिवेशिनो ब्राह्मणस्य।

**युधिष्ठिरः** ततस्ततः।

**कुन्ती** स खल्वेकपुत्रस्तपस्वी भृशं परिदेवयते।

**युधिष्ठिरः** ज्ञातमवशिष्टं मातः ! न खलु भवत्या अध्यवसितं समर्थये। यस्य वीरस्य भुजबलमाश्रित्य वयं सुखं शेमहे, यच्च चिन्तयन् दुर्योधनो निद्रां न लभते, तस्य भीमस्य प्रेषणं कथं नु त्वया सङ्कल्पितम् ?

**भीमः** धर्मं विजानता भवता धर्मसङ्ग्रहोऽत्र द्रष्टव्यः। न हि मातुराज्ञा प्रत्यादेशमर्हति।

**युधिष्ठिरः** वत्स भीमसेन ! बलवान् मानुषभोजी स राक्षसः इति श्रूयते।

**भीमः** ततः किम् ? राक्षसध्वंसी भीमः स्मर्यते। अलं विशङ्कया। हनिष्यामि तं दुरात्मानम्।

**अर्जुनः** धनुर्धरोऽहमनुगमिष्यामि।

**भीमः** मा मैवम्। न हि खरदंष्ट्रो मृगाधिपः सहायमपेक्षते।

© NCERT not to be republished

**इमौ हि पीवरौ बाहू सहायौ सहजौ मम।**
**बकं विध्वंसयिष्यामि सिंहः क्षुद्रमृगं यथा॥**

*(ततः सर्वैरनुज्ञातः बकं हन्तुकामः भीमः प्रस्थितः)*

*(ततः प्रविशति भक्ष्य-भोज्यादिक-भाण्ड-पूरित-शकटेन सह)*



**बकः** मानुषापसद, परिवेषय मे भोजनम्।

**भीमः** सर्वं परिवेषितं मदीय-जठरस्थाय भगवते हुताशनाय। त्वां धर्मदूषणं हन्तुम् आगतोऽहम्।

**बकः** कथं, कः खलु अधर्मः मया सेवितः ? *(सहासमुदरं परिमृजन्)*

**भीमः** नरभक्षणम्।

**बकः** नरभक्षणं नाम मांसाशिनां राक्षसानां धर्मः।

**भीमः** नररक्षणं नाम भूमिपालानां क्षत्रियाणां धर्मः।

**बकः** क्षत्रियोऽसि ?

**भीमः** बाढम्, क्षत्रियोऽस्मि।

**रक्षिता साधुलोकानां वरिष्ठो बाहुशालिनाम्।**
**निषूदको हिडिम्बस्य मृत्युश्चास्मि भवादृशाम् ॥**

**बकः** अहह! मम मित्रस्य हिडिम्बस्य हन्ता कौन्तेयो भवान्?

**भीमसेनः** कामम्! कौन्तेयोऽस्मि भीमसेनः।

**बकः** इदमस्ति मे भागधेयम्। चिरान्विष्टो मृगः स्वयमुत्पतितो व्याघ्रगह्वरम्। श्लाघनीयोऽसि मे रिपुः।

**भीमसेनः** इदं मे स्वस्त्ययनं यन्मां श्लाघनीयं रिपुं मन्यसे। अनुवर्तस्व ते मित्रं हिडिम्बम्।

**बकः** वाचाट! क्षत्रियडिम्भ, गृहाण शस्त्रम्। शातयामि ते दर्पम्।

**भीमसेनः** अलं शस्त्रग्रहणविडम्बनेन, त्वन्मस्तकास्थिभिदुरोऽस्ति ममैष मुष्टिः।

*(उभौ प्रहरतः। मल्लयुद्धं प्रवर्तते। हतः पतति बकः।)*



## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अभिहितम् (अभि + √धा + क्त, नपुं.प्र.ए.व.) | उक्तम् | उक्त | Said | |
| आकर्णय (आ + कर्ण + णिच् लोट्, म.पु.ए.व.) | शृणु | सुनो | Listen | |
| आतिथेयः (पुं.प्र.ए.व.) | अतिथौ साधुः अतिथिसेवाकारकः | अतिथि की सेवा करने वाला | Host | |
| आयोधनम् (नपुं.द्वि.ए.व.) | युद्धम् | युद्ध | Battle | |
| उत्फुल्लाक्षः (बहुव्रीहि, पुं.प्र.ए.व.) | उत्फुल्ले अक्षिणी यस्य सः विकसितनयनः | विकसितनयन | One with wide-open eyes | |
| औदरिकः (उदर+इक्, पुं.प्र.ए.व.) | भोजनप्रियः | केवल पेट भरने वाला | One who just eats continuously | |
| कामम् (अव्ययम्) | निश्चयेन | निश्चित ही | Certainly | |
| जठरस्थाय (पुं.च.ए.व.) | जठरे तिष्ठति इति, तस्मै | पेट में विद्यमान के लिए | For what is inside the stomach | |
| निषूदकः (पुं.प्र.ए.व.) | विनाशकः | विनाशक | Destroyer | |
| क्षुद्रमृगम् (पुं.द्वि.ए.व.) | क्षुद्रः मृगः तम् | छोटे पशु को | Small animal | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| क्षत्रियाण्या (स्त्री.तृ.ए.व.) | क्षत्रियस्य पत्नी, तया | क्षत्रिय की पत्नी से | By the wife of Kshatriya | |
| परिदेवयते (परि+√दिव्+णिच्, आ.प,प्र.पु.ए.व.) | विलपति | विलाप करता है | Laments | |
| परिवेषय (परि+√विष्+लोट्, म.पु.ए.व.) | स्थापय | तुम परोसो | (You) Serve | |
| पीवरौ (पुं.प्र.द्वि.व.) | स्थूलौ | (दो) स्थूल | (Two) Stout | |
| पौराः (पुं.प्र.ब.व.) | नागरिकाः | नागरिक | Citizens | |
| प्रतिवेशी (पुं.प्र.ए.व.) | निकट गृहवासी | पड़ोसी | Neighbour | |
| प्रतिश्रुतम् (प्रति + √श्रु + क्त, पुं.द्वि.ए.व.) | प्रतिज्ञातम् | प्रतिज्ञात | Promised | |
| प्रभूतम् (पुं.द्वि.ए.व.) | अधिकम् | अधिक | Abundant | |
| प्रतिश्रवः (पुं.प्र.ए.व.) | प्रतिज्ञा | वचन | Promise | |
| प्रत्यादेशम् (पुं.द्वि.ए.व.) | अनुल्लङ्घनम् | अवज्ञा | Disobedience | |
| बाढम् (अव्ययम् पुं.द्वि.ए.व.) | नूनम् | निश्चित | Certainly | |
| मल्लयुद्धम् (पुं.द्वि.ए.व.) | मल्लानां युद्धम् | पहलवानों का युद्ध | Wrestling | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| मानुषापसद (सप्तमी-तत्पुरुषः, पुं.सं.ए.व.) | मानुषेषु अपसद | हे ! निकृष्ट मानव | O' Human of low cadre | |
| मृष्टान्नम् (कर्मधारय) | मृष्टम् अन्नम् | स्वादिष्ट भोजन | Tasty Food | |
| वाचाट (पुं.सं.ए.व.) | प्रलापक | हे ! डींग मारने वाले | O' Boastful | |
| विप्रस्य (पुं.ष.ए.व.) | ब्राह्मणस्य | ब्राह्मण का | Of Brahmana | |
| विशङ्कया (स्त्री.तृ.ए.व.) | विशेषसंशयेन | विशिष्ट संशय से | By the doubt | |
| व्याघ्रगह्वरम् (पुं.द्वि.ए.व.) | व्याघ्रस्य गह्वरम् | बाघ का निवास स्थान | Tiger-Cave | |
| श्रोत्रियः (पुं.प्र.ए.व.) | श्रोत्रम् अधीते इति | जिसने वेद पढ़ा हो | One who has read the Vedas | |
| हनिष्यामि (√हन् + लृट् उ.पु.ए.व.) | वधं करिष्यामि | मार दूँगा | Will kill | |
| हुताशनाय (पुं.च.ए.व.) | हुतम् अशनम् यस्य, तस्मै | अग्नि को | For the Fire | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

**श्लोकानां भावार्थः**

१. वयं नागरिकैः बहुकालं भिक्षा-प्रदानेन पोषिताः। उपकृतमेतत् प्रत्युपकृतं भवेत् इति एषः शाश्वतः धर्मः।

२. एतौ हि, पुष्टौ, भुजौ, मम सहजातौ उपकारकौ। सिंहः तुच्छं वन्यप्राणिनमिव, अहं, बकनामानम् असुरं विनाशयिष्यामि।

## अभ्यासाद् जायते सिद्धिः

### १. अधः प्रदत्तप्रश्नानाम् उत्तराणि एकपदेन लिखत—

(क) भीमस्य जननी का ?

(ख) कुन्त्या निश्चितं कः न समर्थयति ?

(ग) पाण्डवानाम् उपकर्ता कः ?

(घ) कं चिन्तयन् दुर्योधनः निद्रां न लभते ?

(ङ) पाण्डवाः कुत्र निवसन्ति स्म ?

(च) भरतवंशप्रदीपः कः ?

(छ) कः भृशं परिदेवयते ?

### २. पूर्णवाक्येन उत्तरं लिखत—

(क) "भैक्षप्रदानेन........ " इति श्लोकानुसारं सनातनः धर्मः कः ?

(ख) बकनामा दैत्यः कुत्र वसति ?

(ग) कुन्ती किं प्रतिश्रुतवती ?

(घ) भीमस्य अग्रजः कः ?

(ङ) का प्रत्यादेशं न अर्हति ?

(च) पौराः बकासुराय कथं बलिम् आहरन्ति ?

(छ) क्षत्रियाणां धर्मः कः ?

### ३. अधस्तात् दत्तानि वाक्यानि केन कं प्रति उक्तानि इति निर्दिशत—

| क्र.सं. | वाक्यानि | केन / कया | कं / कां प्रति |
|---|---|---|---|
| यथा— | तस्माद् बालकस्य पिता तपस्वी शोचति | कुन्त्या | भीमम् |
| १. | न हि मातुराज्ञा प्रत्यादेशमर्हति | | |
| २. | न हि खरदंष्ट्रो मृगाधिपः सहायमपेक्षते | | |
| ३. | क्षत्रियाण्या यदुचितं तदनुष्ठितम् | | |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| ४. | अपि हस्तद्वयेन भोक्ष्यसे | | |
| ५. | तस्य भीमस्य प्रेषणं कथं नु त्वया सङ्कल्पितम् ? | | |
| ६. | नरभक्षणं नाम मांसाशिनां राक्षसानां धर्मः | | |

## ४. रेखाङ्कितपदेषु सन्धिं विभज्य सन्धिनाम लिखत —

**यथा** — न <u>चैतावत्</u>।

............च............ + ............एतावत्............ ( ............वृद्धि-सन्धिः............ )

(क) <u>सम्यगनुष्ठितम्</u>।

.................... + .................... ( .................... )

(ख) <u>पुरस्यादूरवर्तिनि</u> पर्वते वसति बकनामा दैत्यः।

.................... + .................... ( .................... )

(ग) श्रुतं तस्य <u>दुरात्मनो वृत्तम्</u>।

.................... + .................... ( .................... )

(घ) भोज्यसमाहारे <u>मानुषोऽपि</u> तस्मै प्रेषयितव्यः।

.................... + .................... ( .................... )

(ङ) मातः! <u>नास्त्यत्र</u> किमप्यनुशोचितव्यम्।

.................... + .................... ( .................... )

(च) क्षत्रियाण्या <u>यदुचितं</u> तदनुष्ठितम्।

.................... + .................... ( .................... )

(छ) स खल्वेक <u>पुत्रस्तपस्वी</u> भृशं परिदेवयते।

.................... + .................... ( .................... )

© NCERT not to be republished

(ज) कथं नु त्वया सङ्कल्पितम्।

.................... + .................... ( .................... )

(झ) धर्मसङ्ग्रहोऽत्र द्रष्टव्यः।

.................... + .................... ( .................... )

(ञ) मानुषभोजी स राक्षस इति श्रूयते।

.................... + .................... ( .................... )

**५. पर्यायवाचि-पदानां मेलनं कुरुत—**

**यथा**—पिता - जनकः

| | |
|---|---|
| (क) आयोधनम् | १. ब्राह्मणः |
| (ख) विप्रः | २. जननी |
| (ग) असुरः | ३. अग्निः |
| (घ) अम्ब | ४. दैत्यः |
| (ङ) हुताशनः | ५. युद्धम् |

**६. अधोलिखितानां पदानां विपरीतार्थक-शब्दान् लिखत—**

**यथा**—पीवरः ..........कृशः..........

(क) उपकृतः ................................

(ख) अग्रजस्य ................................

(ग) उचितम् ................................

(घ) हर्षः ................................

© NCERT not to be republished

## ७. मञ्जूषातः समुचितं विशेषणपदं चित्वा लिखत—

क्षत्रियाणी, शकटपूरं, प्रतिवेशी, खरदंष्ट्रः,
जठरस्थः, कौन्तेयः, पीवरौ

यथा— ..........पीवरौ.......... बाहू

(क) .............................. मृष्टान्नम्

(ख) .............................. ब्राह्मणः

(ग) .............................. मृगाधिपः

(घ) .............................. भीमः

(ङ) .............................. कुन्ती

(च) .............................. हुताशनः

## ८. समस्तपदानि लिखत—

यथा—मृष्टम् अन्नं शकटपूरं पूरयित्वा प्रेषणीयम्। ...मृष्टान्नम्...

(क) वीरस्य भुजयोः बलम् आश्रित्य वयं सुखं शेमहे। ..................

(ख) भवता धर्माणां सङ्ग्रहः द्रष्टव्यः। ..................

(ग) नहि मातुः आज्ञा प्रत्यादेशमर्हति। ..................

(घ) धनुः धरति इति अहम् अनुगमिष्यामि। ..................

(ङ) नहि खरदंष्ट्रः मृगाणाम् अधिपः सहायमपेक्षते। ..................

(च) अस्य पुरस्य न दूरे वर्तते पर्वते वसति बकनामा दैत्यः। ..................

© NCERT not to be republished

**९. अधोलिखितवाक्यानाम् उचितभावैः सह सम्मेलनं कुरुत—**

| | |
|---|---|
| **यथा**— प्रभूतमुपस्थितं मे भोजनम्। | हर्षः |
| (क) धनुर्धरोऽहमनुगमिष्यामि। | १. हासः |
| (ख) भीमस्य प्रेषणं कथं नु त्वया सङ्कल्पितम्? | २. निराशा |
| (ग) अपि हस्तद्वयेन भोक्ष्यसे? | ३. ग्लानिः |
| (घ) हनिष्यामि तं दुरात्मानम्। | ४. अधिकारः |
| (ङ) स खल्वेकपुत्रस्तपस्वी भृशं परिदेवयते। | ५. ओजः |
| (च) मानुषापसद, परिवेषय मे भोजनम्। | ६. धैर्यम् |

**१०. वाच्यपरिवर्तनं कुरुत—**

| कर्तृवाच्यम् | कर्मवाच्यम् |
|---|---|
| **यथा**—भवत्या प्रतिश्रुतम्। | भवती प्रतिश्रुतवती। |
| (क) क्षत्रियाण्या अनुष्ठितम्। | .................................... |
| (ख) भवत्या सज्जीक्रियताम्। | .................................... |
| (ग) भवत्या उपक्षिप्तम्। | .................................... |
| (घ) त्वया सङ्कल्पितम्। | .................................... |
| (ङ) भवता धर्मसङ्ग्रहः द्रष्टव्यः। | .................................... |
| (च) पौरजनैः मानुषः प्रेषयितव्यः। | .................................... |

© NCERT not to be republished

## स्वाध्यायान्मा प्रमदः

**कविकालकृतीनां विचारः (https://vidwannrs.in/)**

**कविः** विद्वान् एन्. रङ्गनाथशर्मा

**जननम्** ७.४.१९२६, देहत्यागः २०१४

**जन्मस्थानम्** नडळ्ल्ली ग्रामः, शिवमोग्गमण्डलम्, कर्णाटकराज्यम्।

**उपाधयः** महामहोपाध्यायः, विद्यावारिधिः, व्याकरणशास्त्रप्रवीणः। राष्ट्रप्रशस्तिभाक् राज्यप्रशस्तिभाक् च।

**कृतयः** अयम् आचार्यः स्वरचित-ग्रन्थाः, अनूदित-ग्रन्थाः, व्याख्यानग्रन्थाः इति परश्शतान् लेखान् ग्रन्थान् च अलिखत्। संस्कृतभाषया — *बाहुबलिविजयम्, एकचक्रम्, कुसुमाञ्जलिः, श्रीशङ्करचरितामृतम्* इत्यादयः कृतयः प्रसिद्धाः।

अयं विद्वान् व्याकरण-शास्त्रे अलङ्कारशास्त्रे अद्वैत-वेदान्ते निष्णातः। बेङ्गलूरुस्थे चामराजेन्द्र-संस्कृत-महाविद्यालये व्याकरणप्राध्यापकः सन् चिरं सुरभारत्याः सेवाम् अकुरुत।

***अमरकोषः***

१. असुरः असुरा दैत्य-दैतेयदनुजेन्द्रारिदानवाः।
२. आयोधनम् युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्।
३. तनयः आत्मजस्तनयः सूनुः स्त्रियः पुत्रस्त्रियां त्वमी।

## यस्तु क्रियावान् मनुजः स विद्वान्

१. अस्य रूपकस्य अभिनय-अंशान् ज्ञात्वा स्वशालायाम् अभिनयं कुरुत।
२. अस्मिन् रूपके विद्यमानानां पात्राणां नामानि विलिख्य तेषां विषये टिप्पणीं लिखत।
३. विद्यालयस्य ग्रन्थालयं गत्वा *महाभारतस्य* विविधपात्राणां विषये पठित्वा मित्रैः सह आलोचनां कुरुत।

© NCERT not to be republished

दशमः पाठः

# णमो अरिहन्ताणम्



आसीत् युगानाम् आरम्भे प्रजानां प्रियः नाभिनामकः कश्चन महाराजः। सः राजनीतौ युद्धतन्त्रे प्रशासनादिषु च समर्थः। तस्य पत्नी मरुदेवी बुद्धिमती करुणाशालिनी च। तयोः एव प्रियपुत्रः ऋषभः। ऋषभः सर्वगुणसम्पन्नः, अधीतविद्यः, राजनीतिज्ञश्च आसीत्। यौवनेन विलसन्तं तं राजकुमारं वीक्ष्य नाभिः तस्मै राज्यभारं समर्पयितुम् अचिन्तयत्।

अथैकदा समाजे दुर्भिक्षादयः समस्याः समुदभवन्। जनेषु परस्परं विद्वेषादयः भावनाः आविरभवन्। तदा नाभिः "अयं कालः ऋषभस्य राजनीतेः परीक्षार्थं सुयोग्यः" इति मन्यमानः तस्मै राज्यं समर्पितवान्। ऋषभः यदा राजा अभवत् तदा सः आदौ जनानां समस्याः काः, दुर्भिक्षस्य कारणं किं, जनेषु कुतः परस्परं





विद्वेषः, समस्यानां समाधानोपायाः के इत्यादिषु विषयेषु चिन्तनं कृतवान्। तेन काचित् स्पष्टकल्पना प्राप्ता यत् जनानाम् आलस्यं, कृषिकार्ये न्यूनता, प्रजासु उत्पादनक्षमतायाः अभावः चेत्येतादृश्यः मूलसमस्याः सन्ति इति। अतः सः मूलसमस्यानां परिष्काराय जनानां सुखमय-जीवनाय च विविधाः योजनाः रचितवान्। विशेषरूपेण कृषिकार्यं, विविधपदार्थैः भोजननिर्माणं, तन्तुभिः वस्त्रनिर्माणं, गवाम् अश्वादीनां पशूनां पालनं चेत्यादीनि जीवन-कौशलानि प्रशिक्षितवान्। काष्ठैः धातुभिः शिलाभिः

© NCERT not to be republished







च गृहोपयोगिनां वस्तूनां निर्माणं, पात्रनिर्माणं, गृहनिर्माणं, नगरनिर्माणादिकं च प्रशिक्षितवान्। तेन क्रमशः जनाः सक्रियाः अभवन् जीवनपद्धतिं च परिवर्तितवन्तः। क्रमशः जनानाम् आर्थिकस्थितिः अपि सुदृढा जाता। जनाः स्वयमेव गृहाणां विविधभोज्यपदार्थानां नित्योपयोगिवस्तूनां च निर्माणं कर्तुम् आरब्धवन्तः। कृषिकार्याणि अपि प्रचुरतया आरब्धानि। तेन जनानां समस्याः स्वयमेव परिहृताः, राज्यं पुनः सुभिक्षं चाभवत्।

**प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।**
**नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्॥**



© NCERT not to be republished

ऋषभः जनानां जीवने शान्तिं सुरक्षां न्यायिकव्यवस्थां च पुनः सुदृढां कृतवान्। एवम् ऋषभस्य दक्षशासनेन कौशलेन च **विनितानाम्नः** नगरस्य निर्माणम् अभवत्। समाजस्य उत्कर्षेण सः जनानां मनस्सु सुप्रतिष्ठितं स्थानं प्राप्तवान्। अतः तं प्रजाः प्रेम्णा राजा ऋषभदेवः इति कथयन्ति स्म। ऋषभदेवः समाजस्य उत्कर्षेण सह साम्राज्यस्यापि विस्तारं कृतवान्। एतादृशस्य महाराजस्य पुत्राः अपि शौर्येण पराक्रमेण बुद्धिबलेन च विश्वप्रसिद्धाः आसन्। तादृशेषु शते पुत्रेषु विशेषरूपेण भरतः बाहुबलिः च अत्यन्तं सुविख्यातौ। तथैव ऋषभस्य पुत्रीषु ब्राह्मी सुन्दरी चेति द्वे कन्ये अपि गणितादिषु शास्त्रेषु प्रवीणे प्रसिद्धे च आस्ताम्।



जैनसम्प्रदायानुगुणं 'ब्राह्मीलिप्याः' विकास: ब्राह्मीद्वारैव कृता इति श्रूयते। तस्यामेव लिप्यां शिलालेखा: उपलभ्यन्ते एवं सर्वोन्मुखसमृद्ध्या ऋषभदेवः जीवने प्राप्तानन्दः परमसुखी च आसीत्। परं को वा जानाति विधिलिखितम्। ऋषभदेवस्यापि जीवने काचित् तादृशी घटना संवृत्ता यया तस्य जीवनमेव परिवर्तितम्। उच्यते हि —



**दैवाधीनं जगत्सर्वं जन्मकर्मशुभावहम्।**
**संयोगश्च वियोगश्च न च दैवात्परं बलम्॥**

© NCERT not to be republished



एकदा ऋषभदेवः राजप्रासादे नृत्यकलाप्रदर्शनम् आयोजितवान्। तत्र आगता काचित् नर्तकी नृत्यकलां प्रदर्शयन्ती सहसा भूमौ पतित्वा मृता। अनया घटनया ऋषभदेवस्य मनः सहसा विक्षुब्धम् अभवत्। कथं काचित् आरोग्यवती स्त्री सहसा मरणं प्राप्तवती, किं नाम जीवनम्, कथं जीवनीयम्, इत्यादयः अनेके प्रश्नाः तस्य बुद्धौ आविरभवन्। इह संसारे किमपि शाश्वतं नास्ति, इदं सुखं स्थायि नास्ति इति विचिन्त्य स्थिरसुखस्य प्राप्त्यर्थं सः सर्वमपि परित्यज्य भिक्षुरूपेण प्रस्थितवान्। स्वस्य विशालं साम्राज्यं स्वपुत्रेषु विभक्तवान्। विशेषतया 'विनिता' राज्यं भरताय तक्षशिलां बाहुबलये च समर्प्य जीवनस्य परमसत्यम् अन्वेष्टुं प्रस्थितोऽयं महामुनिः। तम् अनेके जनाः शिष्यरूपेण अनुसृतवन्तः। ऋषभदेवः तदारभ्य अरण्येषु मौनेन ध्यानं निरन्तरम् अध्ययनं च करोति स्म। सः अध्ययने गभीरध्याने च तथा लीनः भवति स्म येन सः भोजनपानादिकमपि विस्मृत्य बहुकालं यावत् स्वाभाविकरूपेण निराहारम् अकरोत्। परं तस्य अनुयायिनः तथा निराहारं स्थातुं कष्टम् अनुभवन्ति स्म। किन्तु ते ऋषभदेवं त्यक्त्वा गन्तुमपि न इच्छन्ति स्म। ते अरण्ये विद्यमानेभ्यः वृक्षेभ्यः फलानि शाकानि वा चित्वा जीवनं यापयन्ति स्म।

कदाचित् तेषाम् एतादृशं व्यवहारं दृष्ट्वा जैनसन्यासिनः वृक्षेभ्यः फलानि शाकानि वा न चिनुयुः इति बोधनार्थं स्वयं भिक्षार्थं प्रस्थितः। अनुयायिनः अपि तस्य आचरणेन प्रभाविताः सन्तः भिक्षार्थं गताः। ग्रामेषु प्रतिगृहं गत्वा भिक्षां प्राप्य जीवनं निर्वर्तयन्ति स्म। परम् ऋषभः पूर्वं भोजनार्थं मौनेन भिक्षायाचनं करणीयमिति मौनेन प्रतिगृहं भिक्षायाचनम् आरब्धवान्। परं तत्रत्याः जनाः तेषां प्रियं महाराजं दृष्ट्वा भिक्षायां किं दातव्यमिति सम्भ्रान्ताः सन्तः तस्मै आभरणानि अनर्घवस्तूनि च यच्छन्ति स्म। परं भिक्षायां भोजनपदार्थः देयः इति न केनापि चिन्तितम्। फलतः ऋषभदेवस्य दिने दिने सकष्टम् उपवासः करणीयः आपतितम्। कदाचित् ऋषभदेवः भोज्यपदार्थानाम् अभावे चतुःशतं दिनानि नैरन्तर्येण उपवासं कृतवान्। एकदा पर्यटनावसरे सः हस्तिनापुरस्य



© NCERT not to be republished

समीपे स्थितस्य इक्षुक्षेत्रस्य पार्श्वमार्गात् गच्छति स्म। तच्च इक्षुक्षेत्रं तस्यैव प्रपौत्रस्य श्रेयांसस्य आसीत्। सः श्रेयांसः प्रपितामहाय पानार्थम् इक्षुरसं दत्तवान्। अनेन ऋषभदेवस्य दीर्घकालिकः उपवासः समाप्तः। तच्च वैशाखमासस्य अक्षयतृतीया-दिनम् आसीत्। अतः जैनसम्प्रदाये 'वर्षतपपारणामहोत्सवः' अधुनापि गुजराते पदलिप्तपुरम् (पालीताणा) उत्तरप्रदेशे हस्तिनापुरं चेत्यादिषु पवित्रतीर्थेषु आचर्यते। अत्र त्रयोदशमासानां वैकल्पिकदिनेषु उपवासं कुर्वन्ति। अन्ते अक्षयतृतीयादिने इक्षुरसेन उपवासस्य समापनं कुर्वन्ति।

एवं दीर्घकालिकोपवासेन निरन्तराध्ययनेन कठोरतपसा च ऋषभदेवः फाल्गुनमासस्य कृष्णपक्षे एकादश्यां तिथौ प्रयागराजे अक्षयवटवृक्षस्य अधः केवलज्ञानं प्राप्तवान्। अयमेव जैनसम्प्रदाये आदिमः तीर्थङ्करः प्रभुः नाथः इत्यतः 'आदिनाथः' इति ख्यातः। ऋषभदेवः जनानां मार्गदर्शनार्थं भिक्षुः भिक्षुणी श्रावकः श्राविका चेति क्रमं रचितवान्। स एव क्रमः जैनसङ्घः इति प्रसिद्धः वर्तते।



तेषां परमो मन्त्रः नवकारमन्त्रः इति प्रसिद्धः यच्च प्राकृतभाषायां वर्तते —




अस्य अर्थः भवति नमामि अरिहन्तॄन्, नमामि सिद्धान्, नमामि आचार्यान्, नमामि उपाध्यायान्, नमामि लोके सर्वसाधून् इति। अयं सर्वेषां जैनानां परमपावनः मन्त्रः अस्ति। प्रतिवर्षम् अप्रैल्-मासस्य नवमे दिनाङ्के जैनजनाः सामूहिकरूपेण अस्य मन्त्रस्य जपादिकं कृत्वा उत्सवम् आचरन्ति। अतः अस्य दिवसस्य 'नवकारमहामन्त्रदिवसः' इति ख्यातिः वर्तते। एषः मन्त्रः पञ्चपरमेष्ठिभ्यः (अरिहन्तारः, सिद्धाः, आचार्याः, उपाध्यायाः, सर्वे साधवः च) प्रणामं समर्पयति। वसुधैवकुटुम्बकम् इत्यस्य अनुरूपेण विश्वशान्त्यै कोटिशैः जनैः गीयमानः परमोमन्त्रः अयं णमोकारमन्त्रः।

जैनमतस्य प्रमुखाः सिद्धान्ताः — अहिंसा परमो धर्मः (मनसा, वाचा, कर्मणा च अहिंसापालनम्), अनेकान्तवादः (सत्यस्य अनेके पक्षाः भवन्ति), स्याद्वादः (प्रत्येकं वचनं सापेक्षं "स्यादिति" रूपेण ग्राह्यम्), अपरिग्रहः (आवश्यकात् अधिकं संग्रहः न करणीयः) इत्यादयः। एतेषां दर्शनानां मध्ये — सम्यग्दर्शनम्, सम्यग्ज्ञानम्, सम्यक्चरित्रम् इति त्रीणि रत्नानि उच्यन्ते। तथा च प्राणिमात्रहिताय पञ्चमहाव्रतानि — सत्यम्, अहिंसा, अस्तेयम्, अपरिग्रहः, ब्रह्मचर्यं च आचरितुं कल्याणकरम् इति निगद्यते।

© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अचिन्तयत् (√चिन्त्+लङ्, प्र.पु.ए.व.) | चिन्तितवान् | विचार किया | Considered | |
| अधीतविद्यः (बहुव्रीहि, पुं.प्र.ए.व.) | अधीता विद्या येन | पढ़ा-लिखा | Learned | |
| अनर्घवस्तूनि (कर्मधारय, नपुं.प्र.ब.व.) | अनर्घाणि वस्तूनि | अनमोल वस्तुएँ | Precious items | |
| अनुयायिनः (पुं.प्र.ब.व.) | अनुगामिनः | अनुयायी | Followers | |
| अनेकान्तवादः (पुं.प्र.ए.व.) | सत्यस्य बहुपक्षवादः | अनेकान्तवाद | Doctrine of multiplicity of view points | |
| अपरिग्रहः (नञ्-तत्पुरुषः, प्र.ए.व.) | न परिग्रहः | आवश्यकता से अधिक ग्रहण न करना | Non-possession | |
| अरिहन्ताणम् (पुं.ष.ब.व.) | जितशत्रूणाम् | अरिहन्तों का | Conquerors of enemies (Arihantas) | |
| आरम्भे (पुं.स.ए.व.) | आदौ | आरम्भ में | At the beginning | |
| आलस्यम् (नपुं.प्र.ए.व.) | प्रमादः | आलस्य | Laziness | |
| इक्षुक्षेत्रम् (षष्ठी-तत्पुरुषः, नपुं.प्र.ए.व.) | इक्षोः (मधुदण्डस्य) क्षेत्रम् | गन्ने का खेत | Sugarcane field | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| उत्पादनक्षमता (स्त्री.प्र.ए.व.) | उत्पादनस्य क्षमता | उत्पादन की क्षमता | Productivity | |
| उपवासः (पुं.प्र.ए.व.) | निराहारव्रतम् | उपवास | Fasting | |
| कठोरतपसा (कर्मधारय, पुं.तृ.ए.व.) | कठोरेण तपसा | कठोर तप से | With severe penance | |
| करुणाशालिनी (स्त्री.प्र.ए.व.) | दयायुक्ता | दयालु | Compassionate | |
| केवलज्ञानम् (नपुं.प्र./द्वि.ए.व.) | कैवल्यस्य ज्ञानम् | केवलज्ञान | Absolute knowledge | |
| तीर्थङ्करः (पुं.प्र.ए.व.) | धर्ममार्गप्रदर्शकः | तीर्थंकर | Tirthankara | |
| दुर्भिक्षम् (अव्ययीभावः, नपुं.प्र.ए.व.) | भिक्षायाः अभावः | अकाल | Famine | |
| दैवाधीनम् (षष्ठी-तत्पुरुषः, (नपुं.प्र./द्वि.ए.व.) | दैवस्य अधीनम् | भाग्य के अधीन | Dependent on fate | |
| नवकारमन्त्रः (पुं.प्र.ए.व.) | जैनप्रार्थनामन्त्रः | नवकार मंत्र | Navkar mantra | |
| नित्योपयोगिवस्तूनाम् (नपुं.ष.ब.व.) | प्रतिदिनोपयोगिनां वस्तूनाम् | नित्य उपयोग की वस्तुओं के | Daily essentials | |
| निराहारम् (पुं./नपुं.प्र./द्वि.ए.व.) | भोजनरहितम् | निराहार | Without food | |
| न्यायिकव्यवस्था (स्त्री.प्र.ए.व.) | न्यायसंबन्धिनी व्यवस्था | न्याय व्यवस्था | Judicial system | |
| परित्यज्य (कृदन्त,परि+ √त्यज्+ल्यप्) | त्यक्त्वा | त्यागकर | Abandoning | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| परिष्काराय (पुं.च.ए.व.) | निवारणाय | समाधान के लिए | For rectification | |
| परिहृताः (पुं.प्र.ब.व.) | निवारिताः | निवारण किया | Solved | |
| प्रजानाम् (स्त्री.ष.ब.व.) | जनानाम् | प्रजाओं का | Of citizens | |
| प्रशासनादिषु (नपुं.स.ब.व.) | शासनक्रियासु | प्रशासन आदि में | In administration etc. | |
| ब्राह्मीलिपिः मध्यपदलोपी (कर्मधारयः, स्त्री.प्र.ए.व.) | ब्राह्मीनाम्नी लिपिः | ब्राह्मी लिपि | Brahmi script | |
| भिक्षार्थम् (नपुं.द्वि.ए.व.) | याच्ञायै | भिक्षा के लिए | For alms | |
| युद्धतन्त्रे (नपुं.स.ए.व.) | संग्रामशास्त्रे | युद्ध-तंत्र में | In war-strategy | |
| राजनीतौ (स्त्री.स.ए.व.) | राजधर्मे | राजनीति में | In politics | |
| विद्वेषः (पुं.प्र.ए.व.) | वैरम् | द्वेष | Hatred | |
| विधिलिखितम् (तृतीया-तत्पुरुषः, नपुं.प्र./द्वि.ए.व.) | विधिना लिखितम् | नियति-निर्धारित | Predestined | |
| वियोगः (पुं.प्र.ए.व.) | पृथक्करणम् | वियोग | Separation | |
| विक्षुब्धम् (नपुं.प्र./द्वि.ए.व.) | उद्विग्नम् | विचलित | Agitated | |
| शाश्वतम् (नपुं.प्र./द्वि.ए.व.) | नित्यम् | शाश्वत | Eternal | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| शिलालेखाः (पुं.प्र.ब.व.) | शिलासु लिखिताः लेखाः | शिला-लेख | Inscriptions | |
| सङ्घः (पुं.प्र.ए.व.) | समूहः | संघ | Community | |
| समाधानोपायाः (पुं.प्र.ब.व.) | निवारणमार्गाः | समाधान के उपाय | Solutions | |
| सम्भ्रान्ताः (पुं.प्र.ब.व.) | किंकर्तव्यमूढाः | विस्मय के साथ | Perplexed | |
| संयोगः (पुं.प्र.ए.व.) | मेलनम् | संयोग | Union | |
| सुप्रतिष्ठितम् (नपुं.प्र./द्वि.ए.व.) | दृढरूपेण स्थापितम् | अच्छी तरह स्थापित | Well established | |

## अत्र इदम् अवधेयम्

### प्राकृतभाषा

भारते भाषासम्पदा अतीव समृद्धा अस्ति। कस्मिंश्चित् कालघट्टे अनेकाः प्राकृतभाषाः सामान्यजनानां संवादोपयोगिन्यः आसन्।

प्राकृतभाषाः —

- आर्षप्राकृतम्
- मागधीप्राकृतम्
- शौरसेनीप्राकृतम्
- महाराष्ट्रप्राकृतम्
- पैशाचिप्राकृतम्
- चूलिकाप्राकृतम्
- अपभ्रंशप्राकृतम् इत्यादयः।

जैनागमाः अर्धमागधीभाषायां लिखिताः। महाराष्ट्रप्राकृते महाकविः हालः *गाथासप्तशती* इति सुप्रसिद्धं काव्यं लिखितवान्। शौरसेनीप्राकृते बहवः नाट्यग्रन्थाः रचिताः सन्ति। अनेन ज्ञायते यत् प्राकृतभाषा न केवलं संवादोपयोगिनी अपितु उच्चकोटिसाहित्यस्य वाहिनी आसीत्। एवं संस्कृतं यदि स्रोतस्विनी नदी, तर्हि प्राकृतं तस्या एव सरलः प्रवाहः अस्ति। उभयोर्मध्ये अविच्छिन्नः सम्बन्धः अस्ति।

© NCERT not to be republished

**संस्कृत-वाक्यानां प्राकृतानुवादः —**

| | संस्कृतम् | प्राकृतम् |
|---|---|---|
| (१) | अहं विद्यालयं गच्छामि। | अहं विज्जालयं गच्छामि / गच्छमि / गच्छेमि / गच्छं। |
| (२) | सः जलं पिबति। | सो जलं पिवइ। |
| (३) | बालकः पद्यं पठति। | बालओ पोत्थं पढइ / पढए / पढदि / पढदे। |
| (४) | भवान् कुत्र गच्छति। | भवतो कत्थ गच्छउ। |
| (५) | अहं फलानि खादामि। | अहं फलाइं / फलाणि खामि। |
| (६) | एतत् मम मित्रम् अस्ति। | एसो मम/मज्झ मित्तो/ मित्तं अत्थि। |

## अभ्यासाद् जायते सिद्धिः

**१. एकपदेन उत्तरं लिखत —**

(क) ऋषभेण निर्मितस्य नगरस्य नाम किम्?

(ख) ऋषभस्य प्रसिद्धे द्वे कन्ये के?

(ग) कस्यां लिप्यां नैकानि शास्त्राणि लिपिबद्धानि?

(घ) विनिता नामकं राज्यं ऋषभः कस्मै समर्पितवान्?

(ङ) ऋषभः बाहुबलिने किं राज्यं प्रदत्तवान्?

(च) प्रजाः भिक्षायां कानि वस्तूनि यच्छन्ति स्म?

**२. पूर्णवाक्येन प्रश्नानाम् उत्तराणि लिखत —**

(क) देशे काः समस्याः सन्ति इति ऋषभदेवस्य कल्पना प्राप्ता?

(ख) महाराजः केषु कार्येषु प्रजाः प्रशिक्षितवान्?

(ग) ऋषभदेवस्य जीवनपरिवर्तिनी घटना का आसीत्?

(घ) ऋषभदेवस्य दीर्घकालिकस्य उपवासस्य समाप्तिः कथम् अभवत्?

(ङ) ऋषभदेवः कदा कुत्र च केवलज्ञानं प्राप्तवान्?

(च) जनानां मार्गदर्शनार्थं कं क्रमं रचितवान्?

© NCERT not to be republished

**३. समस्तपदानि लिखत —**

| विग्रहवाक्यम् | समस्तपदम् |
|---|---|
| (क) महान् च असौ राजा च | ........................................ |
| (ख) प्रजानां सुखम् | ........................................ |
| (ग) मूलाः समस्याः | ........................................ |
| (घ) भोजनस्य निर्माणम् | ........................................ |
| (ङ) आर्थिकी स्थितिः | ........................................ |
| (च) प्राप्तः आनन्दःयेन सः | ........................................ |
| (छ) विधिना लिखितम् | ........................................ |
| (ज) गृहं गृहं प्रति | ........................................ |
| (झ) ब्राह्मीनामा लिपिः | ........................................ |

**४. वाक्यानि उदाहरणानुसारं परिवर्तयत —**

**यथा** — जनैः स्वयमेव निर्माणकार्यम् आरब्धम्।

जनाः स्वयमेव निर्माणकार्यम् आरब्धवन्तः।

(क) महाराजेन राज्यं समर्पितम्।

........................................................................

(ख) केनापि तत् न चिन्तितम्।

........................................................................

(ग) ऋषभदेवेन दीर्घकालिकः उपवासः कृतः।

........................................................................

(घ) जनैः जीवनपद्धतिः परिवर्तिता।

........................................................................

(ङ) ऋषभेण योजना कृता।

........................................................................

© NCERT not to be republished

## ५. सन्धिं कुरुत —

(क) इति + अतः ..........................................

(ख) च + इति ..........................................

(ग) देवस्य + अपि ..........................................

(घ) तथा + एव ..........................................

(ङ) इति + एतादृशाः ..........................................

(च) ब्राह्मीद्वारा + एव ..........................................

(छ) प्रस्थितः + अयम् ..........................................

© NCERT not to be republished

## स्वाध्यायान्मा प्रमदः

### १. जैनधर्मस्य चतुर्विंशतिः तीर्थङ्कराः



(१) ऋषभदेवः (आदिनाथः)

- प्रथमः तीर्थङ्करः, 'आदिनाथः' इति प्रसिद्धः।
- आद्यः धर्मोपदेशकः, कृषिः, लिपिः, कला, व्यवसायः च जगति आरब्धाः।



(२) अजितनाथः



(३) सम्भवनाथः



(४) अभिनन्दनाथः


(५) सुमतिनाथः


(६) पद्मप्रभुः


(७) सुपार्श्वनाथः


(८) चन्द्रप्रभुः


(९) पुष्पदन्तः (सुविधिनाथः)


(१०) शीतलनाथः


(११) श्रेयान्सनाथः


(१२) वासुपूज्यः


(१३) विमलनाथः


(१४) अनन्तनाथः


(१५) धर्मनाथः


(१६) शान्तिनाथः

© NCERT not to be republished


(१७) कुन्थुनाथः


(१८) अरनाथः


(१९) मल्लिनाथः


(२०) मुनिसुव्रतः


(२१) नामिनाथः


(२२) नेमिनाथः (अरिष्टनेमिः)


(२३) पार्श्वनाथः

(२४) महावीरः (वर्धमानः)



- चतुर्विंशः तीर्थङ्करः, जैनधर्मस्य परमो महापुरुषः।
- वैशाली-कुण्डग्रामे जातः।
- 'पञ्चमहाव्रतानां' प्रचारकः।
- अहिंसा, अपरिग्रह, संयमस्य महत्त्वं लोकाय उपदिष्टवान्।

© NCERT not to be republished

२. **जैनधर्मस्य प्रमुखतीर्थस्थानानि —**

(१) सम्मेतशिखरम् (पारसनाथ पर्वतः, झारखण्डः)

(२) श्रवणबेलगोळः (कर्नाटकम्)

(३) पावापुरी (बिहारः)

(४) रैवतकः (गिरनारः) पर्वतः (गुजरातः)

(५) शत्रुञ्जयपर्वतः (पदलिप्तपुरम् — पालीताणा, गुजरातः)

(६) राजगृहम् (बिहारः)

(७) अयोध्या (उत्तरप्रदेशः)

(८) काशी (वाराणसी) (उत्तरप्रदेशः)

(९) चम्पापुरम् (भागलपुर, बिहारः)

(१०) हस्तिनापुरम् (उत्तरप्रदेशः)

(११) मिथिला (बिहारः)

(१२) द्वारिका (गुजरातः)

## यस्तु क्रियावान् मनुजः स विद्वान्

१. जैनसम्प्रदायानुसारं भोजनपद्धतिं लिखत। (किं खादन्ति ? कस्मिन् समये खादन्ति ?)

२. पञ्चमहाव्रतानि लिखत।

३. णमोकारमहामन्त्र-दिवसस्य विषये किं जानन्ति इत्युपरि कक्षायां वदत।

४. पञ्चमहाव्रतेषु कस्यापि एकस्य व्रतस्य विषये सहपाठिनां पुरतः आगत्य वदत।

© NCERT not to be republished

एकादशः पाठः

# वर्णोच्चारण-शिक्षा २

पूर्वस्यां कक्षायां '**मनुष्येषु वाग्-उत्पत्ति-प्रक्रिया**' कथं भवतीति वयं सामान्यतः दृष्टवन्तः। तत्रैव '**आस्यस्य** अभ्यन्तरे वर्णानाम् उत्पत्त्यर्थं **त्रीणि तत्त्वानि** आवश्यकानि भवन्ति—

(क) **स्थानम्**, (ख) **करणम्**, (ग) **आभ्यन्तर-प्रयत्नः**' च इत्यपि वयम् अवलोकितवन्तः। तत्र (क) **षट् स्थानानि**; (ख) **षट् करणानि** इति उभयोः विषये वयं पूर्वस्यां कक्षायाम् एव विस्तरेण ज्ञातवन्तः, यथा—







अस्मिन् पाठे – (ग) **आभ्यन्तर-प्रयत्नः** – इत्यस्य विषये विस्तरेण अवगच्छामः—

© NCERT not to be republished

## (ग) आभ्यन्तर-प्रयत्नः

आस्यस्य अभ्यन्तरे **करणं** येन प्रयत्नेन **स्थानं** स्पृशति, **स्थानस्य** समीपं वा याति, सः प्रयत्नः — '**आभ्यन्तर-प्रयत्नः**' इति उच्यते। **आभ्यन्तर-प्रयत्नः** पञ्चविधः भवति —

### (१) स्पृष्ट-प्रयत्नः

**करणं** यदा **स्थानं** 'स्पष्ट-रूपेण स्पृशति', तदा **करणस्य** '**स्पृष्ट-प्रयत्नः**' भवति। **करणस्य** **स्पृष्ट-प्रयत्नेन**
→ **स्थाने** **स्पर्श-व्यञ्जनानि** उत्पद्यन्ते।

**उदाहरणार्थम् अत्र मूर्धन्य-वर्णान् पश्यामः —**

उदाहरणम् — **मूर्धन्याः वर्णाः**



### (२) ईषत्-स्पृष्ट-प्रयत्नः

**करणं** यदा **स्थानं** 'स्वल्पम् एव स्पृशति', तदा **करणस्य** '**ईषत्-स्पृष्ट-प्रयत्नः**' भवति। **करणस्य** **ईषत्-स्पृष्ट-प्रयत्नेन**
→ **स्थाने** **अन्तःस्थ-व्यञ्जनानि** जायन्ते।

उदाहरणम् — **मूर्धन्याः वर्णाः**



not to be republished © NCERT

### (३) ईषद्-विवृत-प्रयत्नः

**करणं** यदा **स्थानं** न स्पृशति, परन्तु **स्थानस्य** बहु समीपं याति, तदा उभयोः **स्थान-करणयोः** मध्ये 'लघुः विवरः' इव स्वल्पः अन्तरालः जायते, तदा **करणस्य** 'ईषद्-विवृत-प्रयत्नः' भवति।

**करणस्य ईषद्-विवृत-प्रयत्नेन**

→ **स्थाने** **ऊष्म-व्यञ्जनानि** जायन्ते, तथा च

→ **स्थाने** **अयोगवाहौ** – **अनुस्वार-विसर्गौ** अपि जायेते।

**उदाहरणम्— मूर्धन्याः वर्णाः**



### (४) विवृत-प्रयत्नः

**करणं** यदा **स्थानं** न स्पृशति, अपितु स्थानस्य किञ्चित् समीपं याति, तदा उभयोः **स्थान-करणयोः** मध्ये 'स्फुटः विवरः' इव अन्तरालः जायते, तदा **करणस्य** 'विवृत-प्रयत्नः' भवति। **करणस्य विवृत-प्रयत्नेन**

→ **स्थाने** (*अ-कारं विहाय अन्ये सर्वे*) **स्वराः** उच्चार्यन्ते।

**उदाहरणम्— मूर्धन्याः वर्णाः**



कण्ठ्य-तालव्य-मूर्धन्य-दन्त्य-ओष्ठ्येषु पञ्च-प्रकारेषु वर्णेषु—
स्थान-करणयोः मध्ये उपर्युक्ताः चतुर्विधाः आभ्यन्तर-प्रयत्नाः दृश्यन्ते।

© NCERT not to be republished

## (५) संवृत-प्रयत्नः

स्वरेषु '**अ-कारः**' कश्चिद् विशिष्टः स्वरः अस्ति।

'**अ-वर्णस्य**' त्रयः उपभेदाः वयं पूर्वं दृष्टवन्तः

**अ-कारः** (ह्रस्वः), **आ-कारः** (दीर्घः), **अ३-कारः** (प्लुतः) इति।

एते त्रयः अपि 'स्वराः', 'कण्ठ्य-वर्णाः' च सन्ति। कण्ठ्य-वर्णेषु 'स्वस्थानम् एव करणं भवति' इति वयं पूर्वं दृष्टवन्तः। अर्थात्,

कण्ठ्य-वर्णानां → **स्थानम्** अपि **कण्ठः** (*कण्ठस्य पृष्ठ-भागः*)

→ **करणम्** अपि **कण्ठः** (*कण्ठस्य अग्र-भागः*)

एतेषु त्रिप्रकारेषु अ-वर्णेषु (ह्रस्व-दीर्घ-प्लुतेषु) —

- केवलम् **आ-कारस्य** (दीर्घस्य), **अ३-कारस्य** (प्लुतस्य) च, द्वयोः एव उच्चारणे – कण्ठे स्थान-करणयोः मध्ये 'स्फुटः विवरः' इव अन्तरालः भवति। अतः, अन्य-स्वराणाम् इव एतयोः द्वयोः दीर्घ-प्लुतयोः अपि पूर्ववत् 'विवृत-प्रयत्नः' एव भवति।
- परन्तु, **अ-कारस्य** (ह्रस्वस्य) उच्चारणे तु तथा न भवति। अत्र तु **कण्ठे स्थान-करणयोः** मध्ये 'संकोचः' भवति। अर्थात्, अत्र 'कण्ठः संकुचितः संकीर्णः वा भवति'। कण्ठस्य अयं 'संकोचः', 'संकीर्णता' वा '**संवृतम्**' इति कथ्यते।

अतः, विशेषरूपेण **अ-कारस्य** (ह्रस्वस्य) उच्चारणे '**संवृत-प्रयत्नः**' भवति। **कण्ठे करणस्य संवृत-प्रयत्नेन**

→ **स्थाने अ-कारः** उच्चार्यते।




© NCERT not to be republished

केवलं कण्ठ-स्थाने एव संवृत-प्रयत्नः भवति,
तदपि केवलम् अ-कारस्य उच्चारणार्थम् एव।




आस्ये विद्यमानानाम् एतेषां स्थान–करण–आभ्यन्तर-प्रयत्नानां सम्यक्-ज्ञानेन, तथा पुनःपुनः अभ्यासेन च वयं प्रत्येक-वर्णस्य एवञ्च सर्वेषां शब्दानां सुस्पष्टं शुद्धं च उच्चारणं कर्तुं प्रभवामः।

एवमेव 'वर्णमालायां स्वर-व्यञ्जनयोः मध्ये का भिन्नता?' इत्यपि यथावत् अवबोधामः। पुनश्च, व्यञ्जनानां मध्ये अपि—स्पर्शाः, अन्तःस्थाः, ऊष्माणः, अयोगवाहौ चेति ये भेदाः सन्ति; तेषाम् अपि परस्पर-भिन्नतां यथोचितम् अवगच्छामः।



© NCERT not to be republished

# वर्णमाला

## वर्णाः

### (१) स्वराः

आभ्यन्तर-प्रयत्नः

| | | |
|---|---|---|
| समानाक्षराणि | अ | संवृत-प्रयत्नः |
| | - आ अ३ इ ई इ३ उ ऊ उ३<br>ऋ ॠ ऋ३ ऌ ऌ३ | विवृत-प्रयत्नः |
| सन्ध्यक्षराणि | ए ए३ ऐ ऐ३ ओ ओ३ औ औ३ | |

### (२) व्यञ्जनानि

| | | |
|---|---|---|
| **स्पर्शाः** (वर्गीयाः) | क ख ग घ ङ<br>च छ ज झ ञ<br>ट ठ ड ढ ण<br>त थ द ध न<br>प फ ब भ म | स्पृष्ट्-प्रयत्नः |
| **अन्तःस्थाः** (अर्ध-स्वराः) | य र ल व | ईषत्-स्पृष्ट-प्रयत्नः |
| ऊष्माणः | श ष स ह | ईषद्-विवृत प्रयत्नः |
| अयोगवाहौ – अनुस्वारः | अं | |
| अयोगवाहौ – विसर्गः | अः | |



© NCERT not to be republished

## आस्यस्य

अभ्यन्तरे

## षट् स्थानानि, षट् करणानि, पञ्च आभ्यन्तर-प्रयत्नाः च



वर्णानां भेद-उपभेदानां मध्ये परस्परं याः भिन्नताः सन्ति, ताः संक्षेपेण अत्र पश्यामः —

**वर्णानां द्वौ मुख्य-भेदौ**

| | स्वरः | व्यञ्जनम् |
|---|---|---|
| १. | स्वतन्त्रः वर्णः<br>उच्चारणार्थम् अन्य-वर्णः नावश्यकः | परतन्त्रः वर्णः<br>उच्चारणार्थम् आधार-स्वरः आवश्यकः |
| २. | एकमात्रः / द्विमात्रः / त्रिमात्रः वा | अर्धमात्रः नित्यम् |
| ३. | स्वराः (२१) – विवृत-प्रयत्नः<br>अ-कारः (०१) – संवृत-प्रयत्नः | स्पर्शाः (२५) – स्पृष्ट-प्रयत्नः<br>अन्तःस्थाः (०४) – ईषत्-स्पृष्ट-प्रयत्नः<br>ऊष्माणः (०४) }<br>अयोगवाहौ (०२) } ईषद्-विवृत-प्रयत्नः |

**स्वराणां* द्वौ भेदौ**

| | समानाक्षर-स्वरः | सन्ध्यक्षर-स्वरः |
|---|---|---|
| १. | एक-स्थानी | द्वि-स्थानी |
| २. | ह्रस्वः उपभेदः भवति<br>ह्रस्वः एव प्रथमः उपभेदः<br>अत्र, ह्रस्व-दीर्घ-प्लुताः – त्रयः उपभेदाः<br>(*'ऌ-वर्णस्य दीर्घा न सन्ति'*) | ह्रस्वः उपभेदः न भवति<br>दीर्घः एव प्रथमः उपभेदः<br>अत्र, दीर्घ-प्लुतौ – द्वौ उपभेदौ |

**व्यञ्जनानां चत्वारः भेदाः**

| | स्पर्श-व्यञ्जनम् | अन्तःस्थ-व्यञ्जनम् | ऊष्म-व्यञ्जनम् | अयोगवाह-व्यञ्जनम् |
|---|---|---|---|---|
| १. | साधारण-व्यञ्जनम्<br>आधार-स्वरः– पश्चात् पूर्वं वा, उभयत्र संभवति | | | विशिष्ट-व्यञ्जनम्<br>आधार-स्वरः– नित्यं पूर्वमेव |
| २. | स्पृष्ट-प्रयत्नः | ईषत्-स्पृष्ट-प्रयत्नः | ईषद्-विवृत-प्रयत्नः | ईषद्-विवृत-प्रयत्नः |

* अत्र केवलं शुद्ध-स्वराः (अर्थात् निरनुनासिकाः स्वराः) एव गण्यन्ते, न तु अनुनासिक-स्वराः।

© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English |
|---|---|---|---|
| **प्रयत्नः** | **उच्चारणे प्रयुज्यमानं बलम्** | **उच्चारण में प्रयुक्त 'बल' अथवा 'दबाव'** | **'Effort' in Speech** |
| अभ्यन्तरे | अन्तः | अन्दर | Inside |
| आभ्यन्तरम् | अन्तःस्थितम् | अन्दर स्थित | Internal |
| **आभ्यन्तर-प्रयत्नः** | **अन्तःप्रयत्नः / आस्यस्य अभ्यन्तरे करणस्य स्थानं प्रति प्रयुक्तं बलम्** | **मस्तक के अन्दर, करण का – स्थान के प्रति प्रयुक्त 'बल' अथवा 'दबाव'** | **'Internal-Effort' in Articulation (exerted by the 'Tool' – towards the 'Place', inside the Head)** |
| स्पृष्टः | स्पर्शं कृतः | स्पर्श किया हुआ | Touched |
| ईषत् | अल्पम् | थोड़ा | Slightly / Little |
| ईषत्-स्पृष्टः | अल्पं स्पर्शं कृतः | थोड़ा स्पर्श किया हुआ | Slightly Touched |
| विवृतः | उद्घाटितः | खुला हुआ | Opened |
| विवरः | छिद्रः / अन्तरालः | अन्तराल | Opening / Gap |
| ईषद्-विवृतः | अल्पम् उद्घाटितः | थोड़ा खुला हुआ | Slightly Opened |
| संवृतः | अविस्तृतः | सिकुड़ा हुआ | Constrained / Contracted |
| संकोचः | संकोचनम् | सिकुड़ना | Compress |
| संकुचितः | संकीर्णः / संकोचं कृतः | सिकुड़ा गया | Constricted / Narrow |

© NCERT not to be republished

| | स्वराः | | |
|---|---|---|---|
| | अ-स्वरः | शेष-समानाक्षराणि | सन्ध्यक्षराणि |
| | संवृत-प्रयत्नः | विवृत-प्रयत्नः | |
| **१. कण्ठ्याः वर्णाः**<br>स्वस्थानम् – करणम्<br><br> | अ<br> | आ अ३ | ए ए३ ऐ ऐ३<br>ओ ओ३ औ औ३<br> |
| **२. तालव्याः वर्णाः**<br>जिह्वा – करणम्<br><br> | — | इ ई इ३ | ए ए३ ऐ ऐ३<br> |
| **३. मूर्धन्याः वर्णाः**<br>जिह्वा – करणम्<br><br> | — | ऋ ॠ ऋ३ |  |

© NCERT not to be republished

# व्यञ्जनानि

| स्पर्शाः | अन्तःस्थाः | ऊष्माणः | अयोगवाहौ |
|---|---|---|---|
| स्पृष्ट्-प्रयत्नः | ईषत्-स्पृष्ट्-प्रयत्नः | ईषद्-विवृत-प्रयत्नः | |
| क ख ग घ<br>ङ<br> | — | ह<br> | अः |
| च छ ज झ<br>ञ<br> | य<br> | श<br> | |
| ट ठ ड ढ<br>ण<br> | र<br> | ष<br> | |

© NCERT not to be republished

| | स्वराः | | |
|---|---|---|---|
| | अ-स्वरः | शेष-समानाक्षराणि | सन्ध्यक्षराणि |
| | संवृत-प्रयत्नः | विवृत-प्रयत्नः | |
| ४. दन्त्याः वर्णाः (जिह्वा – करणम्) | — | ऌ ॡ३ | |
| ५. ओष्ठ्याः वर्णाः (स्वस्थानं – करणम्) | — | उ ऊ उ३ | ओ ओ३ औ औ३ |
| ६. नासिक्याः वर्णाः (स्वस्थानं – करणम्) | — | | — |

### ४. दन्त्याः वर्णाः

जिह्वा – करणम्



दन्तः – स्थानम्

जिह्वा-अग्रः – करणम्



### ५. ओष्ठ्याः वर्णाः

स्वस्थानं – करणम्



ओष्ठः – स्थानम्

ओष्ठः – करणम्



### ६. नासिक्याः वर्णाः

स्वस्थानं – करणम्



नासिका – स्थानम्

नासिका – करणम्

© NCERT not to be republished

# व्यञ्जनानि

<table>
<tr><th>स्पर्शाः</th><th>अन्तःस्थाः</th><th>ऊष्माणः</th><th>अयोगवाहौ</th></tr>
<tr><th>स्पृष्ट-प्रयत्नः</th><th>ईषत्-स्पृष्ट-प्रयत्नः</th><th colspan="2">ईषद्-विवृत-प्रयत्नः</th></tr>
<tr><td>त थ द ध<br>न<br></td><td>ल<br>व<br></td><td colspan="2">स<br></td></tr>
<tr><td>प फ ब भ<br>म<br></td><td>व<br></td><td colspan="2">—</td></tr>
<tr><td>ङ ञ ण न म</td><td>—</td><td></td><td>अं<br></td></tr>
</table>

© NCERT not to be republished

## स्वाध्यायान्मा प्रमदः

### तत्र पाणिनीय-शिक्षा-सूत्राणि

| सूत्राणि | अर्थाः |
|---|---|
| **आभ्यन्तर-प्रयत्न–प्रकरणम्** | |
| प्रयत्नोऽपि द्विविधः। | (वर्णोच्चारणार्थं) '**प्रयत्नः**' द्विप्रकारकः भवति। |
| आभ्यन्तरो बाह्यश्च। | '**आभ्यन्तर-प्रयत्नः**' '**बाह्य-प्रयत्नः**' च इति<br>(*एतौ द्वौ प्रकारौ भवतः*)। |
| स्वस्थाने आभ्यन्तरस्तावत्। | वर्णस्य स्वकीयं स्थानं प्रति (*करणस्य*) यः प्रयत्नः, सः<br>→ 'आभ्यन्तर-प्रयत्नः' भवति, तद् अधुना जानीमः। |
| स्पृष्ट–करणाः – स्पर्शाः। | स्पर्शानां वर्णानाम् उच्चारणे, करणं<br>→ 'स्पृष्ट-प्रयत्नेन' स्थानं (*स्पष्टरूपेण*) स्पृशति। |
| ईषत्-स्पृष्ट–करणा – अन्तस्थाः। | अन्तःस्थानां वर्णानाम् उच्चारणे, करणम्<br>→ 'ईषत्-स्पृष्ट-प्रयत्नेन' स्थानं (*स्वल्पं*) स्पृशति। |
| ईषद्-विवृत–करणा – ऊष्माणः। | ऊष्मणां वर्णानाम् उच्चारणे, करणम्<br>→ 'ईषद्-विवृत-प्रयत्नेन' स्थानं प्रति (*समीपं*) याति। |
| विवृत–करणाः – स्वराः। | स्वराणां वर्णानाम् उच्चारणे, करणं<br>→ 'विवृत-प्रयत्नेन' स्थानं प्रति (*किञ्चित्-दूर-पर्यन्तं*) याति। |
| संवृतस्त्वकारः। | [संवृतः तु अकारः] अ-कारस्य (ह्रस्वस्य) वर्णस्य उच्चारणे तु (*अपवादरूपेण*), (*करणं*)<br>→ 'संवृत-प्रयत्नेन' स्थानं प्रति संकुचितः भवति। |
| इत्येषोऽन्तःप्रयत्नः। | अत्र पर्यन्तम् एषः उच्चारणस्य '**आभ्यन्तर-प्रयत्नः**' चर्चितः। |

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

### १. अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत —

(क) वर्णानाम् उत्पत्यर्थं कति आवश्यकानि तत्त्वानि भवन्ति ?

(ख) कति स्थानानि सन्ति ?

(ग) आभ्यन्तर-प्रयत्नः कतिविधः ?

(घ) करणं यदा स्थानं स्पष्टरूपेण स्पृशति, तदा करणस्य कः प्रयत्नः भवति ?

(ङ) अवर्णस्य कति उपभेदाः सन्ति ?

(च) संवृत-प्रयत्नः कुत्र भवति ?

### २. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत —

(क) आभ्यन्तर-प्रयत्नः कः उच्यते ?

(ख) ईषत्स्पृष्ट-प्रयत्नः कदा भवति ?

(ग) करणस्य विवृत-प्रयत्नेन के स्वराः उच्चार्यन्ते ?

(घ) आभ्यन्तर-प्रयत्नाः कुत्र दृश्यन्ते ?

(ङ) आभ्यन्तर-प्रयत्ने स्वरेषु विशिष्टः स्वरः कः अस्ति ?

### ३. अधोलिखितानां वर्णानां क–स्तम्भेन सह मेलनं कुरुत —

| क-स्तम्भः | ख-स्तम्भः |
|---|---|
| (क) विवृत-प्रयत्नः | (१) व् |
| (ख) स्पृष्ट-प्रयत्नः | (२) श् |
| (ग) ईषत्स्पृष्ट-प्रयत्नः | (३) ऋ |
| (घ) ईषत्विवृत-प्रयत्नः | (४) अ |
| (ङ) संवृत-प्रयत्नः | (५) ध् |

© NCERT not to be republished

४. **अधोलिखितानां वाक्यानाम् उत्तराणि आम्/ न इति सन्दर्भानुसारं लिखत—**

(क) 'ई' वर्णः सन्ध्यक्षरम् अस्ति। (आम् / न) ....................

(ख) 'ऐ' वर्णः सन्ध्यक्षरम् अस्ति। (आम् / न) ....................

(ग) 'झ' वर्णः सपर्शः अस्ति। (आम् / न) ....................

(घ) 'र' वर्णः स्पर्शेषु परिगण्यते। (आम् / न) ....................

(ङ) 'य, र, ल, व' वर्णाः ऊष्माणः सन्ति। (आम् / न) ....................

५. **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत—**

(क) स्वराः स्वतन्त्रवर्णाः सन्ति। ........................................

(ख) व्यञ्जनानि अर्धमात्रिकाणि भवन्ति। ........................................

(ग) स्वराणां द्वौ भेदौ भवतः। ........................................

(घ) ह्रस्वस्य उपभेदाः न भवन्ति। ........................................

(ङ) व्यञ्जनानां चत्वारो भेदाः भवन्ति। ........................................

६. **वर्णसमुच्चयं पाठात् चित्वा लिखत—**

वर्णाः

(क) एकस्थानि-वर्णाः ..................................................

(ख) स्पर्श-व्यञ्जनानि ..................................................

(ग) अयोगवाह-व्यञ्जनानि ..................................................

(घ) ऊष्म-व्यञ्जनानि ..................................................

(ङ) द्विस्थानि-वर्णाः ..................................................

© NCERT not to be republished

# परिशिष्टम् १

# अन्वयः

0902CH12

सामान्यतः श्लोकेषु कर्तृपदं कर्मपदं तृतीयादिविभक्त्यन्तं पदं क्रियापदं विशेषणादिकं च छन्दसः अनुगुणं पूर्वापरं भवितुमर्हति। तेन पठितारः पदानां मध्ये परस्परं सम्बन्धं (अन्वयं) कल्पयितुं कदाचित् कष्टम् अनुभवन्ति। अतः श्लोकेषु विद्यमानानां पदानां परस्परं सम्बन्धं सरलरूपेण ज्ञातुं कश्चन क्रमः ज्ञातव्यः। तदनन्तरमेव श्लोकस्य अर्थमवगन्तुं शक्यते।

**श्लोकान्वयविधिः**

१. दण्डान्वयविधिः

२. खण्डान्वयविधिः

एतयोः विध्योः ज्ञानेन छात्राः श्लोके विद्यमानानां पदानां सम्बन्धं ज्ञात्वा श्लोकस्य अर्थं भावं च अवगन्तुं शक्नुवन्ति।

दण्डान्वयः (दण्डवत् अन्वयः दण्डान्वयः)—

**आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम्।**
**क्त्वा-णमुल्-ल्यप्-प्रभृत्येवं पूर्वं दण्डान्वये भवेत्॥**

कर्तृपदं कर्मपदं क्रियापदं चेति प्राथमिकी वाक्यरचनाशैली वर्तते। अस्मिन् अन्वयक्रमे विशेषणानि क्रमशः तत्तत्पदस्य पूर्वं प्रयुक्तानि भवन्ति। कर्तृपदस्य विशेषणं कर्तृपदात् पूर्वं, कर्मपदस्य विशेषणं कर्मपदात् पूर्वम् इति क्रमशः विधानं भवति। यदि श्लोकेषु अव्ययानि कृदन्तपदानि वा सन्ति तर्हि तानि केन पदेन सह सम्बद्धानि इति ज्ञात्वा तत्र प्रयोक्तव्यानि। तृतीयादीनि विभक्त्यन्तानि पदानि अपि केन पदेन सह सम्बद्धानि इति ज्ञात्वा तानि पदानि पूर्वं वा परं वा योजनीयानि। ततः परं सर्वान्ते क्रियापदं लिखेत्। कदाचित् कर्तृपदं क्रियापदं वा श्लोकेषु न दृश्यते तदा अस्माभिः विचिन्त्य तत् पदं योजनीयम्। आहत्य पदानां परस्परम् अन्वयः एव दण्डान्वयस्य क्रमः भवति। तदेव श्लोकरूपेण उक्तम्—

© NCERT not to be republished

**यथा** — शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषस्स विद्वान्।
सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम्॥

**पदच्छेदः**

शास्त्राणि, अधीत्य, अपि, भवन्ति, मूर्खाः, यः, तु, क्रियावान्, पुरुषः, सः, विद्वान्, सुचिन्तितं, च, औषधम्, आतुराणां, न, नाममात्रेण, करोति, अरोगम्॥

**दण्डान्वयः** — (केचन) शास्त्राणि अधीत्यापि मूर्खाः भवन्ति। यः क्रियावान् सः पुरुषः तु विद्वान् (भवति)। (यथा) सुचिन्तितम् औषधं नाममात्रेण आतुराणाम् अरोगं न करोति।



**विवरणम्** — अस्मिन् श्लोके 'केचन' इति शब्दः न प्रयुक्तः, 'शास्त्राणि अधीत्यापि मूर्खाः भवन्ति' इति वर्तते। तर्हि अत्र काचित् जिज्ञासा भवति यत् "शास्त्राणि अधीत्यापि के मूर्खाः भवन्ति" इति। तस्य उत्तरं यदि श्लोके विद्यते तर्हि तत् पदं पूर्वं स्थापनीयम्। परम् अस्मिन् श्लोके तु तत् पदं न प्रयुक्तम्। अतः अस्माभिः सुप्तं पदम् योजनीयम् (अध्याहार्यम्)। अत्र सुप्तं पदं 'केचन' इति भवितुमर्हति। तथैव "यस्तु क्रियावान् पुरुषस्स विद्वान्" इत्यत्र क्रियापदं किमपि न प्रयुक्तम्। किन्तु वाक्यस्य पूर्तये क्रियापदम् आवश्यकम्। अतः अत्रापि सुप्तं क्रियापदं किञ्चन योजनीयम् (अध्याहार्यम्)। तच्च 'भवति' इति क्रियापदं योजितम्। अनेन प्रकारेण 'यथा' इति शब्दस्यापि अध्याहारः कृतः। तेन श्लोकस्य पूर्णः अर्थः स्पष्टः भवति।

अत्र शिक्षकः प्रश्नोत्तरमाध्यमेनापि अन्वयं कर्तुं शक्नोति। प्रथमं पदच्छेदं कृत्वा तदनन्तरम् अध्यापकः प्रश्नं कुर्वन् श्लोके विद्यमानेभ्यः पदेभ्यः संख्यां प्रददाति। ततः परं छात्राः क्रमशः पदानि योजयित्वा अन्वयं कर्तुमर्हन्ति।

© NCERT not to be republished

यथा —

| | | | |
|---|---|---|---|
| १. शास्त्राणि | २. अधीत्य | ३. अपि | ४. मूर्खाः |
| ५. भवन्ति | ६. यः | ७. क्रियावान् | ८. सः |
| ९. पुरुषः | १०. तु | ११. विद्वान् | १२. सुचिन्तितं |
| १३. औषधम् | १४. नाममात्रेण | १५. च | १६. आतुराणां |
| १७. अरोगम् | १८. न | १९. करोति | |

**क्रमशः योजनम्** — (केचन) शास्त्राणि अधीत्य अपि मूर्खाः भवन्ति। यः क्रियावान् सः पुरुषः तु विद्वान् (भवति)। सुचिन्तितम् औषधं नाममात्रेण च आतुराणाम् अरोगं न करोति।

**खण्डान्वयः**

**कर्तृ-कर्म-क्रियास्तावच्छ्लोके योज्यास्ततः परम्।**
**किमो रूपं पुरस्कृत्य तृतीयादीनि योजयेत्॥**
**ल्यबन्तञ्च तुमुन्तञ्च क्त्वान्तं कर्मविभूषितम्।**
**अन्वयस्थपदानाञ्च यथा लिङ्गविशेषणे॥**

खण्डशः अन्वयः खण्डान्वयः इति। तन्नाम आरम्भे एव श्लोकस्य पूर्णभागस्य अन्वयः न क्रियते अपि तु प्रतिपदं परस्परम् अन्वयः क्रियते। तदपि प्रश्नोत्तरमाध्यमेन। अन्ते समग्रस्य श्लोकस्य अन्वयः स्वयमेव भविष्यति। श्लोकस्य अन्वयार्थम् अवबोधनार्थं च विशेषरूपेण चत्वारि सहकारि-कारणानि उक्तानि सन्ति। तानि — **आकाङ्क्षा, योग्यता, आसत्तिः, तात्पर्यं** च इति।

१. **आकाङ्क्षा** — अपेक्षित-विषयस्य ज्ञाने इच्छा आकाङ्क्षा। पूर्वपदस्य अग्रिमपदस्य वा ज्ञाने इच्छा इत्यपि वक्तुं शक्नुमः।

- **पूर्वपदस्य ज्ञाने इच्छा**

  **यथा** — पठति, लिखति, खादति, ददाति, पश्यति, नयति, भवन्ति, कुर्वन्ति, कुरु, स्मर, त्यज, गतम्, प्राप्तम्, लब्धम्, कृतम्, ज्ञातव्यम्, त्यक्तव्यम् इति एतादृशानि क्रियापदानि श्लोकेषु भवितुमर्हन्ति। तर्हि अत्र क्रियापदस्य श्रवणानन्तरं काचित् जिज्ञासा (ज्ञातुम् इच्छा) भवति। यथा — 'पठति' इति क्रियापदश्रवणानन्तरं 'कः पठति ?' 'किं पठति ?'

© NCERT not to be republished

'कुत्र पठति ?' 'कदा पठति ?' 'कथं पठति ?' 'किमर्थं पठति ?' 'किं निमित्तं पठति ?' 'किं कृत्वा पठति ?' च इत्यादयः विभिन्नाः प्रश्नाः भवितुमर्हन्ति।

- **अग्रिमपदस्य ज्ञाने इच्छा**

  **यथा**— श्लोके 'प्रथमान्तं पदं किम् ?' 'द्वितीयान्तं पदं किम् ?' 'तृतीयान्तं पदं किम् ?' इत्यादिकम् अत्र उदाहरणं भवितुमर्हति।

२. **योग्यता**— पदानां मध्ये परस्पर-सम्बन्धस्य पात्रता एव योग्यता । गगने पुष्पं विकसति । अस्मिन् वाक्ये योग्यतायाः अभावः वर्तते । गगने पुष्पस्य असम्भवात्।

३. **आसत्तिः**— पदानां परस्परं सामीप्यम् आसत्तिः (सन्निधिः)। एकस्य पदस्य कथनानन्तरम् अग्रिमपदम् अपि अनुक्षणं वदेत्। यदि न वदति तर्हि आसत्तिः न भवति।

**यथा**— 'सः पुस्तकं पठति ।' अत्र एकवारमेव पूर्णं वाक्यं वदति अथवा पठति तर्हि पदानां मध्ये सामीप्यं भवति। तदेव आसत्तिः इत्युच्यते। यदि 'सः' इत्युक्त्वा अग्रिमं पदं पञ्चनिमेषाणामनन्तरम् अथवा कालान्तरे वदति तर्हि पदानां मध्ये सामीप्यस्य अभावः भवति। तेन पदानां मध्ये परस्परम् अन्वयः अपि न भवति।



४. **तात्पर्यम्**— शब्दविशेषात् अर्थविशेषस्य ज्ञाने इच्छा एव तात्पर्यं भवति । शब्दस्य अर्थः सम्यक् ज्ञातव्यः, अन्यथा शब्दस्य अर्थः अनर्थः भवितुमर्हति। तेन अन्वयोऽपि सम्यक् भवितुं नार्हति।

**यथा**— 'शतायुर्भव' इत्युक्ते शतं वर्षाणि जीवतु इति अर्थः न अपितु 'चिरञ्जीवी भव' इति । खण्डान्वयविधौ आकाङ्क्षानुगुणं प्रश्नाः भवन्ति।

© NCERT not to be republished

अतः एषः विधिः आकाङ्क्षाविधिः इत्यपि उच्यते । अत्र प्रश्नेषु प्रथमतः क्रियापदेन आकाङ्क्षाप्रश्नः क्रियते ।

**यथा** — सा विद्यालयं गच्छति इति वाक्ये क्रियापदं किम् इति प्रश्नः भवति । तस्य उत्तरं 'गच्छति' इति । तदनन्तरं क्रियाम् अनुसृत्य कर्तुः कर्मणः तृतीयादिविभक्त्यन्तानां क्त्वान्तल्यबन्तानाम् अव्यायादीनां च विषये आकाङ्क्षां कृत्वा प्रश्नाः क्रियन्ते । छात्राः विचिन्त्य उत्तराणि वदिष्यन्ति । खण्डान्वयविधौ प्रश्नाः सामान्यतया द्विपदात्मकाः त्रिपदात्मकाः चतुष्पदात्मकाः वा भवितुमर्हन्ति । तन्नाम लघुप्रश्नाः भवन्ति ।

**श्लोकः**

**सम्पूर्णकुम्भो न करोति शब्दमर्धो घटो घोषमुपैति नूनम् ।**
**विद्वान् कुलीनो न करोति गर्वमल्पो जनो जल्पति साट्टहासम् ।।**

**पदच्छेदः** — सम्पूर्णकुम्भः, न, करोति, शब्दम्, अर्धः, घटः, घोषम्, उपैति, नूनम्, विद्वान्, कुलीनः, न, करोति, गर्वम्, अल्पः, जनः, जल्पति, साट्टहासम् ।

**खण्डान्वयः**

| क्र.सं. | शिक्षकः प्रश्नान् करोति । | छात्राः उत्तराणि वदन्ति । |
|---|---|---|
| | प्रथमचरणे क्रियापदं किम् ? | करोति । |
| | कः न करोति ? | सम्पूर्णकुम्भः न करोति । |
| | सम्पूर्णकुम्भः किं न करोति ? | सम्पूर्णकुम्भः शब्दं न करोति । |
| | द्वितीयचरणे क्रियापदं किम् ? | उपैति । |
| | कः उपैति ? | घटः उपैति । |
| | कीदृशः घटः उपैति ? | अर्धः घटः उपैति । |
| | अर्धः घटः किम् उपैति ? | अर्धः घटः घोषम् उपैति । |
| | अर्धः घटः घोषं कथम् उपैति । | अर्धः घटः घोषं नूनम् उपैति । |
| | तृतीयचरणे क्रियापदं किम् ? | करोति । |
| | कः न करोति ? | विद्वान् न करोति । |
| | कीदृशः विद्वान् न करोति ? | कुलीनः विद्वान् न करोति । |
| | कुलीनः विद्वान् किं न करोति ? | कुलीनः विद्वान् गर्वं न करोति । |

© NCERT not to be republished

| | | |
|---|---|---|
| | चतुर्थचरणे क्रियापदं किम् ? | जल्पति । |
| | कः जल्पति ? | जनः जल्पति । |
| | कीदृशः जनः जल्पति ? | अल्पः जनः जल्पति । |
| | अल्पः जनः कथं जल्पति ? | अल्पः जनः साट्टहासं जल्पति ? |

**अन्वयः**—सम्पूर्णकुम्भः शब्दं न करोति । अर्धः घटः घोषं नूनम् उपैति । कुलीनः विद्वान् गर्वं न करोति । अल्पः जनः साट्टहासं जल्पति ।

© NCERT not to be republished

# परिशिष्टम् २

# समासः

समसनं समासः भवति। समसनं नाम सङ्क्षेपणम् इत्यर्थः। अर्थात् समासे अर्थयुक्तं पदद्वयं, पदत्रयम् अथवा अनेकपदं मिलित्वा एकं पदं भवति। यथा—'महा' तथा 'पुरुष' इति अर्थयुक्तं पदद्वयम् अस्ति। तद् द्वयमपि मिलित्वा एकपदं भवति महापुरुषः इति। एवंविधानाम् अर्थवतां पदानाम् एकीभवनमेव समासः।

समासः सामान्यतः परस्परं सुबन्तानां मध्ये भवति। तथैव समासः युगपत् द्वयोः द्वयोः सुबन्तयोः मध्ये भवति। यथा—सीतायाः पतिः = सीतापतिः।

द्वन्द्वसमासे तु युगपत् बहूनां सुबन्तानां मध्ये समासः भवति। यथा—हरिश्च हरश्च गुरुश्च = हरिहरगुरवः।

परस्परम् अन्वितयोः (सम्बद्धयोः) सुबन्तयोः एव समासः भवति। यदि पदानां मध्ये परस्परम् अन्वयः (सम्बन्धः) न भवति तर्हि समासः अपि न भवति।

परस्परम् अन्वयस्य उदाहरणम्—सः राज्ञः पुत्रः (राजपुत्रः) गच्छति।

यत्र अन्वयः न भवति तत्र—भवति दर्शनं राज्ञः, पुत्रः कृषकस्य गच्छति। अत्र राज्ञः अन्वयः दर्शनम् इति पदेन सह भवति। पुत्रः इत्यस्य अन्वयः कृषकस्य इत्यनेन सह अस्ति। अतः अस्मिन् वाक्ये राज्ञः पुत्रः एतयोः मध्ये परस्परम् अन्वयः नास्ति अतः तयोः समासः अपि नास्ति।



समासे पूर्वपदम् उत्तरपदम् इति द्विविधं भवति। पूर्वं प्रयुक्तं पदं पूर्वपदम् अनन्तरं प्रयुक्तं पूर्वपदम् उत्तरपदमिति। यथा—सीतापतिः इत्यत्र 'सीता' इति पूर्वं

© NCERT not to be republished

प्रयुक्तं, 'पतिः' इति अनन्तरं प्रयुक्तम्। अतः अत्र 'सीता' इति पूर्वपदं, 'पतिः' इति उत्तरपदं च भवति।

समासे कृते पूर्वपदम् उत्तरपदं च प्रातिपदिकरूपेण स्थितं भवति। तदनन्तरं समस्तात् पदात् विभक्तिः योजनीया।

**यथा**—सीतायाः पतिः = सीता + ङस् + पति + सु = सीतापति (ङस् तथा सु एतयोः लोपः)

सीतापति + सु = सीतापतिः। अत्र 'सीतापति' इति प्रातिपदिकं समस्तपदं च तस्मात् विभक्तिप्रत्ययः योजितः। तदा सीतापतिः इति रूपं भवति। एवमेव समासविषये सर्वत्र अवबोद्धव्यम्।

**विग्रहवाक्यम्**—वृत्त्यर्थस्य अवबोधकं वाक्यं विग्रहः। वृत्तिः नाम समासादिः। समासादेः अर्थं बोधयितुं यद् वाक्यम् उच्यते तद् वाक्यं विग्रहः इति व्यवह्रियते। **यथा**—'राष्ट्रनायकः' इति समासः (समस्तपदम्)। 'राष्ट्रस्य नायकः' इति विग्रहवाक्यम्। अत्र 'राष्ट्र' इति पूर्वपदं 'नायकः' इति उत्तरपदम्।

**विग्रहः द्विधा**

१. स्वपदविग्रहः　　　　२. अस्वपदविग्रहः

१. **स्वपदविग्रहः**—यदि समासस्य अर्थः समासे नाम समस्तपदे विद्यमानैः पदैः एव वर्णितः भवति तर्हि सः स्वपदविग्रहः भवति। तथा च—'समासघटकपदसहितं वाक्यं स्वपदविग्रहः' इत्यर्थः। (स्वपदैः (समासपदैः) विग्रहः।

**यथा**—सुदामा कृष्णसखा अस्ति। कृष्णस्य सखा कृष्णसखा इति स्वपदविग्रहः।

२. **अस्वपदविग्रहः**—यदि समासस्य अर्थः समासे नाम समस्तपदे विद्यमानानि पदानि विहाय अन्यैः पदैः वर्णितः भवति तर्हि सः अस्वपदविग्रहः भवति। तथा च—'समासघटकपदरहितं वाक्यम् अस्वपदविग्रहः' इत्यर्थः। सामान्यतः अत्र एकं पदं समासघटकमेव भवति। नित्यसमासे अस्वपदविग्रहः भवति।

© NCERT not to be republished

**यथा**—बालः यथामति कार्यं करोति। मतिम् अनतिक्रम्य यथामति इति अस्वपदविग्रहः। अत्र अनतिक्रम्य इति समासे अविद्यमानं पदं वर्तते।

**मुख्यतया समासः द्विविधः**— १. केवलसमासः
२. विशेषसमासः

**१. केवलसमासः**—तत्पुरुषादिसंज्ञाभिः विनिर्मुक्तः समाससंज्ञामात्रयुक्तः केवलसमासः।

**यथा**—पूर्वं भूतः = भूतपूर्वः

**२. विशेषसमासः चतुर्धा**— १. तत्पुरुषसमासः २. द्वन्द्वसमासः
३. बहुव्रीहिसमासः ४. अव्ययीभावसमासः

**समासस्य निर्णयः**

पदेषु कः समासः अस्ति इति ज्ञातुं पूर्वपदस्य उत्तरपदस्य च ज्ञानं सम्यक् भवेत्। तदनन्तरं कस्य पदस्य प्राधान्यमस्ति इति ज्ञातव्यम्। तदर्थं समासघटितपदस्य श्रवणानन्तरं तेन सह किञ्चन क्रियापदं योजयेत्। ततः क्रियापदेन सह पूर्वपदस्य सम्बन्धः अस्ति वा उत्तरपदस्य वा इति द्रष्टव्यम्। यस्य पदस्य सम्बन्धः क्रियापदेन सह भवति तत् पदं प्रधानं भवति। अग्रे विद्यमानानि उदाहरणानि परिशीलयामः।

**उदाहरणम्—(१)** रामदूतः गच्छति। अत्र रामस्य दूतः गच्छति इति विग्रहवाक्ये कः गच्छति ?

रामस्य दूतः गच्छति। अतः अत्र रामः न गच्छति अपितु दूतः गच्छति इति स्पष्टम्।

तर्हि 'राम' इति पूर्वपदेन सह क्रियापदस्य साक्षात् सम्बन्धः नास्ति। परं 'दूत' इति उत्तरपदेन सह क्रियापदस्य साक्षात् सम्बन्धः अस्ति। अतः अत्र उत्तरपदार्थः प्रधानः इति निश्चेतुं शक्यते। एवमेव अन्यानि अपि उदाहरणानि अपि पश्यामः।

**उदाहरणम्—(२)** राजेशसुरेशौ फलं खादतः। राजेशश्च सुरेशश्च फलं खादतः। इति वाक्ये कस्य पदस्य प्राधान्यम् अस्ति ? क्रियापदेन सह कस्य सम्बन्धः अस्ति ?

© NCERT not to be republished

राजेशः खादति, सुरेशः अपि खादति। तर्हि अस्मिन् विग्रहवाक्ये पूर्वपदम् उत्तरपदं चेति द्वयोः अपि साक्षात् सम्बन्धः क्रियापदेन सह अस्ति। अतः उभयपदार्थः प्रधानः इति निश्चयः।

**उदाहरणम्—(३)** पीताम्बरः पश्यति। पीतम् अम्बरं यस्य सः पीताम्बरः (विष्णुः) इति वाक्ये कस्य प्राधान्यम् ?

यः पीतम् अम्बरं (वस्त्रं) धरति सः इति अर्थः। तर्हि क्रियापदेन सह कस्य पदस्य अन्वयः अत्र ?

पीतम् अम्बरं यस्य सः (विष्णुः) तिष्ठति। तर्हि पूर्वपदं पीतं न तिष्ठति। उत्तरपदम् अम्बरं अपि न तिष्ठति। एवं तर्हि अस्मिन् वाक्ये पूर्वपदस्यापि प्राधान्यं नास्ति उत्तरपदस्यापि प्राधान्यं नास्ति। समासवाक्यात् अन्यपदस्य विष्णुः इति पदस्य प्राधान्यम् अस्ति। यः पीतम् अम्बरं धरति सः (विष्णुः) इत्यर्थः।

**उदाहरणम्—(४)** उपनगरं नदी प्रवहति। अत्र विग्रहवाक्यं भवति नगरस्य समीपे इति। नदी नगरस्य प्रवहति इति साक्षात् अन्वयः न भवति। नदी समीपे प्रवहति इति अन्वयः भवति। एवं तर्हि सामीप्यार्थसूचकम् 'उप' इति पदं पूर्वपदम् अस्ति। तथा च पूर्वपदेन सह अत्र क्रियापदस्य अन्वयः अपि भवति। एवं समासे पूर्व-पदस्य प्राधान्यमिति ज्ञातव्यम्।

**तत्पुरुषसमासः—** प्रायः उत्तरपदार्थप्रधानः तत्पुरुषसमासः।

**उदाहरणम्—** रामस्य दूतः = रामदूतः। रामदूतः गच्छति।

**द्वन्द्वसमासः—** प्रायः उभयपदार्थप्रधानः द्वन्द्वसमासः।

**उदाहरणम्—** राजेशश्च सुरेशश्च = राजेशसुरेशौ (राजेशसुरेशौ ग्रामं गच्छतः)



© NCERT not to be republished

**बहुव्रीहिसमासः** — प्रायः अन्यपदार्थप्रधानः बहुव्रीहिसमासः।

**उदाहरणम्**—पुस्तकं हस्ते यस्य सः = पुस्तकहस्तः (बालकः)। कः सः पुस्तकहस्तः ?

**अव्ययीभावसमासः** —प्रायः पूर्वपदार्थप्रधानः अव्ययीभावसमासः।

**उदाहरणम्**—नगरस्य समीपम् = उपनगरम् (उपनगरं नदी प्रवहति)

**तत्पुरुषसमासः** —प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषसमासः।

### १. विभक्तितत्पुरुषः षड्विधः

| क्र.सं | तत्पुरुषसमासः | विग्रहवाक्यम् | समासः (समस्तपदम्) |
|---|---|---|---|
| १. | द्वितीयातत्पुरुषः | गृहं गतः | गृहगतः |
| २. | तृतीयातत्पुरुषः | नखैः भिन्नः | नखभिन्नः |
| ३. | चतुर्थीतत्पुरुषः | गवे हितम् | गोहितम् |
| ४. | पञ्चमीतत्पुरुषः | चोरात् भयम् | चोरभयम् |
| ५. | षष्ठीतत्पुरुषः | वृक्षस्य मूलम् | वृक्षमूलम् |
| ६. | सप्तमीतत्पुरुषः | कार्ये कुशलः | कार्यकुशलः |

### २. कर्मधारयसमासः

कर्मधारयसमासः अपि तत्पुरुषसमासान्तर्गतः भवति। कर्मधारयसमासः नवधा।

| क्र.सं | कर्मधारयसमासः | विग्रहवाक्यम् | समासः (समस्तपदम्) |
|---|---|---|---|
| १. | विशेषणपूर्वपदः | नीलो मेघः | नीलमेघः |
| २. | विशेषणोत्तरपदः | वैयाकरणः खसूचिः | वैयाकरणखसूचिः |
| ३. | विशेषणोभयपदः | शीतम् उष्णम् | शीतोष्णम् |
| ४. | उपमानपूर्वपदः | मेघ इव श्यामः | मेघश्यामः |
| ५. | उपमानोत्तरपदः | नरः व्याघ्रः इव | नरव्याघ्रः |
| ६. | अवधारणापूर्वपदः | विद्या इव धनम् | विद्याधनम् |

| | | | |
|---|---|---|---|
| ७. | सम्भावनापूर्वपद: | आम्र: इति वृक्ष: | आम्रवृक्ष: |
| ८. | मध्यमपदलोप: | शाकप्रिय: पार्थिव: | शाकपार्थिव: |
| ९. | मयूरव्यंसकादि: | अन्यो देश: | देशान्तरम् |

### ३. द्विगु: समास:

द्विगुसमास: अपि तत्पुरुषस्यैव भेद:। एष: त्रिविध:।

| क्र.सं | समास: | विग्रहवाक्यम् | समस्तपदम् |
|---|---|---|---|
| १. | समाहारद्विगु: | त्रयाणां लोकानां समाहार: | त्रिलोकी |
| २. | तद्धितार्थद्विगु: | षण्णां मातॄणाम् अपत्यम् | षाण्मातुर: |
| ३. | उत्तरपदद्विगु: | पञ्च गाव: धनं यस्य स: | पञ्चगवधन: |

### ४. नञ्-प्रभृति: तत्पुरुषसमास:

नञ्-समास: अपि तत्पुरुषस्यैव भेद:। एष: पञ्चविध:।

| क्र.सं | समास: | विग्रहवाक्यम् | समस्तपदम् |
|---|---|---|---|
| १. | नञ्-तत्पुरुष: | न धर्म: | अधर्म: |
| २. | कुतत्पुरुष: | कुत्सित: पुत्र: | कुपुत्र: |
| ३. | गतितत्पुरुष: | अशुक्लं शुक्लं कृत्वा | शुक्लीकृत्य |
| ४. | प्रादितत्पुरुष: | १. प्रगत: आचार्य:<br>२. अतिक्रान्त: देवम्<br>३. निष्कान्त: वाराणस्या: | प्राचार्य:<br>अतिदेव:<br>निर्वाराणसि: |
| ५. | उपपदतत्पुरुष: | कुम्भं करोति इति | कुम्भकार: |
| ६. | एकदेशीतत्पुरुष: | १. अर्धं ग्रामस्य<br>२. अह्न: पूर्वम् | अर्धग्राम:<br>पूर्वाह्ण: |

© NCERT not to be republished

## द्वन्द्वसमासः

प्रायः उभयपदार्थप्रधानः द्वन्द्वसमासः। द्वन्द्वसमासस्य भेदद्वयम्।

**द्वन्द्वसमासः**

- १. इतरेतरद्वन्द्वसमासः
  - क. द्विपदद्वन्द्वसमासः
  - ख. बहुपदद्वन्द्वसमासः
- २. समाहारद्वन्द्वसमासः
  - क. समाहारद्वन्द्वसमासः
  - ख. नित्यसमाहारद्वन्द्वसमासः

### १. इतरेतरद्वन्द्वसमासः

| क्र.सं. | समासस्य नाम | विग्रहः | समासः (समस्तपदम्) |
|---|---|---|---|
| क. | द्विपदद्वन्द्वसमासः | रामश्च कृष्णश्च | रामकृष्णौ |
| ख. | बहुपदद्वन्द्वसमासः | रामश्च कृष्णश्च सुरेशश्च गिरीशश्च | रामकृष्णसुरेशगिरीशाः |

### २. समाहारद्वन्द्वसमासः

| क्र.सं. | समासस्य नाम | विग्रहः | समासः (समस्तपदम्) |
|---|---|---|---|
| क. | समाहारद्वन्द्वसमासः | संज्ञा च परिभाषा च | संज्ञापरिभाषम् |
| ख. | नित्यसमाहारद्वन्द्वसमासः | पाणी च पादौ च | पाणिपादम् |

© NCERT not to be republished

## बहुव्रीहिसमासः

प्रायः अन्यपदार्थप्रधानः बहुव्रीहिः। बहुव्रीहिसमासः द्विधा।

**बहुव्रीहिसमासः**

१. समान्यबहुव्रीहिः (षड् भेदाः)

२. विशेषबहुव्रीहिः (नव भेदाः)

### १. सामान्यबहुव्रीहिः पुनः षोढा

| क्र.सं. | समासनाम | विग्रहः | समासः (समस्तपदम्) |
|---|---|---|---|
| १. | द्वितीयार्थबहुव्रीहिः | प्राप्तम् उदकं यं सः | प्राप्तोदकः (ग्रामः) |
| २. | तृतीयार्थबहुव्रीहिः | पीतं क्षीरं येन सः | पीतक्षीरः (शिशुः) |
| ३. | चतुर्थ्यर्थबहुव्रीहिः | दत्तः पशुः यस्मै सः | दत्तपशुः (शिवः) |
| ४. | पञ्चम्यर्थबहुव्रीहिः | उद्धृतं जलं यस्मात् सः | उद्धृतजलः (कूपः) |
| ५. | षष्ठ्यर्थबहुव्रीहिः | पीतम् अम्बरं यस्य सः | पीताम्बरः (विष्णुः) |
| ६. | सप्तम्यर्थबहुव्रीहिः | बहूनि फलानि यस्मिन् सः | बहुफलः (वृक्षः) |

### २. विशेषबहुव्रीहिसमासः नवधा

| क्र.सं. | समासनाम | विग्रहः | समासः (समस्तपदम्) |
|---|---|---|---|
| १. | व्यधिकरणः बहुव्रीहिः | चक्रं पाणौ यस्य सः | चक्रपाणिः |
| २. | सङ्ख्योत्तरपदः बहुव्रीहिः | विंशतेः समीपे ये सन्ति ते | उपविंशाः |
| ३. | संख्योभयपदः बहुव्रीहिः | द्वौ वा त्रयो वा | द्वित्राः |
| ४. | सहपूर्वपदः बहुव्रीहिः | शिष्येण सह वर्तत इति | सशिष्यः |
| ५. | व्यतिहारलक्षणः बहुव्रीहिः | केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् | केशाकेशि |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| ६. | दिगन्तराललक्षणः बहुव्रीहिः | दक्षिणस्याः पूर्वस्याः दिशोः यदन्तरालम् | दक्षिणपूर्वा |
| ७. | नञर्थ-बहुव्रीहिः | अविद्यमानः पुत्रः यस्य सः | अपुत्रः |
| ८. | प्रादिबहुव्रीहिः | निर्गता कृपा यस्मात् सः | निष्कृपः |
| ९. | उपमानपूर्वपदः बहुव्रीहिः | गजस्य आननमिव आननं यस्य सः | गजाननः |

## अव्ययीभावसमासः

पूर्वपदार्थप्रधानः अव्ययीभावसमासः। अनव्ययम् अव्ययं भवति इति अव्ययीभावः। अव्ययीभावसमासस्य भेदाः प्रायः त्रयस्त्रिंशत् सन्ति। तेषु केचन प्रसिद्धाः भेदाः एव अत्र प्रदर्शिताः।

| क्र.सं. | समासनाम | विग्रहः | समासः (समस्तपदम्) |
|---|---|---|---|
| १. | समीपार्थे अव्ययीभावः | ग्रामस्य समीपे | उपग्रामम् |
| २. | अभावार्थे अव्ययीभावः | मशकानाम् अभावः | निर्मशकम् |
| ३. | योग्यतार्थे अव्ययीभावः | रूपस्य योग्यम् | अनुरूपम् |
| ४. | वीप्सार्थे अव्ययीभावः | दिने दिने | प्रतिदिनम् |
| ५. | पदार्थ-अनतिवृत्त्यर्थे अव्ययीभावः | शक्तिम् अनतिक्रम्य | यथाशक्ति |
| ६. | मर्यादार्थे अव्ययीभावः | आ मुक्तेः | आमुक्ति (संसारः) |
| ७. | अभिविध्यर्थे अव्ययीभावः | आ बालेभ्यः | आबालम् (हरिभक्तिः) |
| ८. | आभिमुख्यार्थे अव्ययीभावः | अग्निम् अभि | अभ्यग्नि |
| ९. | मात्रार्थे अव्ययीभावः | शाकस्य लेशः | शाकप्रति |
| १०. | अवधारणार्थे अव्ययीभावः | यावन्तः श्लोकाः | यावच्छ्लोकम् (अच्युतप्रणामाः) |
| ११. | पारेशब्दयुक्तः अव्ययीभावः | पारे समुद्रस्य | पारेसमुद्रम् |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| १२. | मध्येशब्दयुक्तः अव्ययीभावः | मध्ये गङ्गायाः | मध्येगङ्गम् |
| १३. | सादृश्यार्थे अव्ययीभावः | सख्या सदृशः | ससखि |
| १४. | सम्पत्त्यर्थे अव्ययीभावः | क्षत्राणां सम्पत्तिः | सक्षत्रम् |
| १५. | साकल्यार्थे अव्ययीभावः | तृणमपि अपरित्यज्य | सतृणम् |
| १६. | पश्चादर्थे अव्ययीभावः | रामस्य पश्चात् | अनुरामम् |
| १७. | विभक्त्यर्थे अव्ययीभावः | विद्यालये इति | अधिविद्यालयम् |
| १८. | समृद्ध्यर्थे अव्ययीभावः | धान्यानां समृद्धिः | सुधान्यम् |
| १९. | असम्प्रत्यर्थे अव्ययीभावः | निद्रा सम्प्रति न युज्यते | अतिनिद्रम् |
| २०. | आनुपूर्व्यार्थे अव्ययीभावः | ज्येष्ठस्य आनुपूर्व्येण | अनुज्येष्ठम् |

© NCERT not to be republished

परिशिष्टम् ३

# वाच्यम्

**वाच्यम् (प्रयोगः)**

- कर्तरि प्रयोगः
- कर्मणि प्रयोगः
- भावे प्रयोगः

एतानि कर्तृवाच्यं, कर्मवाच्यं, भाववाच्यं च इत्यपि कथ्यन्ते।

**कर्तृवाच्यम्**

- कर्तरि प्रयोगे कर्तृवाचकं पदं 'प्रथमाविभक्तौ' भवति।
- कर्मवाचकं पदं 'द्वितीयाविभक्तौ' भवति।
- क्रियापदं कर्तृपदानुगुणं भवति।

तन्नाम कर्तृपदं यद्वचनयुक्तं भवति क्रियापदमपि तद्वचनयुक्तमेव भवति। अर्थात् कर्तरि प्रयोगे क्रियापदं कर्तृपदमनुसृत्य एव भवति। कर्मपदेन सह तस्य कोऽपि सम्बन्धः न भवति। कर्तृपदम् एकवचने चेत् क्रियापदमपि एकवचने, कर्तृपदं द्विवचने चेत् क्रियापदमपि द्विवचने, कर्तृपदं बहुवचने चेत् क्रियापदमपि बहुवचने च भवति।



**यथा** — बालः चित्रं पश्यति। बालौ चित्रं पश्यतः। बालाः चित्रं पश्यन्ति।

बालः फलं खादति। बालः फले खादति। बालः फलानि खादति।

अत्र सामान्यतया परिशीलयामः चेत् 'बालः' कर्ता 'फलं' कर्म 'खादति' क्रियापदम् अस्ति।

उपरि विद्यमानेषु वाक्येषु यत्र कर्तुः वचनपरिवर्तनम् अभवत् तत्र क्रियापदस्यापि वचनपरिवर्तनम् अभवत्।

© NCERT not to be republished

कर्मपदस्य वचनपरिवर्तनेन क्रियापदस्य वचनपरिवर्तनं न अभवत्। अतः अत्र कर्ता प्रधानः भवति। क्रियापदं कर्तृपदम् अनुसरति।

- **कर्तरि प्रयोगे पुरुषव्यवस्था — प्रथमपुरुषः मध्यमपुरुषः उत्तमपुरुषः च।**

**मध्यमपुरुषः** — कर्तृपदं यदि 'त्वं/युवां/यूयं भवति तर्हि क्रियापदं सर्वदा मध्यमपुरुषस्य एकवचने/द्विवचने/बहुवचने भवति।

**यथा** — त्वं श्लोकं पठसि। युवां श्लोकं पठथः। यूयं श्लोकं पठथ।

**उत्तमपुरुषः** — कर्तृपदं यदि 'अहम्/आवां/वयं' भवति तर्हि क्रियापदं सर्वदा उत्तमपुरुषस्य एकवचने/द्विवचने/बहुवचने भवति।

**यथा** — अहं श्लोकं पठामि। आवां श्लोकं पठावः। वयं श्लोकं पठामः।

**प्रथमपुरुषः** — कर्तृपदं यदि 'त्वं/युवा/यूयम् अथवा अहम्/आवां/वयम् एतेभ्यः भिन्नं भवति तर्हि क्रियापदं सर्वदा प्रथमपुरुषस्य एकवचने/द्विवचने/बहुवचने भवति।

**यथा** —

| | | |
|---|---|---|
| सः श्लोकं पठति। | तौ श्लोकं पठतः। | ते श्लोकं पठन्ति। |
| सा श्लोकं पठति। | ते श्लोकं पठतः। | ताः श्लोकं पठन्ति। |
| युवकः श्लोकं पठति। | युवकौ श्लोकं पठतः। | युवकाः श्लोकं पठन्ति। |
| बालिका श्लोकं पठति। | बालिके श्लोकं पठतः। | बालिकाः श्लोकं पठन्ति। |

## कर्मवाच्यम् कर्मणि प्रयोगः

- कर्मणि प्रयोगे कर्तृपदं तृतीयाविभक्तौ भवति।
- कर्मपदं प्रथमाविभक्तौ भवति।
- क्रियापदं कर्मपदम् अनुसरति।

तन्नाम कर्मपदम् एकवचने भवति चेत् क्रियापदमपि एकवचने भवति। कर्मपदं द्विवचने चेत् क्रियापदमपि द्विवचने भवति। अत्र कर्तुः सम्बन्धः क्रियापदेन सह न भवति। कर्मपदस्य सम्बन्धः क्रियापदेन सह भवति।

- कर्मणि प्रयोगे धातुभ्यः 'यक्' (य) प्रत्ययः विधीयते। ततः आत्मनेपदप्रत्ययः भवति।



© NCERT not to be republished

**यथा** — गम् + य + ते = गम्यते। पठ् + य + ते = पठ्यते। लिख् + य + ते = लिख्यते।

- कर्मणि प्रयोगे क्रियापदानि आत्मनेपदिरूपाणि भवन्ति। वर्तमानकाले आख्यातप्रत्ययः 'ति' प्रत्ययस्य स्थाने 'ते' प्रत्ययः एव भवति।

| कर्तरि | कर्मणि | | कर्तरि | कर्मणि |
|---|---|---|---|---|
| पठति | पठ्यते | | पिबति | पीयते |
| लिखति | लिख्यते | | ददाति | दीयते |
| खादति | खाद्यते | | नयति | नीयते |
| गच्छति | गम्यते | | करोति | क्रियते |
| त्यजति | त्यज्यते | | शृणोति | श्रूयते |
| पृच्छति | पृच्छयते | | गायति | गीयते |

| कर्तरि | कर्मणि | | कर्तरि | कर्मणि |
|---|---|---|---|---|
| जानाति | ज्ञायते | | आरोहति | आरुह्यते |
| स्मरति | स्मर्यते | | पश्यति | दृश्यते |
| वदति/वक्ति | उद्यते/उच्यते | | परीक्षते | परीक्ष्यते |
| क्षिपति | क्षिप्यते | | सेवते | सेव्यते |
| प्राप्नोति | प्राप्यते | | वन्दते | वन्द्यते |
| प्रणमति | प्रणम्यते | | क्रीडति | क्रीड्यते |

| कर्तरि | कर्मणि | | कर्तरि | कर्मणि |
|---|---|---|---|---|
| प्रक्षालयति | प्रक्षाल्यते | | गणयति | गण्यते |
| चिन्तयति | चिन्त्यते | | रचयति | रच्यते |
| पालयति | पाल्यते | | ताडयति | ताड्यते |
| सूचयति | सूच्यते | | कथयति | कथ्यते |
| पूजयति | पूज्यते | | पाठयति | पाठ्यते |
| बोधयति | बोध्यते | | पूजयति | पूज्यते |

© NCERT not to be republished

**अधः वर्तमानकाले कर्तरि कर्मणि च कतिचन वाक्यानि प्रदत्तानि सन्ति।**

| क्र.सं. | कर्तरि प्रयोगः / कर्तृवाच्यम् | कर्मणि प्रयोगः / कर्मवाच्यम् |
|---|---|---|
| १. | बालकः श्लोकं पठति। | बालकेन श्लोकः पठ्यते। |
| २. | सा कवितां लिखति। | तया कविता लिख्यते। |
| ३. | सुनीता फलानि खादति। | सुनीतया फलानि खाद्यन्ते। |
| ४. | शिक्षकः ग्रन्थालयं गच्छति। | शिक्षकेण ग्रन्थालयः गम्यते। |
| ५. | सः दुर्गुणान् त्यजति। | तेन दुर्गुणाः त्यज्यन्ते। |
| ६. | अहम् इक्षुरसं पिबामि। | मया इक्षुरसः पीयते। |
| ७. | सञ्जयः लेखनीः ददाति। | सञ्जयेन लेखन्यः दीयन्ते। |
| ८. | आरक्षकाः चोरान् नयन्ति। | आरक्षकैः चोराः नीयन्ते। |
| ९. | राधा पूजां करोति। | राधया पूजा क्रियते। |
| १०. | मित्राणि चलच्चित्रं पश्यन्ति। | मित्रैः चलच्चित्रं दृश्यते। |

- कर्तरि प्रयोगस्य कर्मणि प्रयोगस्य पूर्वोक्ताः नियमाः वर्तमानादिषु सर्वेषु कालेषु अन्वयं प्राप्नुवन्ति। क्रियापदानां रूपाणि तत्तत्काले (लकारानुगुणम्) भवन्ति।
- भूतकाले लङ्-लृट्-आदीनां लकाराणां प्रयोगः भवति। तथैव कृदन्तेषु भूतकाले कर्तरि 'क्तवतु'प्रत्ययस्य कर्मणि 'क्त'प्रत्ययान्तस्य च प्रयोगः भवति।
- विशेषतः भूतकाले कर्मणि क्त-प्रत्ययस्य प्रयोगे कर्मपदस्य लिङ्गं वचनं च स्पष्टं जानीयात्। यतः कर्मपदं यस्मिन् लिङ्गे, यस्मिन् वचने च भवति तस्मिन्नेव लिङ्गे, तस्मिन्नेव वचने च क्रियापदं भवति।

**भूतकाले कर्तरि 'क्तवतु' प्रत्ययस्य कर्मणि 'क्त' प्रत्ययस्य च प्रयोगाः**

| क्र.सं. | कर्तरि प्रयोगः / कर्तृवाच्यम् | कर्मणि प्रयोगः / कर्मवाच्यम् |
|---|---|---|
| १. | बालकः श्लोकं पठितवान्। | बालकेन श्लोकः पठितः। |
| २. | सा कवितां लिखितवती। | तया कविता लिखिता। |
| ३. | सुनीता फलानि खादितवती। | सुनीतया फलानि खादितानि। |
| ४. | शिक्षकः ग्रन्थालयं गतवान्। | शिक्षकेण ग्रन्थालयः गतः। |

© NCERT not to be republished

| | | |
|---|---|---|
| ५. | सः दुर्गुणान् त्यक्तवान् । | तेन दुर्गुणाः त्यक्ताः । |
| ६. | अहम् इक्षुरसं पीतवान् / पीतवती । | मया इक्षुरसः पीतः । |
| ७. | सञ्जयः लेखनीः दत्तवान् । | सञ्जयेन लेखन्यः दत्ताः । |
| ८. | आरक्षकाः चोरान् नीतवन्तः । | आरक्षकैः चोराः नीताः । |
| ९. | राधा पूजां कृतवती । | राधया पूजा कृता । |
| १०. | मित्राणि चलच्चित्रं दृष्टवन्तः । | मित्रैः चलच्चित्रं दृष्टम् । |

- विधिलिङ्-लकारस्य कर्तरि कर्मणि च प्रयोगाः भवन्ति । विधिलिङ्-लकारस्य अर्थेषु एव कृदन्तेषु कर्मणि 'तव्यत्' 'अनीयर्' इत्येतयोः प्रयोगः भवति । अत्रापि 'तव्यत्' 'अनीयर्' प्रत्ययौ कर्मपदस्य लिङ्गं वचनं च अनुसृत्य भवतः ।

**'तव्यत्' 'अनीयर्' इत्यनयोः प्रयोगः**

| क्र.सं. | कर्तरि प्रयोगः / कर्तृवाच्यम् | कर्मणि प्रयोगः /कर्मवाच्यम् |
|---|---|---|
| १. | महेशः आपणं गच्छेत् । | महेशेन आपणः गन्तव्यः / गमनीयः |
| २. | ताः मधुरं खादेयुः । | ताभिः मधुरं खादितव्यम् / खादनीयम् |
| ३. | बालिका वृक्षान् पश्येत् । | बालिकया वृक्षाः द्रष्टव्याः / दर्शनीयाः |
| ४. | छात्राः स्वाध्यायं कुर्युः । | छात्रैः स्वाध्यायः कर्तव्यः / करणीयः |
| ५. | सः *भगवद्गीतां* पठेत् । | तेन *भगवद्गीता* पठितव्या / पठनीया |

## भावे प्रयोगः / भाववाच्यम्



भावप्रधानः प्रयोगः भावे प्रयोगः । ये अकर्मकधातवः सन्ति तेषां कर्तरि प्रयोगाः भावे प्रयोगाश्च भवन्ति । अकर्मकधातवः नाम येषां धातूनां प्रयोगे कर्मपदस्य प्रसक्तिः न भवति ते धातवः अकर्मकधातवः भवन्ति । अत एव अकर्मकधातूनां प्रयोगे कर्मपदस्य अभावात् कर्तरि प्रयोगः भावे प्रयोगश्च भवतः । कर्मणि प्रयोगः तु न भवति ।

- भावे प्रयोगे क्रियापदानां रूपाणि कर्मणि प्रयोगरूपवत् भवन्ति ।

© NCERT not to be republished

- हस् + यक् + ते = हस्यते ।
- भावे प्रयोगे क्रियापदं सर्वदा प्रथमपुरुषस्य एकवचने एव भवति ।
- कृदन्तेषु यदा भावे प्रयोगः क्रियते तदा क्त-तव्यत्-अनीयर्-प्रत्ययान्तानि रूपाणि सर्वदा नपुंसकलिङ्गे प्रथमाविभक्तेः एकवचने एव भवन्ति ।

## लट्-लकारे (वर्तमानकाले) भावे प्रयोगः

| क्र.सं. | कर्तरि प्रयोगः / कर्तृवाच्यम् | भावे प्रयोगः / भाववाच्यम् |
|---|---|---|
| १. | ते हसन्ति । | तैः हस्यते । |
| २. | बालाः उद्याने क्रीडन्ति । | बालैः उद्याने क्रिड्यते । |
| ३. | फलानि भूमौ पतन्ति । | फलैः भूमौ पत्यते । |
| ४. | वाहनानि मार्गे तिष्ठन्ति । | वाहनैः मार्गे स्थीयते । |
| ५. | सा उत्तिष्ठति । | तया उत्थीयते । |
| ६. | वृद्धः आसने उपविशति । | वृद्धेन आसने उपविश्यते । |
| ७. | नर्तकाः नृत्यन्ति । | नर्तकैः नृत्यते । |
| ८. | बालिकाः प्रयतन्ते । | बालिकाभिः प्रयत्यते । |
| ९. | शुनकः धावति । | शुनकेन धाव्यते । |
| १०. | वृक्षः वर्धते । | वृक्षेण वृध्यते । |
| ११. | शिशुः शेते । | शिशुना शय्यते । |
| १२. | रुग्णः कासते । | रुग्णेन कास्यते । |

**अध्ययनाय अकर्मकधातूनां कानिचन क्रियापदानि अत्र प्रदत्तानि सन्ति ।**

| | | | | |
|---|---|---|---|---|
| क्रीडति | भषति | स्फुरति | रोदिति | भवति |
| शोभते | मोदते | वर्तते | कम्पते | स्पर्धते |

| | | | | |
|---|---|---|---|---|
| विकसति | उपविशति | विश्वसिति | नश्यति | गर्जति |
| लज्जते | प्लवते | स्पन्दते | वर्धते | त्वरते |

© NCERT not to be republished

## भूतकाले कर्तरि क्तवतुप्रत्ययान्ताः प्रयोगाः, भावे क्तप्रत्ययान्ताः प्रयोगाश्च

| क्र.सं. | कर्तरि प्रयोगः / कर्तृवाच्यम् | भावे प्रयोगः / भाववाच्यम् |
|---|---|---|
| १. | ते हसितवन्तः। | तैः हसितम्। |
| २. | बालाः उद्याने क्रीडितवन्तः। | बालैः उद्याने क्रीडितम्। |
| ३. | फलानि भूमौ पतितवन्ति। | फलैः भूमौ पतितम्। |
| ४. | वाहनानि मार्गे स्थितवन्ति। | वाहनैः मार्गे स्थितम्। |
| ५. | सा उत्थितवती। | तया उत्थितम्। |
| ६. | शिशुः शयितवान्। | शिशुना शयितम्। |

## कर्तरि विधिलिङ्-लकारस्य भावे 'तव्यत्-अनीयर्' प्रत्ययान्तयोः च प्रयोगाः

| क्र.सं. | कर्तरि प्रयोगः / कर्तृवाच्यम् | भावे प्रयोगः / भाववाच्यम् |
|---|---|---|
| १. | नर्तकाः नृत्येयुः। | नर्तकैः नर्तितव्यम् / नर्तनीयम् |
| २. | बालिकाः प्रयतेयुः। | बालिकाभिः प्रयतितव्यम् / प्रयतनीयम्। |
| ३. | शुनकः धावेत्। | शुनकेन धावितव्यम् / धावनीयम्। |
| ४. | वृक्षः वर्धेत। | वृक्षेण वर्धितव्यम् / वर्धनीयम्। |
| ५. | वृद्धः आसने उपविशेत्। | वृद्धेन आसने उपवेष्टव्यम् / उपवेशनीयम्। |
| ६. | रुग्णः कासेत। | रुग्णेन कासितव्यम् / कासनीयम्। |

(अस्मिन् परिशिष्टत्रये श्लोकानाम् अन्वयक्रमाः समासाः प्रयोगाश्च इत्येते विचाराः सामान्यतया प्रदर्शिताः सन्ति। छात्राः विस्तृताध्ययनार्थम् अन्यान् ग्रन्थान् परिशीलयेयुः।)

© NCERT not to be republished

परिशिष्टम् ४

# शब्दरूपाणि

## पुंलिङ्गशब्दाः

| 'न्' कारान्तः पुंलिङ्गः 'ब्रह्मन्' शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | ब्रह्मा | ब्रह्माणौ | ब्रह्माणः |
| द्वितीया | ब्रह्माणम् | ब्रह्माणौ | ब्रह्मणः |
| तृतीया | ब्रह्मणा | ब्रह्मभ्याम् | ब्रह्मभिः |
| चतुर्थी | ब्रह्मणे | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| पञ्चमी | ब्रह्मणः | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| षष्ठी | ब्रह्मणः | ब्रह्मणोः | ब्रह्मणाम् |
| सप्तमी | ब्रह्मणि | ब्रह्मणोः | ब्रह्मसु |
| सम्बोधनम् | हे ब्रह्मन् | हे ब्रह्माणौ | हे ब्रह्माणः |

| 'न्' कारान्तः पुंलिङ्गः 'गुणिन्' शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | गुणी | गुणिनौ | गुणिनः |
| द्वितीया | गुणिनम् | गुणिनौ | गुणिनः |
| तृतीया | गुणिना | गुणिभ्याम् | गुणिभिः |
| चतुर्थी | गुणिने | गुणिभ्याम् | गुणिभ्यः |
| पञ्चमी | गुणिनः | गुणिभ्याम् | गुणिभ्यः |
| षष्ठी | गुणिनः | गुणिनोः | गुणिनाम् |
| सप्तमी | गुणिनि | गुणिनोः | गुणिषु |
| सम्बोधनम् | हे गुणिन् | हे गुणिनौ | हे गुणिनः |

© NCERT not to be republished

| ‘न्’ कारान्तः पुंलिङ्गः ‘पथिन्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | पन्थाः | पन्थानौ | पन्थानः |
| **द्वितीया** | पन्थानम् | पन्थानौ | पथः |
| **तृतीया** | पथा | पथिभ्याम् | पथिभिः |
| **चतुर्थी** | पथे | पथिभ्याम् | पथिभ्यः |
| **पञ्चमी** | पथः | पथिभ्याम् | पथिभ्यः |
| **षष्ठी** | पथः | पथोः | पथाम् |
| **सप्तमी** | पथि | पथोः | पथिषु |
| **सम्बोधनम्** | हे पन्थाः | हे पन्थानौ | हे पन्थानः |

| ‘स्’ कारान्तः पुंलिङ्गः ‘विद्वस्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | विद्वान् | विद्वांसौ | विद्वांसः |
| **द्वितीया** | विद्वांसम् | विद्वांसौ | विदुषः |
| **तृतीया** | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| **चतुर्थी** | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| **पञ्चमी** | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| **षष्ठी** | विदुषः | विदुषोः | विदुषाम् |
| **सप्तमी** | विदुषि | विदुषोः | विद्वत्सु |
| **सम्बोधनम्** | हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |

© NCERT not to be republished

| ‘स्’ कारान्तः पुंलिङ्गः ‘चन्द्रमस्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | चन्द्रमाः | चन्द्रमसौ | चन्द्रमसः |
| **द्वितीया** | चन्द्रमसम् | चन्द्रमसौ | चन्द्रमसः |
| **तृतीया** | चन्द्रमसा | चन्द्रमोभ्याम् | चन्द्रमोभिः |
| **चतुर्थी** | चन्द्रमसे | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| **पञ्चमी** | चन्द्रमसः | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| **षष्ठी** | चन्द्रमसः | चन्द्रमसोः | चन्द्रमसाम् |
| **सप्तमी** | चन्द्रमसि | चन्द्रमसोः | चन्द्रमस्सु |
| **सम्बोधनम्** | हे चन्द्रमः | हे चन्द्रमसौ | हे चन्द्रमसः |

| ‘स्’ कारान्तः पुंलिङ्गः ‘पुंस्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | पुमान् | पुमांसौ | पुमांसः |
| **द्वितीया** | पुमांसम् | पुमांसौ | पुंसः |
| **तृतीया** | पुंसा | पुंभ्याम्, पुम्भ्याम् | पुंभिः, पुम्भिः |
| **चतुर्थी** | पुंसे | पुंभ्याम्, पुम्भ्याम् | पुंभ्यः, पुम्भ्यः |
| **पञ्चमी** | पुंसः | पुंभ्याम्, पुम्भ्याम् | पुंभ्यः, पुम्भ्यः |
| **षष्ठी** | पुंसः | पुंसोः | पुंसाम् |
| **सप्तमी** | पुंसि | पुंसोः | पुंसु |
| **सम्बोधनम्** | हे पुमन् | हे पुमांसौ | हे पुमांसः |

© NCERT not to be republished

| ‘स्’ कारान्तः पुंलिङ्गः ‘वेधस्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | वेधाः | वेधसौ | वेधसः |
| **द्वितीया** | वेधसम् | वेधसौ | वेधसः |
| **तृतीया** | वेधसा | वेधोभ्याम् | वेधोभिः |
| **चतुर्थी** | वेधसे | वेधोभ्याम् | वेधोभ्यः |
| **पञ्चमी** | वेधसः | वेधोभ्याम् | वेधोभ्यः |
| **षष्ठी** | वेधसः | वेधसोः | वेधसाम् |
| **सप्तमी** | वेधसि | वेधसोः | वेधःसु, वेधस्सु |
| **सम्बोधनम्** | हे वेधः | हे वेधसौ | हे वेधसः |

| ‘द्’ कारान्तः पुंलिङ्गः ‘सुहृद्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | सुहृद्, सुहृत् | सुहृदौ | सुहृदः |
| **द्वितीया** | सुहृदम् | सुहृदौ | सुहृदः |
| **तृतीया** | सुहृदा | सुहृद्भ्याम् | सुहृद्भिः |
| **चतुर्थी** | सुहृदे | सुहृद्भ्याम् | सुहृद्भ्यः |
| **पञ्चमी** | सुहृदः | सुहृद्भ्याम् | सुहृद्भ्यः |
| **षष्ठी** | सुहृदः | सुहृदोः | सुहृदाम् |
| **सप्तमी** | सुहृदि | सुहृदोः | सुहृत्सु |
| **सम्बोधनम्** | हे सुहृद्, हे सुहृत् | हे सुहृदौ | हे सुहृदः |

© NCERT not to be republished

| 'ज्' कारान्तः पुंलिङ्गः 'वणिज्' शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | वणिग्, वणिक् | वणिजौ | वणिजः |
| **द्वितीया** | वणिजम् | वणिजौ | वणिजः |
| **तृतीया** | वणिजा | वणिग्भ्याम् | वणिग्भिः |
| **चतुर्थी** | वणिजे | वणिग्भ्याम् | वणिग्भ्यः |
| **पञ्चमी** | वणिजः | वणिग्भ्याम् | वणिग्भ्यः |
| **षष्ठी** | वणिजः | वणिजोः | वणिजाम् |
| **सप्तमी** | वणिजि | वणिजोः | वणिक्षु |
| **सम्बोधनम्** | हे वणिग्, हे वणिक् | हे वणिजौ | हे वणिजः |

| 'ज्' कारान्तः पुंलिङ्गः 'भिषज्' शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | भिषग्, भिषक् | भिषजौ | भिषजः |
| **द्वितीया** | भिषजम् | भिषजौ | भिषजः |
| **तृतीया** | भिषजा | भिषग्भ्याम् | भिषग्भिः |
| **चतुर्थी** | भिषजे | भिषग्भ्याम् | भिषग्भ्यः |
| **पञ्चमी** | भिषजः | भिषग्भ्याम् | भिषग्भ्यः |
| **षष्ठी** | भिषजः | भिषजोः | भिषजाम् |
| **सप्तमी** | भिषजि | भिषजोः | भिषक्षु |
| **सम्बोधनम्** | हे भिषग्, हे भिषक् | हे भिषजौ | हे भिषजः |

© NCERT not to be republished

## स्त्रीलिङ्गरूपाणि

| 'च्' कारान्तः स्त्रीलिङ्गः 'वाच्' शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | वाग्, वाक् | वाचौ | वाचः |
| द्वितीया | वाचम् | वाचौ | वाचः |
| तृतीया | वाचा | वाग्भ्याम् | वाग्भिः |
| चतुर्थी | वाचे | वाग्भ्याम् | वाग्भ्यः |
| पञ्चमी | वाचः | वाग्भ्याम् | वाग्भ्यः |
| षष्ठी | वाचः | वाचोः | वाचाम् |
| सप्तमी | वाचि | वाचोः | वाक्षु |
| सम्बोधनम् | हे वाग्, हे वाक् | हे वाचौ | हे वाचः |

| 'च्' कारान्तः स्त्रीलिङ्गः 'त्वच्' शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | त्वग्, त्वक् | त्वचौ | त्वचः |
| द्वितीया | त्वचम् | त्वचौ | त्वचः |
| तृतीया | त्वचा | त्वग्भ्याम् | त्वग्भिः |
| चतुर्थी | त्वचे | त्वग्भ्याम् | त्वग्भ्यः |
| पञ्चमी | त्वचः | त्वग्भ्याम् | त्वग्भ्यः |
| षष्ठी | त्वचः | त्वचोः | त्वचाम् |
| सप्तमी | त्वचि | त्वचोः | त्वक्षु |
| सम्बोधनम् | हे त्वग्, हे त्वक् | हे त्वचौ | हे त्वचः |

© NCERT not to be republished

| ‘ज्’ कारान्तः स्त्रीलिङ्गः ‘स्रज्’ शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | स्रग्, स्रक् | स्रजौ | स्रजः |
| द्वितीया | स्रजम् | स्रजौ | स्रजः |
| तृतीया | स्रजा | स्रग्भ्याम् | स्रग्भिः |
| चतुर्थी | स्रजे | स्रग्भ्याम् | स्रग्भ्यः |
| पञ्चमी | स्रजः | स्रग्भ्याम् | स्रग्भ्यः |
| षष्ठी | स्रजः | स्रजोः | स्रजाम् |
| सप्तमी | स्रजि | स्रजोः | स्रक्षु |
| सम्बोधनम् | हे स्रग्, हे स्रक् | हे स्रजौ | हे स्रजः |

| ‘ज्’ कारान्तः स्त्रीलिङ्गः ‘रुज्’ शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | रुग्, रुक् | रुजौ | रुजः |
| द्वितीया | रुजम् | रुजौ | रुजः |
| तृतीया | रुजा | रुग्भ्याम् | रुग्भिः |
| चतुर्थी | रुजे | रुग्भ्याम् | रुग्भ्यः |
| पञ्चमी | रुजः | रुग्भ्याम् | रुग्भ्यः |
| षष्ठी | रुजः | रुजोः | रुजाम् |
| सप्तमी | रुजि | रुजोः | रुक्षु |
| सम्बोधनम् | हे रुग्, हे रुक् | हे रुजौ | हे रुजः |

© NCERT not to be republished

| ‘त्’ कारान्तः स्त्रीलिङ्गः ‘सरित्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | सरिद्, सरित् | सरितौ | सरितः |
| **द्वितीया** | सरितम् | सरितौ | सरितः |
| **तृतीया** | सरिता | सरिद्भ्याम् | सरिद्भिः |
| **चतुर्थी** | सरिते | सरिद्भ्याम् | सरिद्भ्यः |
| **पञ्चमी** | सरितः | सरिद्भ्याम् | सरिद्भ्यः |
| **षष्ठी** | सरितः | सरितोः | सरिताम् |
| **सप्तमी** | सरिति | सरितोः | सरित्सु |
| **सम्बोधनम्** | हे सरिद्, हे सरित् | हे सरितौ | हे सरितः |

| ‘त्’ कारान्तः स्त्रीलिङ्गः ‘विद्युत्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | विद्युद्, विद्युत् | विद्युतौ | विद्युतः |
| **द्वितीया** | विद्युतम् | विद्युतौ | विद्युतः |
| **तृतीया** | विद्युता | विद्युद्भ्याम् | विद्युद्भिः |
| **चतुर्थी** | विद्युते | विद्युद्भ्याम् | विद्युद्भ्यः |
| **पञ्चमी** | विद्युतः | विद्युद्भ्याम् | विद्युद्भ्यः |
| **षष्ठी** | विद्युतः | विद्युतोः | विद्युताम् |
| **सप्तमी** | विद्युति | विद्युतोः | विद्युत्सु |
| **सम्बोधनम्** | हे विद्युद्, हे विद्युत् | हे विद्युतौ | हे विद्युतः |

© NCERT not to be republished

| ‘व्’ कारान्तः स्त्रीलिङ्गः ‘दिव्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | द्यौः | दिवौ | दिवः |
| **द्वितीया** | दिवम् | दिवौ | दिवः |
| **तृतीया** | दिवा | द्युभ्याम् | द्युभिः |
| **चतुर्थी** | दिवे | द्युभ्याम् | द्युभ्यः |
| **पञ्चमी** | दिवः | द्युभ्याम् | द्युभ्यः |
| **षष्ठी** | दिवः | दिवोः | दिवाम् |
| **सप्तमी** | दिवि | दिवोः | द्युषु |
| **सम्बोधनम्** | हे द्यौः | हे दिवौ | हे दिवः |

| ‘श्’ कारान्तः स्त्रीलिङ्गः ‘दिश्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | दिग्, दिक् | दिशौ | दिशः |
| **द्वितीया** | दिशम् | दिशौ | दिशः |
| **तृतीया** | दिशा | दिग्भ्याम् | दिग्भिः |
| **चतुर्थी** | दिशे | दिग्भ्याम् | दिग्भ्यः |
| **पञ्चमी** | दिशः | दिग्भ्याम् | दिग्भ्यः |
| **षष्ठी** | दिशः | दिशोः | दिशाम् |
| **सप्तमी** | दिशि | दिशोः | दिक्षु |
| **सम्बोधनम्** | हे दिग्, हे दिक् | हे दिशौ | हे दिशः |

© NCERT not to be republished

## नपुंसकलिङ्गरूपाणि

| 'त्' कारान्तः नपुंसकलिङ्ग 'जगत्' शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | जगद्, जगत् | जगती | जगन्ति |
| **द्वितीया** | जगद्, जगत् | जगती | जगन्ति |
| **तृतीया** | जगता | जगद्भ्याम् | जगद्भिः |
| **चतुर्थी** | जगते | जगद्भ्याम् | जगद्भ्यः |
| **पञ्चमी** | जगतः | जगद्भ्याम् | जगद्भ्यः |
| **षष्ठी** | जगतः | जगतोः | जगताम् |
| **सप्तमी** | जगति | जगतोः | जगत्सु |
| **सम्बोधनम्** | हे जगद्, हे जगत् | हे जगती | हे जगन्ति |

| 'न्' कारान्तः नपुंसकलिङ्ग 'नामन्' शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | नाम | नाम्नी, नामनी | नामानि |
| **द्वितीया** | नाम | नाम्नी, नामनी | नामानि |
| **तृतीया** | नाम्ना | नामभ्याम् | नामभिः |
| **चतुर्थी** | नाम्ने | नामभ्याम् | नामभ्यः |
| **पञ्चमी** | नाम्नः | नामभ्याम् | नामभ्यः |
| **षष्ठी** | नाम्नः | नाम्नोः | नाम्नाम् |
| **सप्तमी** | नाम्नि, नामनि | नाम्नोः | नामसु |
| **सम्बोधनम्** | हे नामन्, हे नाम | हे नाम्नी, हे नामनी | हे नामानि |

© NCERT not to be republished

| ‘न्’ कारान्तः नपुंसकलिङ्ग ‘कर्मन्’ शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | कर्म | कर्मणी | कर्माणि |
| द्वितीया | कर्म | कर्मणी | कर्माणि |
| तृतीया | कर्मणा | कर्मभ्याम् | कर्मभिः |
| चतुर्थी | कर्मणे | कर्मभ्याम् | कर्मभ्यः |
| पञ्चमी | कर्मणः | कर्मभ्याम् | कर्मभ्यः |
| षष्ठी | कर्मणः | कर्मणोः | कर्मणाम् |
| सप्तमी | कर्मणि | कर्मणोः | कर्मसु |
| सम्बोधनम् | हे कर्मन्, हे कर्म | हे कर्मणी | हे कर्माणि |

| ‘न्’ कारान्तः नपुंसकलिङ्ग ‘चर्मन्’ शब्दः | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | चर्म | चर्मणी | चर्माणि |
| द्वितीया | चर्म | चर्मणी | चर्माणि |
| तृतीया | चर्मणा | चर्मभ्याम् | चर्मभिः |
| चतुर्थी | चर्मणे | चर्मभ्याम् | चर्मभ्यः |
| पञ्चमी | चर्मणः | चर्मभ्याम् | चर्मभ्यः |
| षष्ठी | चर्मणः | चर्मणोः | चर्मणाम् |
| सप्तमी | चर्मणि | चर्मणोः | चर्मसु |
| सम्बोधनम् | हे चर्मन्, हे चर्म | हे चर्मणी | हे चर्माणि |

© NCERT not to be republished

| ‘स्’ कारान्तः नपुंसकलिङ्ग ‘मनस्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | मनः | मनसी | मनांसि |
| **द्वितीया** | मनः | मनसी | मनांसि |
| **तृतीया** | मनसा | मनोभ्याम् | मनोभिः |
| **चतुर्थी** | मनसे | मनोभ्याम् | मनोभ्यः |
| **पञ्चमी** | मनसः | मनोभ्याम् | मनोभ्यः |
| **षष्ठी** | मनसः | मनसोः | मनसाम् |
| **सप्तमी** | मनसि | मनसोः | मनःसु, मनस्सु |
| **सम्बोधनम्** | हे मनः | हे मनसी | हे मनांसि |

| ‘स्’ कारान्तः नपुंसकलिङ्ग ‘तपस्’ शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | तपः | तपसी | तपांसि |
| **द्वितीया** | तपः | तपसी | तपांसि |
| **तृतीया** | तपसा | तपोभ्याम् | तपोभिः |
| **चतुर्थी** | तपसे | तपोभ्याम् | तपोभ्यः |
| **पञ्चमी** | तपसः | तपोभ्याम् | तपोभ्यः |
| **षष्ठी** | तपसः | तपसोः | तपसाम् |
| **सप्तमी** | तपसि | तपसोः | तपःसु, तपस्सु |
| **सम्बोधनम्** | हे तपः | हे तपसी | हे तपांसि |

© NCERT not to be republished

| 'स्' कारान्तः नपुंसकलिङ्ग 'पयस्' शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | पयः | पयसी | पयांसि |
| **द्वितीया** | पयः | पयसी | पयांसि |
| **तृतीया** | पयसा | पयोभ्याम् | पयोभिः |
| **चतुर्थी** | पयसे | पयोभ्याम् | पयोभ्यः |
| **पञ्चमी** | पयसः | पयोभ्याम् | पयोभ्यः |
| **षष्ठी** | पयसः | पयसोः | पयसाम् |
| **सप्तमी** | पयसि | पयसोः | पयःसु, पयस्सु |
| **सम्बोधनम्** | हे पयः | हे पयसी | हे पयांसि |

| 'स्' कारान्तः नपुंसकलिङ्ग 'शिरस्' शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | शिरः | शिरसी | शिरांसि |
| **द्वितीया** | शिरः | शिरसी | शिरांसि |
| **तृतीया** | शिरसा | शिरोभ्याम् | शिरोभिः |
| **चतुर्थी** | शिरसे | शिरोभ्याम् | शिरोभ्यः |
| **पञ्चमी** | शिरसः | शिरोभ्याम् | शिरोभ्यः |
| **षष्ठी** | शिरसः | शिरसोः | शिरसाम् |
| **सप्तमी** | शिरसि | शिरसोः | शिरःसु, शिरस्सु |
| **सम्बोधनम्** | हे शिरः | हे शिरसी | हे शिरांसि |

© NCERT not to be republished

| 'स्' कारान्तः नपुंसकलिङ्ग 'छन्दस्' शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | छन्दः | छन्दसी | छन्दांसि |
| **द्वितीया** | छन्दः | छन्दसी | छन्दांसि |
| **तृतीया** | छन्दसा | छन्दोभ्याम् | छन्दोभिः |
| **चतुर्थी** | छन्दसे | छन्दोभ्याम् | छन्दोभ्यः |
| **पञ्चमी** | छन्दसः | छन्दोभ्याम् | छन्दोभ्यः |
| **षष्ठी** | छन्दसः | छन्दसोः | छन्दसाम् |
| **सप्तमी** | छन्दसि | छन्दसोः | छन्दःसु, छन्दस्सु |
| **सम्बोधनम्** | हे छन्दः | हे छन्दसी | हे छन्दांसि |

| 'ष्' कारान्तः नपुंसकलिङ्ग 'चक्षुष्' शब्दः | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | चक्षुः | चक्षुषी | चक्षूंषि |
| **द्वितीया** | चक्षुः | चक्षुषी | चक्षूंषि |
| **तृतीया** | चक्षुषा | चक्षुर्भ्याम् | चक्षुर्भिः |
| **चतुर्थी** | चक्षुषे | चक्षुर्भ्याम् | चक्षुर्भ्यः |
| **पञ्चमी** | चक्षुषः | चक्षुर्भ्याम् | चक्षुर्भ्यः |
| **षष्ठी** | चक्षुषः | चक्षुषोः | चक्षुषाम् |
| **सप्तमी** | चक्षुषि | चक्षुषोः | चक्षुःषु, चक्षुष्षु |
| **सम्बोधनम्** | हे चक्षुः | हे चक्षुषी | हे चक्षूंषि |

© NCERT not to be republished

| सुप्-प्रत्ययाः (पुंलिङ्गे स्त्रीलिङ्गे नपुंसकलिङ्गे च) | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमा** | सु | औ | जस् |
| **द्वितीया** | अम् | औट् | शस् |
| **तृतीया** | टा | भ्याम् | भिस् |
| **चतुर्थी** | ङे | भ्याम् | भ्यस् |
| **पञ्चमी** | ङसि | भ्याम् | भ्यस् |
| **षष्ठी** | ङस् | ओस् | आम् |
| **सप्तमी** | ङि | ओस् | सुप् |

© NCERT not to be republished

परिशिष्टम् ५

# धातुरूपाणि

0902CH16

## परस्मैपदिधातूनां लट्-लकारः णिच्-प्रत्ययान्तानां प्रयोगः (प्रेरणार्थे)

| ‘पठ्’- धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |
| ‘पठ्’ + णिच् = पठि | | | |
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पाठयति | पाठयतः | पाठयन्ति |
| मध्यमपुरुषः | पाठयसि | पाठयथः | पाठयथ |
| उत्तमपुरुषः | पाठयामि | पाठयावः | पाठयामः |

एवमेव लेखयति, खादयति, हासयति, चालयति, स्मृ (स्मारयति), पा (पाययति), क्रीडयति, नी (नाययति), दर्शयति, गमयति, भोजयति, दापयति, श्रावयति, ज्ञापयति, गणयति, चेत्यादयः।

## परस्मैपदिधातूनां पञ्चसु लकारेषु प्रयोगाः

| ‘पठ्’- धातुः, लट्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

© NCERT not to be republished

| 'पठ्'- धातुः, लृट्लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

| 'पठ्'- धातुः, लङ्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

| 'पठ्'- धातुः, लोट्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पठतु / पठतात् | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ/ पठतात् | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |

| 'पठ्'- धातुः, विधिलिङ्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पठेत् | पठेताम् | पठेयुः |
| मध्यमपुरुषः | पठेः | पठेतम् | पठेत |
| उत्तमपुरुषः | पठेयम् | पठेव | पठेम |

© NCERT not to be republished

## आत्मनेपदीनां धातूनां पञ्चसु लकारेषु प्रयोगाः

| 'वृधु'- धातुः, लट्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | वर्धते | वर्धेते | वर्धन्ते |
| मध्यमपुरुषः | वर्धसे | वर्धेथे | वर्धध्वे |
| उत्तमपुरुषः | वर्धे | वर्धावहे | वर्धामहे |

| 'लभ्'- धातुः, लट्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | लभते | लभेते | लभन्ते |
| मध्यमपुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमपुरुषः | लभे | लभावहे | लभामहे |

| 'वृध्'- धातोः रूपाणां वाक्यषु प्रयोगः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | वृक्षः वर्धते। | वृक्षौ वर्धेते। | वृक्षाः वर्धन्ते। |
| मध्यमपुरुषः | त्वं वर्धसे। | युवां वर्धेथे। | यूयं वर्धध्वे। |
| उत्तमपुरुषः | अहं वर्धे। | आवां वर्धावहे। | वयं वर्धामहे। |

एवमेव भाषते, वर्तते, कम्पते, स्पर्धते, लभते, सेवते, स्पन्दते, यतते, रोचते, एधते, मोदते, वन्दते, रमते, शोभते, सहते, ईक्षते, शिक्षते चेत्यादयः।

| 'वृधु'- धातुः, लृट्लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | वर्धिष्यते | वर्धिष्येते | वर्धिष्यन्ते |
| मध्यमपुरुषः | वर्धिष्यसे | वर्धिष्येथे | वर्धिष्यध्वे |
| उत्तमपुरुषः | वर्धिष्ये | वर्धिष्यावहे | वर्धिष्यामहे |

© NCERT not to be republished

| 'लभ्'- धातुः, लृट्लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| मध्यमपुरुषः | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| उत्तमपुरुषः | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

एवमेव भाषिष्यते, वर्तिष्यते, कम्पिष्यते, स्पर्धिष्यते, सेविष्यते, स्पन्दिष्यते, यतिष्यते, रोचिष्यते, एधिष्यते, मोदिष्यते, वन्दिष्यते, शोभिष्यते, सहिष्यते, ईक्षिष्यते, रंस्यते, शिक्षिष्यते चेत्यादयः।

| 'वृधु'- धातुः, लङ्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अवर्धत | अवर्धेताम् | अवर्धन्त |
| मध्यमपुरुषः | अवर्धथाः | अवर्धेथाम् | अवर्धध्वम् |
| उत्तमपुरुषः | अवर्धे | अवर्धावहि | अवर्धामहि |

| 'लभ्'- धातुः, लङ्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अलभत | अलभेताम् | अलभन्त |
| मध्यमपुरुषः | अलभथाः | अलभेथाम् | अलभध्वम् |
| उत्तमपुरुषः | अलभे | अलभावहि | अलभामहि |

एवमेव अभाषत, अवर्तत, अकम्पत, अस्पर्धत, असेवत, अस्पन्दत, अयतत, अरोचत, ऐधत, अमोदत, अवन्दत, अरमत, अशोभत, असहत, ऐक्षत, अशिक्षत चेत्यादयः।

© NCERT not to be republished

| ‘वृधु’- धातुः, लोट्-लकारः | | | |
|---|---|---|---|
| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | वर्धताम् | वर्धेताम् | वर्धन्ताम् |
| **मध्यमपुरुषः** | वर्धस्व | वर्धेथाम् | वर्धध्वम् |
| **उत्तमपुरुषः** | वर्धै | वर्धावहै | वर्धामहै |

| ‘लभ्’- धातुः, लोट्-लकारः | | | |
|---|---|---|---|
| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | लभताम् | लभेताम् | लभन्ताम् |
| **मध्यमपुरुषः** | लभस्व | लभेथाम् | लभध्वम् |
| **उत्तमपुरुषः** | लभै | लभावहै | लभामहै |

एवमेव भाषताम्, वर्तताम्, कम्पताम्, स्पर्धताम्, सेवताम्, स्पन्दताम्, यतताम्, रोचताम्, एधताम्, मोदताम्, वन्दताम्, रमताम्, शोभताम्, सहताम्, ईक्षताम्, शिक्षताम् इत्यादयः च।

| ‘वृधु’- धातुः, विधिलिङ्-लकारः | | | |
|---|---|---|---|
| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | वर्धेत | वर्धेयाताम् | वर्धेरन् |
| **मध्यमपुरुषः** | वर्धेथाः | वर्धेयाथाम् | वर्धेध्वम् |
| **उत्तमपुरुषः** | वर्धेय | वर्धेवहि | वर्धेमहि |

| ‘लभ्’- धातुः, विधिलिङ्-लकारः | | | |
|---|---|---|---|
| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | लभेत | लभेयाताम् | लभेरन् |
| **मध्यमपुरुषः** | लभेथाः | लभेयाथाम् | लभेध्वम् |
| **उत्तमपुरुषः** | लभेय | लभेवहि | लभेमहि |

एवमेव भाषेत, वर्तेत, कम्पेत, स्पर्धेत, सेवेत, स्पन्देत, यतेत, रोचेत, एधेत, मोदेत, वन्देत, रमेत, शोभेत, सहेत, ईक्षेत, शिक्षेत चेत्यादयः।

© NCERT not to be republished

## विशिष्टधातवः (आत्मनेपदिनः)

| 'शीङ्'- धातुः, लट् - लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | शेते | शयाते | शेरते |
| मध्यमपुरुषः | शेषे | शयाथे | शेध्वे |
| उत्तमपुरुषः | शये | शेवहे | शेमहे |

| 'शीङ्'- धातुः, लृट् - लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | शयिष्यते | शयिष्येते | शयिष्यन्ते |
| मध्यमपुरुषः | शयिष्यसे | शयिष्येथे | शयिष्यध्वे |
| उत्तमपुरुषः | शयिष्ये | शयिष्यावहे | शयिष्यामहे |

| 'शीङ्'- धातुः, लङ् - लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अशेत | अशयाताम् | अशेरत |
| मध्यमपुरुषः | अशेथाः | अशयाथाम् | अशेध्वम् |
| उत्तमपुरुषः | अशयि | अशेवहि | अशेमहि |

| 'शीङ्'- धातुः, लोट् - लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | शेताम् | शयाताम् | शेरताम् |
| मध्यमपुरुषः | शेष्व | शयाथाम् | शेध्वम् |
| उत्तमपुरुषः | शयै | शयावहै | शयामहै |

© NCERT not to be republished

| ‘शीङ्’- धातुः, विधिलिङ्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | शयीत | शयीयाताम् | शयीरन् |
| मध्यमपुरुषः | शयीथाः | शयीयाथाम् | शयीध्वम् |
| उत्तमपुरुषः | शयीय | शयीवहि | शयीमहि |

| ‘भुज्’- धातुः, लट्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भुङ्क्ते | भुञ्जाते | भुञ्जते |
| मध्यमपुरुषः | भुङ्क्षे | भुञ्जाथे | भुङ्ग्ध्वे |
| उत्तमपुरुषः | भुञ्जे | भुञ्ज्वहे | भुञ्ज्महे |

| ‘भुज्’- धातुः, लृट्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भोक्ष्यते | भोक्ष्येते | भोक्ष्यन्ते |
| मध्यमपुरुषः | भोक्ष्यसे | भोक्ष्येथे | भोक्ष्यध्वे |
| उत्तमपुरुषः | भोक्ष्ये | भोक्ष्यावहे | भोक्ष्यामहे |

| ‘भुज्’ - धातुः, लङ्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अभुङ्क्त | अभुञ्जाताम् | अभुञ्जत |
| मध्यमपुरुषः | अभुङ्क्थाः | अभुञ्जाथाम् | अभुङ्ग्ध्वम् |
| उत्तमपुरुषः | अभुञ्जि | अभुञ्ज्वहि | अभुञ्ज्महि |

© NCERT not to be republished

| ‘भुज्’- धातुः, लोट्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भुङ्क्ताम् | भुञ्जाताम् | भुञ्जताम् |
| मध्यमपुरुषः | भुङ्क्ष्व | भुञ्जाथाम् | भुङ्ग्ध्वम् |
| उत्तमपुरुषः | भुनजै | भुनजावहै | भुनजामहै |

| ‘भुज्’- धातुः, विधिलिङ्-लकारः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भुञ्जीत | भुञ्जीयाताम् | भुञ्जीरन् |
| मध्यमपुरुषः | भुञ्जीथाः | भुञ्जीयाथाम् | भुञ्जीध्वम् |
| उत्तमपुरुषः | भुञ्जीय | भुञ्जीवहि | भुञ्जीमहि |

© NCERT not to be republished